(६२१)
मा चिद् अन्यद् वि शंसत सखायो मा रिषण्यत ।
इन्द्रम् इत् स्तोता वृषणं सचा सुते मुहुर् उक्था च शंसत ॥ ८ ००१ ०१
अवक्रक्षिणं वृषभं यथाजुरं गां न चर्षणीसहम् ।
विद्वेषणं संवननोभयंकरम् मंहिष्ठम् उभयाविनम् ॥ ८ ००१ ०२
यच् चिद् धि त्वा जना इमे नाना हवन्त ऊतये ।
अस्माकम् ब्रह्म इदम् इन्द्र भूतु ते ऽहा विश्वा च वर्धनम् ॥ ८ ००१ ०३
वि तर्तूर्यन्ते मघवन् विपश्चितो अर्यो विपो जनानाम् ।
उप क्रमस्व पुरुरूपम् आ भर वाजं नेदिष्ठम् ऊतये ॥ ८ ००१ ०४
महे चन त्वाम् अद्रिवः परा शुल्काय देयाम् ।
न सहस्राय नायुताय वज्रिवो न शताय शतामघ ॥ ८ ००१ ०५
वस्याँ इन्द्रासि मे पितुर् उत भ्रातुर् अभुञ्जतः ।
माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥ ८ ००१ ०६
क्वेयथ क्वेद् असि पुरुत्रा चिद् धि ते मनः ।
अलर्षि युध्म खजकृत् पुरंदर प्र गायत्रा अगासिषुः ॥ ८ ००१ ०७
प्रास्मै गायत्रम् अर्चत वावातुर् यः पुरंदरः ।
याभिः काण्वस्योप बर्हिर् आसदं यासद् वज्री भिनत् पुरः ॥ ८ ००१ ०८
ये ते सन्ति दशग्विनः शतिनो ये सहस्रिणः ।
अश्वासो ये ते वृषणो रघुद्रुवस् तेभिर् नस् तूयम् आ गहि ॥ ८ ००१ ०९
आ त्व् अ १ द्य सबर्दुघां हुवे गायत्रवेपसम् ।
इन्द्रं धेनुं सुदुघाम् अन्याम् इषम् उरुधाराम् अरंकृतम् ॥ ८ ००१ १०
यत् तुदत् सूर एतशं वङ्कू वातस्य पर्णिना ।
वहत् कुत्सम् आर्जुनेयं शतक्रतुः त्सरद् गन्धर्वम् अस्तृतम् ॥ ८ ००१ ११
य ऋते चिद् अभिश्रिषः पुरा जत्रुभ्य आतृदः ।
संधाता संधिम् मघवा पुरूवसुर् इष्कर्ता विह्रुतम् पुनः ॥ ८ ००१ १२
मा भूम निष्ट्या इवेन्द्र त्वद् अरणा इव ।
वनानि न प्रजहितान्य् अद्रिवो दुरोषासो अमन्महि ॥ ८ ००१ १३

अमन्महीद् अनाशवो ऽनुग्रासश् च वृत्रहन् ।
सकृत् सु ते महता शूर राधसा अनु स्तोमम् मुदीमहि ॥ ८ ००१ १४
यदि स्तोमम् मम श्रवद् अस्माकम् इन्द्रम् इन्दवः ।
तिरः पवित्रं ससृवांस आशवो मन्दन्तु तुग्र्यावृधः ॥ ८ ००१ १५
आ त्व् अ१द्य सधस्तुतिं वावातुः सख्युर् आ गहि ।
उपस्तुतिर् मघोनाम् प्र त्वावत्व् अधा ते वश्मि सुष्टुतिम् ॥ ८ ००१ १६
सोता हि सोमम् अद्रिभिर् एम् एनम् अप्सु धावत ।
गव्या वस्त्रेव वासयन्त इन् नरो निर् धुक्षन् वक्षणाभ्यः ॥ ८ ००१ १७
अध ज्मो अध वा दिवो बृहतो रोचनाद् अधि ।
अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥ ८ ००१ १८
इन्द्राय सु मदिन्तमं सोमं सोता वरेण्यम् ।
शक्र एणम् पीपयद् विश्वया धिया हिन्वानं न वाजयुम् ॥ ८ ००१ १९
मा त्वा सोमस्य गळ्दया सदा याचन्न् अहं गिरा ।
भूर्णिम् मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥ ८ ००१ २०
मदेनेषितम् मदम् उग्रम् उग्रेण शवसा ।
विश्वेषां तरुतारम् मदच्युतम् मदे हि ष्मा ददाति नः ॥ ८ ००१ २१
शेवारे वार्या पुरु देवो मर्ताय दाशुषे ।
स सुन्वते च स्तुवते च रासते विश्वगूर्तो अरिष्टुतः ॥ ८ ००१ २२
एन्द्र याहि मत्स्व चित्रेण देव राधसा ।
सरो न प्रास्य् उदरं सपीतिभिर् आ सोमेभिर् उरु स्फिरम् ॥ ८ ००१ २३
आ त्वा सहस्रम् आ शतं युक्ता रथे हिरण्यये ।
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥ ८ ००१ २४
आ त्वा रथे हिरण्यये हरी मयूरशेप्या ।
शितिपृष्ठा वहताम् मध्वो अन्धसो विवक्षणस्य पीतये ॥ ८ ००१ २५
पिबा त्व् अ१स्य गिर्वणः सुतस्य पूर्वपा इव ।
परिष्कृतस्य रसिन इयम् आसुतिश् चारुर् मदाय पत्यते ॥ ८ ००१ २६
य एको अस्ति दंसना महाँ उग्रो अभि व्रतैः ।
गमत् स शिप्री न स योषद् आ गमद् धवं न परि वर्जति ॥ ८ ००१ २७

त्वम् पुरं चरिष्ण्वं वधैः शुष्णस्य सम् पिणक् ।
त्वम् भा अनु चरो अध द्विता यद् इन्द्र हव्यो भुवः ॥ ८ ००१ २८
मम त्वा सूर उदिते मम मध्यंदिने दिवः ।
मम प्रपित्वे अपिशर्वरे वसव् आ स्तोमासो अवृत्सत ॥ ८ ००१ २९
स्तुहि स्तुहीद् एते घा ते मंहिष्ठासो मघोनाम् ।
निन्दिताश्वः प्रपथी परमज्या मघस्य मेध्यातिथे ॥ ८ ००१ ३०
आ यद् अश्वान् वनन्वतः श्रद्धयाहं रथे रुहम् ।
उत वामस्य वसुनश् चिकेतति यो अस्ति याद्वः पशुः ॥ ८ ००१ ३१
य ऋज्रा मह्यम् मामहे सह त्वचा हिरण्यया ।
एष विश्वान्य् अभ्य् अस्तु सौभगासङ्गस्य स्वनद्रथः ॥ ८ ००१ ३२
अध प्लायोगिर् अति दासद् अन्यान् आसङ्गो अग्ने दशभिः सहस्रैः ।
अधोक्षणो दश मह्यं रुशन्तो नळा इव सरसो निर् अतिष्ठन् ॥ ८ ००१ ३३
अन्व् अस्य स्थूरं ददृशे पुरस्ताद् अनस्थ ऊरुर् अवरम्बमाणः ।
शश्वती नार्य् अभिचक्ष्याह सुभद्रम् अर्य भोजनम् बिभर्षि ॥ ८ ००१ ३४

(६२२)
इदं वसो सुतम् अन्धः पिबा सुपूर्णम् उदरम् ।
अनाभयिन् ररिमा ते ॥ ८ ००२ ०१
नृभिर् धूतः सुतो अश्नैर् अव्यो वारैः परिपूतः ।
अश्वो न निक्तो नदीषु ॥ ८ ००२ ०२
तं ते यवं यथा गोभिः स्वादुम् अकर्म श्रीणन्तः ।
इन्द्र त्वास्मिन् सधमादे ॥ ८ ००२ ०३
इन्द्र इत् सोमपा एक इन्द्रः सुतपा विश्वायुः ।
अन्तर् देवान् मर्त्यांश् च ॥ ८ ००२ ०४
न यं शुक्रो न दुराशीर् न तृप्रा उरुव्यचसम् ।
अपस्पृण्वते सुहार्दम् ॥ ८ ००२ ०५
गोभिर् यद् ईम् अन्ये अस्मन् मृगं न व्रा मृगयन्ते ।

अ॒भि॒त्सर॑न्ति धे॒नुभिः॑ ॥ ८ ००२ ०६
त्र॒य इन्द्र॑स्य॒ सोमाः॑ सु॒तासः॑ सन्तु दे॒वस्य॑ ।
स्वे क्षये॑ सु॒तपाव्नः॑ ॥ ८ ००२ ०७
त्रयः॒ कोशा॑स श्चोतन्ति ति॒स्रश् च॒म्व १॒ ः सुपू॑र्णाः ।
स॒मा॒ने अधि॒ भार्म॑न् ॥ ८ ००२ ०८
शुचि॑र् असि पुरु॒निष्ठाः क्षी॒रैर् म॑ध्य॒त आशी॑र्तः ।
द॒ध्ना मन्दि॑ष्ठः॒ शूर॑स्य ॥ ८ ००२ ०९
इ॒मे त॑ इन्द्र सोमा॑स् ती॒व्रा अ॒स्मे सु॒तासः॑ ।
शु॒क्रा आ॒शिर॑ं याचन्ते ॥ ८ ००२ १०
ताँ आ॒शिर॑म् पु॒रो॒ळाश॒म् इन्द्रे॒मं सोम॑ं श्रीणीहि ।
रे॒वन्त॒ं हि त्वा॑ शृ॒णोमि॑ ॥ ८ ००२ ११
हृ॒त्सु पी॒तासो॑ युध्यन्ते दु॒र्मदा॑सो॒ न सुरा॑याम् ।
ऊध॒र् न न॒ग्ना ज॑रन्ते ॥ ८ ००२ १२
रे॒वाँ इद् रे॒वत॑ स्तो॒ता स्यात् त्वाव॑तो म॒घोनः॑ ।
प्रेद् उ॑ हरिवः श्रु॒तस्य॑ ॥ ८ ००२ १३
उ॒क्थं च॒न श॒स्यमा॑नम् अगो॑र् अ॒रिर् आ चि॑केत ।
न गा॑य॒त्रं गी॒यमा॑नम् ॥ ८ ००२ १४
मा न॑ इन्द्र पीय॒त्नवे॒ मा शर्ध॑ते॒ परा॑ दाः ।
शिक्षा॑ शचीवः॒ शची॑भिः ॥ ८ ००२ १५
व॒यम् उ॑ त्वा त॒दिद॑र्था॒ इन्द्र॑ त्वा॒यन्तः॒ सखा॑यः ।
कण्वा॑ उ॒क्थेभि॑र् जरन्ते ॥ ८ ००२ १६
न घे॑म् अ॒न्यद् आ प॑पन॒ वज्रि॑न्न् अ॒पसो॒ नवि॑ष्टौ ।
तवेद् उ॒ स्तोम॑ं चिकेत ॥ ८ ००२ १७
इ॒च्छन्ति॑ दे॒वाः सु॒न्वन्त॒ं न स्वप्ना॑य स्पृहयन्ति ।
यन्ति॑ प्र॒माद॑म् अत॑न्द्राः ॥ ८ ००२ १८
ओ षु प्र या॑हि॒ वाजे॑भि॒र् मा हृ॑णीथा अ॒भ्य् अ १॒ स्मान् ।
म॒हाँ इ॑व॒ युव॑जानिः ॥ ८ ००२ १९
मो ष्व् अ १॒ द्य दु॒र्हणा॑वान् सा॒यं क॑रद् आ॒रे अ॒स्मत् ।

अश्रीर इव जामाता ॥ ८ ००२ २०
विद्मा ह्य् अस्य वीरस्य भूरिदावरीं सुमतिम् ।
त्रिषु जातस्य मनांसि ॥ ८ ००२ २१
आ तू षिञ्च कण्वमन्तं न घा विद्म शवसानात् ।
यशस्तरं शतमूतेः ॥ ८ ००२ २२
ज्येष्ठेन सोतर् इन्द्राय सोमं वीराय शक्राय ।
भरा पिबन् नर्याय ॥ ८ ००२ २३
यो वेदिष्ठो अव्यथिष्व् अश्वावन्तं जरितृभ्यः ।
वाजं स्तोतृभ्यो गोमन्तम् ॥ ८ ००२ २४
पन्यम्-पन्यम् इत् सोतार आ धावत मद्याय ।
सोमं वीराय शूराय ॥ ८ ००२ २५
पाता वृत्रहा सुतम् आ घा गमन् नारे अस्मत् ।
नि यमते शतमूतिः ॥ ८ ००२ २६
एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम् ।
गीर्भिः श्रुतं गिर्वणसम् ॥ ८ ००२ २७
स्वादवः सोमा आ याहि श्रीताः सोमा आ याहि ।
शिप्रिन्न् ऋषीवः शचीवो नायम् अच्छा सधमादम् ॥ ८ ००२ २८
स्तुतश् च यास् त्वा वर्धन्ति महे राधसे नृम्णाय ।
इन्द्र कारिणं वृधन्तः ॥ ८ ००२ २९
गिरश् च यास् ते गिर्वाह उक्था च तुभ्यं तानि ।
सत्रा दधिरे शवांसि ॥ ८ ००२ ३०
एवेद् एष तुविकूर्मिर् वाजाँ एको वज्रहस्तः ।
सनाद् अमृक्तो दयते ॥ ८ ००२ ३१
हन्ता वृत्रं दक्षिणेनेन्द्रः पुरू पुरुहूतः ।
महान् महीभिः शचीभिः ॥ ८ ००२ ३२
यस्मिन् विश्वाश् चर्षणय उत च्यौत्ना ज्रयांसि च ।
अनु घेन् मन्दी मघोनः ॥ ८ ००२ ३३
एष एतानि चकारेन्द्रो विश्वा यो ऽति शृण्वे ।

वा॒ज॒दावा॑ म॒घोना॑म् ॥ ८ ००२ ३४
प्रभ॑र्ता॒ रथं॑ ग॒व्यन्त॑म् अपा॒काच् चि॒द् यम् अव॑ति ।
इ॒नो वसु॒ स हि वोळ्हा॑ ॥ ८ ००२ ३५
सनि॑ता॒ विप्रो॒ अर्व॑द्भि॒र् हन्ता॑ वृ॒त्रं नृभि॒ः शूर॑ः ।
स॒त्यो ऽवि॒ता वि॒धन्त॑म् ॥ ८ ००२ ३६
यज॑ध्वैनम् प्रियमेधा॒ इन्द्रं॑ स॒त्राचा॒ मन॑सा ।
यो भूत् सोमैः॑ स॒त्यम॑द्वा ॥ ८ ००२ ३७
गा॒थश्र॑वसं॒ सत्प॑तिं॒ श्रव॑स्कामम् पुरु॒त्मान॑म् ।
कण्वा॑सो गा॒त वा॒जिन॑म् ॥ ८ ००२ ३८
य ऋ॒ते चि॒द् गास् प॒देभ्यो॒ दात् सखा॒ नृभ्य॒ः शची॑वान् ।
ये अ॑स्मि॒न् काम॒म् अश्रि॑यन् ॥ ८ ००२ ३९
इ॒त्था धीव॑न्तम् अद्रिवः का॒ण्वम् मेध्या॑तिथिम् ।
मे॒षो भू॒तो॒ ऽभि यन्न् अयः॑ ॥ ८ ००२ ४०
शिक्षा॑ विभिन्दो अस्मै च॒त्वार्य् अ॒युता॒ दद॑त् ।
अ॒ष्टा प॒रः स॒हस्रा॑ ॥ ८ ००२ ४१
उ॒त सु॒ त्ये प॑यो॒वृधा॑ मा॒की रण॑स्य न॒प्त्या ।
ज॒नि॒त्व॒नाय॑ मामहे ॥ ८ ००२ ४२

(६२३)
पिबा॑ सु॒तस्य॑ र॒सिनो॒ मत्स्वा॑ न इन्द्र॒ गोम॑तः ।
आ॒पिर् नो॑ बोधि सध॒माद्यो॑ वृ॒धे ऽस्माँ अ॑वन्तु ते॒ धियः॑ ॥ ८ ००३ ०१
भू॒याम॑ ते सुम॒तौ वा॒जिनो॑ व॒यम् मा न॑ स्तर् अ॒भिमा॑तये ।
अ॒स्माञ् चि॒त्राभि॑र् अवताद् अ॒भिष्टि॑भि॒र् आ नः॑ सु॒म्नेषु॑ यामय ॥ ८ ००३ ०२
इ॒मा उ॑ त्वा पुरूवसो॒ गिरो॑ वर्धन्तु॒ या मम॑ ।
पा॒व॒कव॑र्णाः॒ शुच॑यो विप॒श्चितो॑ ऽभि स्तोमै॑र् अनूषत ॥ ८ ००३ ०३
अ॒यं स॒हस्र॒म् ऋषि॑भि॒ः सह॑स्कृतः समु॒द्र इ॑व पप्रथे ।
स॒त्यः सो अ॑स्य महि॒मा गृ॑णे॒ शवो॑ य॒ज्ञेषु॑ विप्र॒राज्ये॑ ॥ ८ ००३ ०४

इन्द्रम् इद् देवतातय इन्द्रम् प्रयत्य् अध्वरे ।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥ ८ ००३ ०५
इन्द्रो मह्ना रोदसी पप्रथच् छव इन्द्रः सूर्यम् अरोचयत् ।
इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे सुवानास इन्दवः ॥ ८ ००३ ०६
अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिर् आयवः ।
समीचीनास ऋभवः सम् अस्वरन् रुद्रा गृणन्त पूर्व्यम् ॥ ८ ००३ ०७
अस्येद् इन्द्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि ।
अद्या तम् अस्य महिमानम् आयवो ऽनु ष्टुवन्ति पूर्वथा ॥ ८ ००३ ०८
तत् त्वा यामि सुवीर्यं तद् ब्रह्म पूर्वचित्तये ।
येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वम् आविथ ॥ ८ ००३ ०९
येना समुद्रम् असृजो महीर् अपस् तद् इन्द्र वृष्णि ते शवः ।
सद्यः सो अस्य महिमा न संनशे यं क्षोणीर् अनुचक्रदे ॥ ८ ००३ १०
शग्धी न इन्द्र यत् त्वा रयिं यामि सुवीर्यम् ।
शग्धि वाजाय प्रथमं सिषासते शग्धि स्तोमाय पूर्व्य ॥ ८ ००३ ११
शग्धी नो अस्य यद् ध पौरम् आविथ धिय इन्द्र सिषासतः ।
शग्धि यथा रुशमं श्यावकं कृपम् इन्द्र प्रावः स्वर्णरम् ॥ ८ ००३ १२
कन् नव्यो अतसीनां तुरो गृणीत मर्त्यः ।
नही न्व् अस्य महिमानम् इन्द्रियं स्वर् गृणन्त आनशुः ॥ ८ ००३ १३
कद् उ स्तुवन्त ऋतयन्त देवत ऋषिः को विप्र ओहते ।
कदा हवम् मघवन्न् इन्द्र सुन्वतः कद् उ स्तुवत आ गमः ॥ ८ ००३ १४
उद् उ त्ये मधुमत्तमा गिर स्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥ ८ ००३ १५
कण्वा इव भृगवः सूर्या इव विश्वम् इद् धीतम् आनशुः ।
इन्द्रं स्तोमेभिर् महयन्त आयवः प्रियमेधासो अस्वरन् ॥ ८ ००३ १६
युक्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः ।
अर्वाचीनो मघवन् सोमपीतय उग्र ऋष्वेभिर् आ गहि ॥ ८ ००३ १७
इमे हि ते कारवो वावशुर् धिया विप्रासो मेधसातये ।
स त्वं नो मघवन्न् इन्द्र गिर्वणो वेनो न शृणुधी हवम् ॥ ८ ००३ १८

निर् इ॑न्द्र बृह॒तीभ्यो॑ वृ॒त्रं धनु॑भ्यो अस्फुरः ।
निर् अर्बु॑दस्य॒ मृगय॑स्य मा॒यिनो॒ निः पर्व॑तस्य॒ गा आ॑जः ॥ ८ ००३ १९
निर् अ॒ग्नयो॑ रुरुचुर् निर् उ॒ सूर्यो॒ निः सोम॑ इन्द्रि॒यो रसः॑ ।
निर् अ॒न्तरि॑क्षाद् अधमो म॒हाम् अहिं॑ कृ॒षे तद् इ॑न्द्र॒ पौंस्य॑म् ॥ ८ ००३ २०
यम् मे॒ दुर् इन्द्रो॑ म॒रुतः॒ पाक॑स्थामा॒ कौर॑याणः ।
विश्वे॑षां॒ त्मना॒ शोभि॑ष्ठ॒म् उपे॑व दि॒वि धाव॑मानम् ॥ ८ ००३ २१
रोहि॑तम् मे॒ पाक॑स्थामा सु॒धुरं॑ कक्ष्य॒प्राम् ।
अदा॑द् रा॒यो वि॒बोध॑नम् ॥ ८ ००३ २२
यस्मा॑ अ॒न्ये दश॒ प्रति॒ धुरं॒ वह॑न्ति॒ वह्न॑यः ।
अस्तं॒ वयो॒ न तुग्र्य॑म् ॥ ८ ००३ २३
आ॒त्मा पि॒तुस् त॒नूर् वास॑ ओजो॒दा अ॒भ्यञ्ज॑नम् ।
तु॒रीय॒म् इद् रोहि॑तस्य॒ पाक॑स्थामानम् भो॒जं दा॒तार॑म् अब्रवम् ॥ ८ ००३ २४

(६२४)
यद् इ॑न्द्र॒ प्राग् अपा॒ग् उद॒ङ् न्यग् वा हू॒यसे॒ नृभिः॑ ।
सिमा॑ पु॒रू नृषू॑तो अ॒स्य् आन॑वे ऽसि प्रशर्ध तु॒र्वशे॑ ॥ ८ ००४ ०१
यद् वा॒ रुमे॒ रुश॑मे॒ श्याव॑के॒ कृप॒ इन्द्र॑ मा॒दय॑से॒ सचा॑ ।
कण्वा॑सस् त्वा॒ ब्रह्म॑भि॒ स्तोम॑वाहस॒ इन्द्रा य॑च्छन्त्य् आ ग॑हि ॥ ८ ००४ ०२
यथा॑ गौ॒रो अ॒पा कृ॒तं तृष्य॒न्न् एत्य् अवेरि॑णम् ।
आ॒पि॒त्वे नः॑ प्रपि॒त्वे तू॒यम् आ ग॑हि॒ कण्वे॑षु॒ सु सचा॒ पिब॑ ॥ ८ ००४ ०३
मन्द॑न्तु त्वा मघवन्न् इ॒न्द्रेन्द॑वो राधो॒देया॑य सु॒न्वते ।
आ॒मुष्या॒ सोम॑म् अपिबश् च॒मू सु॒तं ज्येष्ठं॒ तद् द॑धिषे॒ सहः॑ ॥ ८ ००४ ०४
प्र च॑क्रे॒ सह॑सा॒ सहो॑ ब॒भञ्ज॑ म॒न्युम् ओज॑सा ।
विश्वे॑ त इन्द्र पृतना॒यवो॑ यहो॒ नि वृ॒क्षा इ॑व येमिरे ॥ ८ ००४ ०५
स॒हस्रे॑णेव सचते यवी॒युधा॒ यस् त॒ आन॒ळ् उप॑स्तुतिम् ।
पु॒त्रम् प्रा॑व॒र्गं कृ॑णुते सु॒वीर्ये॑ दा॒श्नोति॒ नम॑ऽउक्तिभिः ॥ ८ ००४ ०६
मा भे॑म॒ मा श्र॑मिष्म उ॒ग्रस्य॑ स॒ख्ये तव॑ ।

महत् ते वृष्णो अभिचक्ष्यं कृतम् पश्येम तुर्वशं यदुम् ॥ ८ ००४ ०७
सव्याम् अनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति ।
मध्वा सम्पृक्ताः सारघेण धेनवस् तूयम् एहि द्रवा पिब ॥ ८ ००४ ०८
अश्वी रथी सुरूप इद् गोमाँ इद् इन्द्र ते सखा ।
श्वात्रभाजा वयसा सचते सदा चन्द्रो याति सभाम् उप ॥ ८ ००४ ०९
ऋश्यो न तृष्यन्न् अवपानम् आ गहि पिबा सोमं वशाँ अनु ।
निमेघमानो मघवन् दिवे-दिव ओजिष्ठं दधिषे सहः ॥ ८ ००४ १०
अध्वर्यो द्रावया त्वं सोमम् इन्द्रः पिपासति ।
उप नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ॥ ८ ००४ ११
स्वयं चित् स मन्यते दाशुरिर् जनो यत्रा सोमस्य तृम्पसि ।
इदं ते अन्नं युज्यं समुक्षितं तस्येहि प्र द्रवा पिब ॥ ८ ००४ १२
रथेष्ठायाध्वर्यवः सोमम् इन्द्राय सोतन ।
अधि ब्रध्नस्याद्रयो वि चक्षते सुन्वन्तो दाश्वध्वरम् ॥ ८ ००४ १३
उप ब्रध्नं वावाता वृषणा हरी इन्द्रम् अपसु वक्षतः ।
अर्वाञ्चं त्वा सप्तयो ऽध्वरश्रियो वहन्तु सवनेद् उप ॥ ८ ००४ १४
प्र पूषणं वृणीमहे युज्याय पुरूवसुम् ।
स शक्र शिक्ष पुरुहूत नो धिया तुजे राये विमोचन ॥ ८ ००४ १५
सं नः शिशीहि भुरिजोर् इव क्षुरं रास्व रायो विमोचन ।
त्वे तन् नः सुवेदम् उस्रियम् वसु यं त्वं हिनोषि मर्त्यम् ॥ ८ ००४ १६
वेमि त्वा पूषन्न् ऋञ्जसे वेमि स्तोतव आघृणे ।
न तस्य वेम्य् अरणं हि तद् वसो स्तुषे पज्राय साम्ने ॥ ८ ००४ १७
परा गावो यवसं कच् चिद् आघृणे नित्यं रेक्णो अमर्त्य ।
अस्माकम् पूषन्न् अविता शिवो भव मंहिष्ठो वाजसातये ॥ ८ ००४ १८
स्थूरं राधः शताश्वं कुरुङ्गस्य दिविष्टिषु ।
राज्ञस् त्वेषस्य सुभगस्य रातिषु तुर्वशेष्व् अमन्महि ॥ ८ ००४ १९
धीभिः सातानि काण्वस्य वाजिनः प्रियमेधैर् अभिद्युभिः ।
षष्टिं सहस्रानु निर्मजाम् अजे निर् यूथानि गवाम् ऋषिः ॥ ८ ००४ २०
वृक्षाश् चिन् मे अभिपित्वे अरारणुः ।

गाम् भ॑जन्त मे॒हनाश्व॑म् भजन्त मे॒हना॑ ॥ ८ ००४ २१

(६२५)

दू॒राद् इ॒हेव॒ यत् स॒त्य् अरु॒णप्सु॒र् अशि॑श्वितत् ।
वि भा॒नुं वि॒श्वधा॑तनत् ॥ ८ ००५ ०१
नृ॒वद् द॑स्रा मनो॒युजा॒ रथे॑न पृथु॒पाज॑सा ।
सचे॑थे अश्विनो॒षस॑म् ॥ ८ ००५ ०२
यु॒वाभ्यां॑ वाजिनीवसू॒ प्रति॒ स्तोमा॑ अदृक्षत ।
वाचं॑ दू॒तो यथो॑हिषे ॥ ८ ००५ ०३
पु॒रु॒प्रि॒या ण॑ ऊ॒तये॑ पुरुम॒न्द्रा पु॑रू॒वसू॑ ।
स्तु॒षे कण्वा॑सो अ॒श्विना॑ ॥ ८ ००५ ०४
मंहि॑ष्ठा वाज॒सात॑मे॒षय॑न्ता शु॒भस् पती॑ ।
गन्ता॑रा दा॒शुषो॑ गृ॒हम् ॥ ८ ००५ ०५
ता सु॒देवाय॑ दा॒शुषे॑ सु॒मेधाम् अवि॑तारिणीम् ।
घृ॒तैर् गव्यू॑तिम् उक्षतम् ॥ ८ ००५ ०६
आ न॒ स्तोम॒म् उप॑ द्र॒वत् तूयं॑ श्ये॒नेभि॑र् आ॒शुभिः॑ ।
या॒तम् अश्वे॑भिर् अश्विना ॥ ८ ००५ ०७
येभि॑स् ति॒स्रः प॑रा॒वतो॑ दि॒वो विश्वा॑नि रोच॒ना ।
त्रीर् अ॒क्तून् प॑रि॒दीय॑थः ॥ ८ ००५ ०८
उ॒त नो॒ गोम॑ती॒र् इष॑ उ॒त सा॒तीर् अ॑हर्विदा ।
वि प॒थः सा॒तये॑ सितम् ॥ ८ ००५ ०९
आ नो॒ गोम॑न्तम् अश्विना सु॒वीरं॑ सु॒रथं॑ र॒यिम् ।
वो॒ळ्हम् अश्वा॑वती॒र् इषः॑ ॥ ८ ००५ १०
वा॒वृ॒धा॒ना शु॑भस् पती दस्रा॒ हिर॑ण्यवर्तनी ।
पिब॑तं सो॒म्यम् मधु॑ ॥ ८ ००५ ११
अ॒स्मभ्यं॑ वाजिनीवसू म॒घव॑द्भ्यश् च स॒प्रथः॑ ।
छ॒र्दिर् य॑न्त॒म् अदा॑भ्यम् ॥ ८ ००५ १२

नि षु ब्रह्म॒ जना॑नां॒ यावि॑ष्टं॒ तू॒यम् आ ग॑तम् ।
मो ष्व् अ॒१॑न्याँ उपा॑रतम् ॥ ८ ००५ १३
अ॒स्य पि॑बतम् अश्विना यु॒वम् मद॑स्य॒ चारु॑णः ।
मध्वो॑ रा॒तस्य॑ धिष्ण्या ॥ ८ ००५ १४
अ॒स्मे आ व॑हतं र॒यिं श॒तव॑न्तं सह॒स्रिण॑म् ।
पु॒रु॒क्षुं वि॒श्वधा॑यसम् ॥ ८ ००५ १५
पु॒रु॒त्रा चि॒द् धि वां॑ नरा वि॒ह्वय॑न्ते मनी॒षिणः॑ ।
वा॒घद्भि॑र् अश्विना ग॑तम् ॥ ८ ००५ १६
जना॑सो वृ॒क्तब॑र्हिषो ह॒विष्म॑न्तो अ॒रंकृतः॑ ।
यु॒वां ह॑वन्ते अश्विना ॥ ८ ००५ १७
अ॒स्माक॑म् अ॒द्य वा॑म् अ॒यं स्तोमो॒ वाहि॑ष्ठो॒ अन्त॑मः ।
यु॒वाभ्या॑म् भूत्व् अश्विना ॥ ८ ००५ १८
यो ह॑ वा॒म् मधु॑नो॒ दृति॒र् आहि॑तो र॒थच॑र्षणे ।
ततः॑ पिबतम् अश्विना ॥ ८ ००५ १९
तेन॑ नो वाजिनीवसू॒ पश्वे॑ तो॒काय॒ शं गवे॑ ।
वह॑त॒म् पीव॑री॒र् इषः॑ ॥ ८ ००५ २०
उ॒त नो॑ दि॒व्या इष॑ उ॒त सिन्धू॑ँ॒र् अहर्विदा ।
अप॒ द्वारे॑व वर्षथः ॥ ८ ००५ २१
क॒दा वां॑ तौ॒ग्र्यो वि॑धत् समु॒द्रे ज॑हि॒तो न॑रा ।
यद् वां॒ रथो॒ विभि॒ष् पता॑त् ॥ ८ ००५ २२
यु॒वं कण्वा॑य नासत्या॒ ऋपि॑रिप्ताय ह॒र्म्ये ।
शश्व॑द् ऊ॒तीर् द॑शस्यथः ॥ ८ ००५ २३
ताभि॒र् आ या॑तम् ऊ॒तिभि॒र् नव्य॑सीभिः सुश॒स्तिभिः॑ ।
यद् वां॑ वृषण्वसू हु॒वे ॥ ८ ००५ २४
यथा॑ चित् कण्वम् आव॑तम् प्रि॒यमे॑धम् उपस्तु॒तम् ।
अत्रिं॑ शि॒ञ्जार॑म् अश्विना ॥ ८ ००५ २५
यथो॒त कृत्व्ये॒ धने॑ ऽंशुं गोष्व् अ॒गस्त्य॑म् ।
यथा॒ वाजे॑षु॒ सोभ॑रिम् ॥ ८ ००५ २६

एतावद् वां वृषण्वसू अतो वा भूयो अश्विना ।
गृणन्तः सुम्नम् ईमहे ॥ ८ ००५ २७
रथं हिरण्यवन्धुरं हिरण्याभीशुम् अश्विना ।
आ हि स्थाथो दिविस्पृशम् ॥ ८ ००५ २८
हिरण्ययी वां रभिर् ईषा अक्षो हिरण्ययः ।
उभा चक्रा हिरण्यया ॥ ८ ००५ २९
तेन नो वाजिनीवसू परावतश् चिद् आ गतम् ।
उपेमां सुष्टुतिम् मम ॥ ८ ००५ ३०
आ वहेथे पराकात् पूर्वीर् अश्नन्ताव् अश्विना ।
इषो दासीर् अमर्त्या ॥ ८ ००५ ३१
आ नो द्युम्नैर् आ श्रवोभिर् आ राया यातम् अश्विना ।
पुरुश्चन्द्रा नासत्या ॥ ८ ००५ ३२
एह वाम् प्रुषितप्सवो वयो वहन्तु पर्णिनः ।
अच्छा स्वध्वरं जनम् ॥ ८ ००५ ३३
रथं वाम् अनुगायसं य इषा वर्तते सह ।
न चक्रम् अभि बाधते ॥ ८ ००५ ३४
हिरण्ययेन रथेन द्रवत्पाणिभिर् अश्वैः ।
धीजवना नासत्या ॥ ८ ००५ ३५
युवम् मृगं जागृवांसं स्वदथो वा वृषण्वसू ।
ता नः पृङ्क्तम् इषा रयिम् ॥ ८ ००५ ३६
ता मे अश्विना सनीनां विद्यातं नवानाम् ।
यथा चिच् चैद्यः कशुः शतम् उष्ट्रानां ददत् सहस्रा दश गोनाम् ॥ ८ ००५ ३७
यो मे हिरण्यसंदृशो दश राज्ञो अमंहत ।
अधस्पदा इच् चैद्यस्य कृष्टयश् चर्मम्ना अभितो जनाः ॥ ८ ००५ ३८
माकिर् एना पथा गाद् येनेमे यन्ति चेदयः ।
अन्यो नेत् सूरिर् ओहते भूरिदावत्तरो जनः ॥ ८ ००५ ३९

(६२६)
म॒हाँ इन्द्रो॒ य ओज॑सा प॒र्जन्यो॑ वृष्टि॒माँ इ॑व ।
स्तोमै॑र् व॒त्सस्य॑ वावृधे ॥ ८ ००६ ०१
प्र॒जाम् ऋ॒तस्य॒ पिप्र॑तः॒ प्र यद् भर॑न्त॒ वह्न॑यः ।
विप्रा॑ ऋ॒तस्य॒ वाह॑सा ॥ ८ ००६ ०२
कण्वा॒ इन्द्रं॒ यद् अक्र॑त॒ स्तोमै॑र् य॒ज्ञस्य॒ साध॑नम् ।
जा॒मि ब्रु॑व॒त आयु॑धम् ॥ ८ ००६ ०३
सम् अ॑स्य म॒न्यवे॒ विशो॒ विश्वा॑ नमन्त कृ॒ष्टयः॑ ।
स॒मु॒द्राये॑व॒ सिन्ध॑वः ॥ ८ ००६ ०४
ओज॒स् तद् अ॑स्य तित्विष उ॒भे यद् स॒मव॑र्तयत् ।
इन्द्र॒श् चर्मे॑व॒ रोद॑सी ॥ ८ ००६ ०५
वि चि॑द् वृ॒त्रस्य॒ दोध॑तो॒ वज्रे॑ण श॒तप॑र्वणा ।
शिरो॑ बिभेद वृ॒ष्णिना॑ ॥ ८ ००६ ०६
इ॒मा अ॒भि प्र णो॑नुमो वि॒पाम् अग्रे॑षु धी॒तयः॑ ।
अ॒ग्नेः शो॒चिर् न दि॒द्युतः॑ ॥ ८ ००६ ०७
गुहा॑ स॒तीर् उप॒ त्मना॒ प्र यच् छोच॑न्त धी॒तयः॑ ।
कण्वा॑ ऋ॒तस्य॒ धार॑या ॥ ८ ००६ ०८
प्र तम् इ॑न्द्र नशीमहि र॒यिं गोम॑न्तम् अ॒श्विन॑म् ।
प्र ब्रह्म॑ पू॒र्वचि॑त्तये ॥ ८ ००६ ०९
अ॒हम् इद् धि पि॒तुष् परि॑ मे॒धाम् ऋ॒तस्य॑ ज॒ग्रभ॑ ।
अ॒हं सूर्य॑ इवाजनि ॥ ८ ००६ १०
अ॒हम् प्र॒त्नेन॒ मन्म॑ना॒ गिरः॑ शुम्भामि कण्व॒वत् ।
येनेन्द्र॒ः शुष्म॒म् इद् द॒धे ॥ ८ ००६ ११
ये त्वाम् इ॑न्द्र॒ न तु॑ष्टु॒वुर् ऋष॑यो॒ ये च॑ तुष्टु॒वुः ।
ममेद् व॑र्धस्व॒ सुष्टु॑तः ॥ ८ ००६ १२
यद् अ॑स्य म॒न्युर् अध्व॑नी॒द् वि वृ॒त्रम् प॑र्व॒शो रु॒जन् ।
अपः॑ स॑मु॒द्रम् ऐर॑यत् ॥ ८ ००६ १३
नि शुष्ण॑ इन्द्र धर्ण॒सिं वज्रं॑ जघन्थ॒ दस्य॑वि ।

वृषा॒ ह्य॑ उग्र शृण्वि॒षे ॥ ८ ००६ १४
न द्याव॒ इन्द्र॒म् ओज॑सा॒ नान्तरि॑क्षाणि व॒ज्रिण॑म् ।
न वि॑व्यचन्त॒ भूम॑यः ॥ ८ ००६ १५
यस् त॑ इन्द्र म॒हीर् अ॒प स्त॑भू॒यमा॑न॒ आश॑यत् ।
नि तम् पद्या॑सु शिश्नथः ॥ ८ ००६ १६
य इ॒मे रोद॑सी म॒ही स॑मी॒ची स॒मज॑ग्रभीत् ।
तमो॑भिर् इन्द्र॒ तं गु॑हः ॥ ८ ००६ १७
य इ॑न्द्र॒ यत॑यस् त्वा॒ भृग॑वो॒ ये च॑ तुष्टु॒वुः ।
ममेद् उ॑ग्र श्रुधी॒ हव॑म् ॥ ८ ००६ १८
इ॒मास् त॑ इन्द्र॒ पृश्न॑यो घृ॒तं दु॑हत आ॒शिर॑म् ।
ए॒नाम् ऋ॒तस्य॑ पि॒प्युषीः॑ ॥ ८ ००६ १९
या इ॑न्द्र प्र॒स्वस् त्वा॒सा गर्भ॒म् अच॑क्रिरन् ।
परि॒ धर्मे॑व॒ सूर्य॑म् ॥ ८ ००६ २०
त्वाम् इच् छ॑वसस् पते॒ कण्वा॑ उ॒क्थेन॑ वावृधुः ।
त्वां सु॒तास॒ इन्द॑वः ॥ ८ ००६ २१
तवेद् इ॑न्द्र॒ प्रणी॑तिषू॒त प्रश॑स्तिर् अद्रिवः ।
य॒ज्ञो वि॑तन्त॒साय्यः॑ ॥ ८ ००६ २२
आ न॑ इन्द्र म॒हीम् इष॒म् पुरं॒ न द॑र्षि॒ गोम॑तीम् ।
उ॒त प्र॒जां सु॒वीर्य॑म् ॥ ८ ००६ २३
उ॒त त्यद् आ॒श्वश्व्यं॒ यद् इ॑न्द्र॒ नाहु॑षी॒ष्व् आ ।
अग्रे॑ वि॒क्षु प्र॒दीद॑यत् ॥ ८ ००६ २४
अ॒भि व्र॒जं न त॑त्नि॒षे सूर॑ उपा॒कच॑क्षसम् ।
यद् इ॑न्द्र मृ॒ळया॑सि नः ॥ ८ ००६ २५
यद् अ॒ङ्ग त॑विषी॒यस॒ इन्द्र॑ प्र॒राज॑सि क्षि॒तीः ।
म॒हाँ अ॑पा॒र ओज॑सा ॥ ८ ००६ २६
तं त्वा॑ ह॒विष्म॑तीर् विश॒ उप॑ ब्रुवत ऊ॒तये॑ ।
उ॒रु॒ज्रय॑स॒म् इन्दु॑भिः ॥ ८ ००६ २७
उ॒प॒ह्व॒रे गि॑री॒णां सं॑ग॒थे च॑ न॒दीना॑म् ।

धिया विप्रो अजायत ॥ ८ ००६ २८
अतः समुद्रम् उद्वतश् चिकित्वाँ अव पश्यति ।
यतो विपान एजति ॥ ८ ००६ २९
आद् इत् प्रत्नस्य रेतसो ज्योतिष् पश्यन्ति वासरम् ।
परो यद् इध्यते दिवा ॥ ८ ००६ ३०
कण्वास इन्द्र ते मतिं विश्वे वर्धन्ति पौंस्यम् ।
उतो शविष्ठ वृष्ण्यम् ॥ ८ ००६ ३१
इमाम् म इन्द्र सुष्टुतिं जुषस्व प्र सु माम् अव ।
उत प्र वर्धया मतिम् ॥ ८ ००६ ३२
उत ब्रह्मण्या वयं तुभ्यम् प्रवृद्ध वज्रिवः ।
विप्रा अतक्ष्म जीवसे ॥ ८ ००६ ३३
अभि कण्वा अनूषतापो न प्रवता यतीः ।
इन्द्रं वनन्वती मतिः ॥ ८ ००६ ३४
इन्द्रम् उक्थानि वावृधुः समुद्रम् इव सिन्धवः ।
अनुत्तमन्युम् अजरम् ॥ ८ ००६ ३५
आ नो याहि परावतो हरिभ्यां हर्यताभ्याम् ।
इमम् इन्द्र सुतम् पिब ॥ ८ ००६ ३६
त्वाम् इद् वृत्रहन्तम जनासो वृक्तबर्हिषः ।
हवन्ते वाजसातये ॥ ८ ००६ ३७
अनु त्वा रोदसी उभे चक्रं न वर्त्य् एतशम् ।
अनु सुवानास इन्दवः ॥ ८ ००६ ३८
मन्दस्वा सु स्वर्णर उतेन्द्र शर्यणावति ।
मत्स्वा विवस्वतो मती ॥ ८ ००६ ३९
वावृधान उप द्यवि वृषा वज्र्य् अरोरवीत् ।
वृत्रहा सोमपातमः ॥ ८ ००६ ४०
ऋषिर् हि पूर्वजा अस्य् एक ईशान ओजसा ।
इन्द्र चोष्कूयसे वसु ॥ ८ ००६ ४१
अस्माकं त्वा सुताँ उप वीतपृष्ठा अभि प्रयः ।

शतं वहन्तु हरयः ॥ ८ ००६ ४२
इमां सु पूर्व्यां धियम् मधोर् घृतस्य पिप्युषीम् ।
कण्वा उक्थेन वावृधुः ॥ ८ ००६ ४३
इन्द्रम् इद् विमहीनाम् मेधे वृणीत मर्त्यः ।
इन्द्रं सनिष्युर् ऊतये ॥ ८ ००६ ४४
अर्वाञ्चं त्वा पुरुष्टुत प्रियमेधस्तुता हरी ।
सोमपेयाय वक्षतः ॥ ८ ००६ ४५
शतम् अहं तिरिन्दिरे सहस्रम् पर्शाव् आ ददे ।
राधांसि याद्वानाम् ॥ ८ ००६ ४६
त्रीणि शतान्य् अर्वतां सहस्रा दश गोनाम् ।
ददुष् पज्राय साम्ने ॥ ८ ००६ ४७
उद् आनट् ककुहो दिवम् उष्ट्राञ् चतुर्युजो ददत् ।
श्रवसा याद्वं जनम् ॥ ८ ००६ ४८

(६२७)
प्र यद् वस् त्रिष्टुभम् इषम् मरुतो विप्रो अक्षरत् ।
वि पर्वतेषु राजथ ॥ ८ ००७ ०१
यद् अङ्ग तविषीयवो यामं शुभ्रा अचिध्वम् ।
नि पर्वता अहासत ॥ ८ ००७ ०२
उद् ईरयन्त वायुभिर् वाश्रासः पृश्निमातरः ।
धुक्षन्त पिप्युषीम् इषम् ॥ ८ ००७ ०३
वपन्ति मरुतो मिहम् प्र वेपयन्ति पर्वतान् ।
यद् यामं यान्ति वायुभिः ॥ ८ ००७ ०४
नि यद् यामाय वो गिरिर् नि सिन्धवो विधर्मणे ।
महे शुष्माय येमिरे ॥ ८ ००७ ०५
युष्मांऽउ नक्तम् ऊतये युष्मान् दिवा हवामहे ।

युष्मान् प्रयत्य् अध्वरे ॥ ८ ००७ ०६
उद् उ त्ये अरुणप्सवश् चित्रा यामेभिर् ईरते ।
वाश्रा अधि ष्णुना दिवः ॥ ८ ००७ ०७
सृजन्ति रश्मिम् ओजसा पन्थां सूर्याय यातवे ।
ते भानुभिर् वि तस्थिरे ॥ ८ ००७ ०८
इमाम् मे मरुतो गिरम् इमं स्तोमम् ऋभुक्षणः ।
इमम् मे वनता हवम् ॥ ८ ००७ ०९
त्रीणि सरांसि पृश्नयो दुदुह्रे वज्रिणे मधु ।
उत्सं कवन्धम् उद्रिणम् ॥ ८ ००७ १०
मरुतो यद् ध वो दिवः सुम्नायन्तो हवामहे ।
आ तू न उप गन्तन ॥ ८ ००७ ११
यूयं हि ष्ठा सुदानवो रुद्रा ऋभुक्षणो दमे ।
उत प्रचेतसो मदे ॥ ८ ००७ १२
आ नो रयिम् मदच्युतम् पुरुक्षुं विश्वधायसम् ।
इयर्ता मरुतो दिवः ॥ ८ ००७ १३
अधीव यद् गिरीणां यामं शुभ्रा अचिध्वम् ।
सुवानैर् मन्दध्व इन्दुभिः ॥ ८ ००७ १४
एतावतश् चिद् एषां सुम्नम् भिक्षेत मर्त्यः ।
अदाभ्यस्य मन्मभिः ॥ ८ ००७ १५
ये द्रप्सा इव रोदसी धमन्त्य् अनु वृष्टिभिः ।
उत्सं दुहन्तो अक्षितम् ॥ ८ ००७ १६
उद् उ स्वानेभिर् ईरत उद् रथैर् उद् उ वायुभिः ।
उत् स्तोमैः पृश्निमातरः ॥ ८ ००७ १७
येनाव तुर्वशं यदुं येन कण्वं धनस्पृतम् ।
राये सु तस्य धीमहि ॥ ८ ००७ १८
इमा उ वः सुदानवो घृतं न पिप्युषीर् इषः ।
वर्धान् काण्वस्य मन्मभिः ॥ ८ ००७ १९
क्व नूनं सुदानवो मदथा वृक्तबर्हिषः ।

ब्रह्मा को वः सपर्यति ॥ ८ ००७ २०
नहि ष्म यद् ध वः पुरा स्तोमेभिर् वृक्तबर्हिषः ।
शर्धाँ ऋतस्य जिन्वथ ॥ ८ ००७ २१
सम् उ त्ये महतीर् अपः सं क्षोणी सम् उ सूर्यम् ।
सं वज्रम् पर्वशो दधुः ॥ ८ ००७ २२
वि वृत्रम् पर्वशो ययुर् वि पर्वताँ अराजिनः ।
चक्राणा वृष्णि पौंस्यम् ॥ ८ ००७ २३
अनु त्रितस्य युध्यतः शुष्मम् आवन्न् उत क्रतुम् ।
अन्व् इन्द्रं वृत्रतूर्ये ॥ ८ ००७ २४
विद्युद्धस्ता अभिद्यवः शिप्राः शीर्षन् हिरण्ययीः ।
शुभ्रा व्य् अञ्जत श्रिये ॥ ८ ००७ २५
उशना यत् परावत उक्ष्णो रन्ध्रम् अयातन ।
द्यौर् न चक्रदद् भिया ॥ ८ ००७ २६
आ नो मखस्य दावने ऽश्वैर् हिरण्यपाणिभिः ।
देवास उप गन्तन ॥ ८ ००७ २७
यद् एषाम् पृषती रथे प्रष्टिर् वहति रोहितः ।
यान्ति शुभ्रा रिणन्न् अपः ॥ ८ ००७ २८
सुषोमे शर्यणावत्य् आर्जीके पस्त्यावति ।
ययुर् निचक्रया नरः ॥ ८ ००७ २९
कदा गच्छाथ मरुत इत्था विप्रं हवमानम् ।
मार्डीकेभिर् नाधमानम् ॥ ८ ००७ ३०
कद् ध नूनं कधप्रियो यद् इन्द्रम् अजहातन ।
को वः सखित्व ओहते ॥ ८ ००७ ३१
सहो षु णो वज्रहस्तैः कण्वासो अग्निम् मरुद्भिः ।
स्तुषे हिरण्यवाशीभिः ॥ ८ ००७ ३२
ओ षु वृष्णः प्रयज्यून् आ नव्यसे सुविताय ।
ववृत्यां चित्रवाजान् ॥ ८ ००७ ३३
गिरयश् चिन् नि जिहते पर्शानासो मन्यमानाः ।

पर्वताश् चिन् नि येमिरे ॥ ८ ००७ ३४
आक्ष्णयावानो वहन्त्य् अन्तरिक्षेण पततः ।
धातार स्तुवते वयः ॥ ८ ००७ ३५
अग्निर् हि जानि पूर्व्यश् छन्दो न सूरो अर्चिषा ।
ते भानुभिर् वि तस्थिरे ॥ ८ ००७ ३६

(६२८)
आ नो विश्वाभिर् ऊतिभिर् अश्विना गच्छतं युवम् ।
दस्रा हिरण्यवर्तनी पिबतं सोम्यम् मधु ॥ ८ ००८ ०१
आ नूनं यातम् अश्विना रथेन सूर्यत्वचा ।
भुजी हिरण्यपेशसा कवी गम्भीरचेतसा ॥ ८ ००८ ०२
आ यातं नहुषस् पर्य् आन्तरिक्षात् सुवृक्तिभिः ।
पिबाथो अश्विना मधु कण्वानां सवने सुतम् ॥ ८ ००८ ०३
आ नो यातं दिवस् पर्य् आन्तरिक्षाद् अधप्रिया ।
पुत्रः कण्वस्य वाम् इह सुषाव सोम्यम् मधु ॥ ८ ००८ ०४
आ नो यातम् उपश्रुत्य् अश्विना सोमपीतये ।
स्वाहा स्तोमस्य वर्धना प्र कवी धीतिभिर् नरा ॥ ८ ००८ ०५
यच् चिद् धि वाम् पुर ऋषयो जुहूरे ऽवसे नरा ।
आ यातम् अश्विना गतम् उपेमां सुष्टुतिम् मम ॥ ८ ००८ ०६
दिवश् चिद् रोचनाद् अध्य् आ नो गन्तं स्वर्विदा ।
धीभिर् वत्सप्रचेतसा स्तोमेभिर् हवनश्रुता ॥ ८ ००८ ०७
किम् अन्ये पर्य् आसते ऽस्मत् स्तोमेभिर् अश्विना ।
पुत्रः कण्वस्य वाम् ऋषिर् गीर्भिर् वत्सो अवीवृधत् ॥ ८ ००८ ०८
आ वां विप्र इहावसे ऽह्वत् स्तोमेभिर् अश्विना ।
अरिप्रा वृत्रहन्तमा ता नो भूतम् मयोभुवा ॥ ८ ००८ ०९
आ यद् वां योषणा रथम् अतिष्ठद् वाजिनीवसू ।
विश्वान्य् अश्विना युवम् प्र धीतान्य् अगच्छतम् ॥ ८ ००८ १०

अतः सहस्रनिर्णिजा रथेना यातम् अश्विना ।
वत्सो वाम् मधुमद् वचो ऽशंसीत् काव्यः कविः ॥ ८ ००८ ११
पुरुमन्द्रा पुरूवसू मनोतरा रयीणाम् ।
स्तोमम् मे अश्विनाव् इमम् अभि वह्नी अनूषाताम् ॥ ८ ००८ १२
आ नो विश्वान्य् अश्विना धत्तं राधांस्य् अह्रया ।
कृतं न ऋत्वियावतो मा नो रीरधतं निदे ॥ ८ ००८ १३
यन् नासत्या परावति यद् वा स्थो अध्य् अम्बरे ।
अतः सहस्रनिर्णिजा रथेना यातम् अश्विना ॥ ८ ००८ १४
यो वां नासत्याव् ऋषिर् गीर्भिर् वत्सो अवीवृधत् ।
तस्मै सहस्रनिर्णिजम् इषं धत्तं घृतश्चुतम् ॥ ८ ००८ १५
प्रास्मा ऊर्जं घृतश्चुतम् अश्विना यच्छतं युवम् ।
यो वां सुम्नाय तुष्टवद् वसूयाद् दानुनस् पती ॥ ८ ००८ १६
आ नो गन्तं रिशादसेमं स्तोमम् पुरुभुजा ।
कृतं नः सुश्रियो नरेमा दातम् अभिष्टये ॥ ८ ००८ १७
आ वां विश्वाभिर् ऊतिभिः प्रियमेधा अहूषत ।
राजन्ताव् अध्वराणाम् अश्विना यामहूतिषु ॥ ८ ००८ १८
आ नो गन्तम् मयोभुवा ऋश्विना शम्भुवा युवम् ।
यो वां विपन्यू धीतिभिर् गीर्भिर् वत्सो अवीवृधत् ॥ ८ ००८ १९
याभिः कण्वम् मेधातिथिं याभिर् वशं दशव्रजम् ।
याभिर् गोशर्यम् आवतं ताभिर् नो ऽवतं नरा ॥ ८ ००८ २०
याभिर् नरा त्रसदस्युम् आवतं कृत्व्ये धने ।
ताभिः ष्व् अ १ स्माँ अश्विना प्रावतं वाजसातये ॥ ८ ००८ २१
प्र वां स्तोमाः सुवृक्तयो गिरो वर्धन्त्व् अश्विना ।
पुरुत्रा वृत्रहन्तमा ता नो भूतम् पुरुस्पृहा ॥ ८ ००८ २२
त्रीणि पदान्य् अश्विनोर् आविः सान्ति गुहा परः ।
कवी ऋतस्य पत्मभिर् अर्वाग् जीवेभ्यस् परि ॥ ८ ००८ २३

(६२९)
आ नूनम् अश्विना युवं वत्सस्य गन्तम् अवसे ।
प्रास्मै यच्छतम् अवृकम् पृथु छर्दिर् युयुतं या अरातयः ॥ ८ ००९ ०१
यद् अन्तरिक्षे यद् दिवि यत् पञ्च मानुषाँ अनु ।
नृम्णं तद् धत्तम् अश्विना ॥ ८ ००९ ०२
ये वां दंसांस्य् अश्विना विप्रासः परिमामृशुः ।
एवेत् काण्वस्य बोधतम् ॥ ८ ००९ ०३
अयं वां घर्मो अश्विना स्तोमेन परि षिच्यते ।
अयं सोमो मधुमान् वाजिनीवसू येन वृत्रं चिकेतथः ॥ ८ ००९ ०४
यद् अप्सु यद् वनस्पतौ यद् ओषधीषु पुरुदंससा कृतम् ।
तेन माविष्टम् अश्विना ॥ ८ ००९ ०५
यन् नासत्या भुरण्यथो यद् वा देव भिषज्यथः ।
अयं वां वत्सो मतिभिर् न विन्धते हविष्मन्तं हि गच्छथः ॥ ८ ००९ ०६
आ नूनम् अश्विनोर् ऋषि स्तोमं चिकेत वामया ।
आ सोमम् मधुमत्तमं घर्मं सिञ्चाद् अथर्वणि ॥ ८ ००९ ०७
आ नूनं रघुवर्तनिं रथं तिष्ठाथो अश्विना ।
आ वां स्तोमा इमे मम नभो न चुच्यवीरत ॥ ८ ००९ ०८
यद् अद्य वां नासत्योक्थैर् आचुच्युवीमहि ।
यद् वा वाणीभिर् अश्विनेवेत् काण्वस्य बोधतम् ॥ ८ ००९ ०९
यद् वां कक्षीवाँ उत यद् व्यश्व ऋषिर् यद् वां दीर्घतमा जुहाव ।
पृथी यद् वां वैन्यः सादनेष्व् एवेद् अतो अश्विना चेतयेथाम् ॥ ८ ००९ १०
यातं छर्दिष्पा उत नः परस्पा भूतं जगत्पा उत नस् तनूपा ।
वर्तिस् तोकाय तनयाय यातम् ॥ ८ ००९ ११
यद् इन्द्रेण सरथं याथो अश्विना यद् वा वायुना भवथः समोकसा ।
यद् आदित्येभिर् ऋभुभिः सजोषसा यद् वा विष्णोर् विक्रमणेषु तिष्ठथः ॥ ८ ००९ १२
यद् अद्याश्विनाव् अहं हुवेय वाजसातये ।
यत् पृत्सु तुर्वणे सहस् तच् छ्रेष्ठम् अश्विनोर् अवः ॥ ८ ००९ १३
आ नूनं यातम् अश्विनेमा हव्यानि वां हिता ।

इ॒मे सोमा॑सो॒ अधि॑ तु॒र्वशे॒ यदा॑व् इ॒मे कण्वे॑षु वा॒म् अथ॑ ॥ ८ ००९ १४
यन् ना॑सत्या परा॒के अ॑र्वा॒कि अस्ति॑ भेष॒जम् ।
तेन॑ नू॒नं वि॑म॒दाय॑ प्रचेतसा छ॒र्दिर् व॒त्साय॑ यच्छतम् ॥ ८ ००९ १५
अभु॑त्स्य् उ॒ प्र दे॒व्या सा॒कं वा॒चाहम् अ॒श्विनोः॑ ।
व्य् आव॒र् दे॒व्य् आ म॒तिं वि रा॒तिम् मर्त्ये॑भ्यः ॥ ८ ००९ १६
प्र बो॑धयोषो अ॒श्विना॒ प्र दे॑वि सूनृते महि ।
प्र य॑ज्ञहोतर् आनु॒षक् प्र मदा॑य॒ श्रवो॑ बृ॒हत् ॥ ८ ००९ १७
यद् उ॑षो॒ यासि॑ भा॒नुना॒ सं सूर्ये॑ण रोचसे ।
आ हा॒यम् अ॒श्विनो॒ रथो॑ व॒र्तिर् या॑ति नृ॒पाय्य॑म् ॥ ८ ००९ १८
यद् आपी॑तासो अं॒शवो॒ गावो॒ न दु॒ह्र ऊध॑भिः ।
यद् वा॒ वाणी॒र् अनू॑षत॒ प्र दे॑व॒यन्तो॑ अ॒श्विना॑ ॥ ८ ००९ १९
प्र द्यु॒म्नाय॒ प्र शव॑से॒ प्र नृ॒षाह्या॑य॒ शर्म॑णे ।
प्र दक्षा॑य प्रचेतसा ॥ ८ ००९ २०
यन् नू॒नं धी॒भिर् अ॑श्विना पि॒तुर् योना॑ नि॒षीद॑थः ।
यद् वा॑ सु॒म्नेभि॑र् उक्थ्या ॥ ८ ००९ २१

(६३०)
यत् स्थो दी॒र्घप्र॑सद्मनि॒ यद् वा॒दो रो॑च॒ने दि॒वः ।
यद् वा॑ समु॒द्रे अध्य् आकृ॑ते गृ॒हे ऽत॒ आ या॑तम् अश्विना ॥ ८ ०१० ०१
यद् वा॑ य॒ज्ञम् मन॑वे सम्मिमि॒क्षथु॑र् ए॒वेत् का॒ण्वस्य॑ बोधतम् ।
बृह॒स्पतिं॒ विश्वा॑न् दे॒वाँ अ॒हं हु॑व॒ इन्द्रा॒विष्णू॑ अ॒श्विना॑व् आशु॒हेष॑सा ॥ ८ ०१० ०२
त्या न्व् अ॒श्विना॑ हुवे सु॒दंस॑सा गृ॒भे कृ॒ता ।
यया॒ेर् अस्ति॒ प्र णः॑ स॒ख्यं दे॒वेष्व् अध्य् आप्य॑म् ॥ ८ ०१० ०३
यया॒ेर् अधि॒ प्र य॒ज्ञा अ॑सू॒रे सन्ति॑ सू॒रयः॑ ।
ता य॒ज्ञस्या॑ध्व॒रस्य॒ प्रचे॑तसा स्व॒धाभि॒र् या पिब॑तः सो॒म्यम् मधु॑ ॥ ८ ०१० ०४
यद् अ॒द्याश्वि॑ना॒व् अपा॒ग् यत् प्राक् स्थो वा॑जिनीवसू ।
यद् द्रु॒ह्यव्य् अन॑वि तु॒र्वशे॒ यदौ॑ हु॒वे वा॒म् अथ॒ मा ग॑तम् ॥ ८ ०१० ०५

यद् अन्तरिक्षे पतथः पुरुभुजा यद् वेमे रोदसी अनु ।
यद् वा स्वधाभिर् अधितिष्ठथो रथम् अत आ यातम् अश्विना ॥ ८ ०१० ०६

(६३१)
त्वम् अग्ने व्रतपा असि देव आ मर्त्येष्व् आ ।
त्वं यज्ञेष्व् ईड्यः ॥ ८ ०११ ०१
त्वम् असि प्रशस्यो विदथेषु सहन्त्य ।
अग्ने रथीर् अध्वराणाम् ॥ ८ ०११ ०२
स त्वम् अस्मद् अप द्विषो युयोधि जातवेदः ।
अदेवीर् अग्ने अरातीः ॥ ८ ०११ ०३
अन्ति चित् सन्तम् अह यज्ञम् मर्तस्य रिपोः ।
नोप वेषि जातवेदः ॥ ८ ०११ ०४
मर्ता अमर्त्यस्य ते भूरि नाम मनामहे ।
विप्रासो जातवेदसः ॥ ८ ०११ ०५
विप्रं विप्रासो ऽवसे देवम् मर्तास ऊतये ।
अग्निं गीर्भिर् हवामहे ॥ ८ ०११ ०६
आ ते वत्सो मनो यमत् परमाच् चित् सधस्थात् ।
अग्ने त्वांकामया गिरा ॥ ८ ०११ ०७
पुरुत्रा हि सदृङ्ङ् असि विशो विश्वा अनु प्रभुः ।
समत्सु त्वा हवामहे ॥ ८ ०११ ०८
समत्स्व् अग्निम् अवसे वाजयन्तो हवामहे ।
वाजेषु चित्रराधसम् ॥ ८ ०११ ०९
प्रत्नो हि कम् ईड्यो अध्वरेषु सनाच् च होता नव्यश् च सत्सि ।
स्वां चाग्ने तन्वम् पिप्रयस्वास्मभ्यं च सौभगम् आ यजस्व ॥ ८ ०११ १०

(६३२)

य इन्द्र सोमपातमो मदः शविष्ठ चेतति ।
येना हंसि न्य् अ १ त्रिणं तम् ईमहे ॥ ८ ०१२ ०१
येना दशग्वम् अध्रिगुं वेपयन्तं स्वर्णरम् ।
येना समुद्रम् आविथा तम् ईमहे ॥ ८ ०१२ ०२
येन सिन्धुम् महीर् अपो रथाँइव प्रचोदयः ।
पन्थाम् ऋतस्य यातवे तम् ईमहे ॥ ८ ०१२ ०३
इमं स्तोमम् अभिष्टये घृतं न पूतम् अद्रिवः ।
येना नु सद्य ओजसा ववक्षिथ ॥ ८ ०१२ ०४
इमं जुषस्व गिर्वणः समुद्र इव पिन्वते ।
इन्द्र विश्वाभिर् ऊतिभिर् ववक्षिथ ॥ ८ ०१२ ०५
यो नो देवः परावतः सखित्वनाय मामहे ।
दिवो न वृष्टिम् प्रथयन् ववक्षिथ ॥ ८ ०१२ ०६
ववक्षुर् अस्य केतवो उत वज्रो गभस्त्योः ।
यत् सूर्यो न रोदसी अवर्धयत् ॥ ८ ०१२ ०७
यदि प्रवृद्ध सत्पते सहस्रम् महिषाँ अघः ।
आद् इत् त इन्द्रियम् महि प्र वावृधे ॥ ८ ०१२ ०८
इन्द्रः सूर्यस्य रश्मिभिर् न्य् अर्शसानम् ओषति ।
अग्निर् वनेव सासहिः प्र वावृधे ॥ ८ ०१२ ०९
इयं त ऋत्वियावती धीतिर् एति नवीयसी ।
सपर्यन्ती पुरुप्रिया मिमीत इत् ॥ ८ ०१२ १०
गर्भो यज्ञस्य देवयुः क्रतुम् पुनीत आनुषक् ।
स्तोमैर् इन्द्रस्य वावृधे मिमीत इत् ॥ ८ ०१२ ११
सनिर् मित्रस्य पप्रथ इन्द्रः सोमस्य पीतये ।
प्राची वाशीव सुन्वते मिमीत इत् ॥ ८ ०१२ १२
यं विप्रा उक्थवाहसो ऽभिप्रमन्दुर् आयवः ।
घृतं न पिप्य आसन्य् ऋतस्य यत् ॥ ८ ०१२ १३
उत स्वराजे अदिति स्तोमम् इन्द्राय जीजनत् ।
पुरुप्रशस्तम् ऊतय ऋतस्य यत् ॥ ८ ०१२ १४

अभि वह्नय ऊतये ऽनूषत प्रशस्तये ।
न देव विव्रता हरी ऋतस्य यत् ॥ ८ ०१२ १५
यत् सोमम् इन्द्र विष्णवि यद् वा घ त्रित आप्त्ये ।
यद् वा मरुत्सु मन्दसे सम् इन्दुभिः ॥ ८ ०१२ १६
यद् वा शक्र परावति समुद्रे अधि मन्दसे ।
अस्माकम् इत् सुते रणा सम् इन्दुभिः ॥ ८ ०१२ १७
यद् वासि सुन्वतो वृधो यजमानस्य सत्पते ।
उक्थे वा यस्य रण्यसि सम् इन्दुभिः ॥ ८ ०१२ १८
देवं-देवं वो ऽवस इन्द्रम्-इन्द्रं गृणीषणि ।
अधा यज्ञाय तुर्वणे व्य् आनशुः ॥ ८ ०१२ १९
यज्ञेभिर् यज्ञवाहसं सोमेभिः सोमपातमम् ।
होत्राभिर् इन्द्रं वावृधुर् व्य् आनशुः ॥ ८ ०१२ २०
महीर् अस्य प्रणीतयः पूर्वीर् उत प्रशस्तयः ।
विश्वा वसूनि दाशुषे व्य् आनशुः ॥ ८ ०१२ २१
इन्द्रं वृत्राय हन्तवे देवासो दधिरे पुरः ।
इन्द्रं वाणीर् अनूषता सम् ओजसे ॥ ८ ०१२ २२
महान्तम् महिना वयं स्तोमेभिर् हवनश्रुतम् ।
अर्कैर् अभि प्र णोनुमः सम् ओजसे ॥ ८ ०१२ २३
न यं विविक्तो रोदसी नान्तरिक्षाणि वज्रिणम् ।
अमाद् इद् अस्य तित्विषे सम् ओजसः ॥ ८ ०१२ २४
यद् इन्द्र पृतनाज्ये देवास् त्वा दधिरे पुरः ।
आद् इत् ते हर्यता हरी ववक्षतुः ॥ ८ ०१२ २५
यदा वृत्रं नदीवृतं शवसा वज्रिन्न् अवधीः ।
आद् इत् ते हर्यता हरी ववक्षतुः ॥ ८ ०१२ २६
यदा ते विष्णुर् ओजसा त्रीणि पदा विचक्रमे ।
आद् इत् ते हर्यता हरी ववक्षतुः ॥ ८ ०१२ २७
यदा ते हर्यता हरी वावृधाते दिवे-दिवे ।
आद् इत् ते विश्वा भुवनानि येमिरे ॥ ८ ०१२ २८

यदा ते मारुतीर् विशस् तुभ्यम् इन्द्र नियेमिरे ।
आद् इत् ते विश्वा भुवनानि येमिरे ॥ ८ ०१२ २९
यदा सूर्यम् अमुं दिवि शुक्रं ज्योतिर् अधारयः ।
आद् इत् ते विश्वा भुवनानि येमिरे ॥ ८ ०१२ ३०
इमां त इन्द्र सुष्टुतिं विप्र इयर्ति धीतिभिः ।
जामिम् पदेव पिप्रतीम् प्राध्वरे ॥ ८ ०१२ ३१
यद् अस्य धामनि प्रिये समीचीनासो अस्वरन् ।
नाभा यज्ञस्य दोहना प्राध्वरे ॥ ८ ०१२ ३२
सुवीर्यं स्वश्व्यं सुगव्यम् इन्द्र दद्धि नः ।
होतेव पूर्वचित्तये प्राध्वरे ॥ ८ ०१२ ३३

(६३३)
इन्द्रः सुतेषु सोमेषु क्रतुम् पुनीत उक्थ्यम् ।
विदे वृधस्य दक्षसो महान् हि षः ॥ ८ ०१३ ०१
स प्रथमे व्योमनि देवानां सदने वृधः ।
सुपारः सुश्रवस्तमः सम् अप्सुजित् ॥ ८ ०१३ ०२
तम् अह्वे वाजसातय इन्द्रम् भराय शुष्मिणम् ।
भवा नः सुम्ने अन्तमः सखा वृधे ॥ ८ ०१३ ०३
इयं त इन्द्र गिर्वणो रातिः क्षरति सुन्वतः ।
मन्दानो अस्य बर्हिषो वि राजसि ॥ ८ ०१३ ०४
नूनं तद् इन्द्र दद्धि नो यत् त्वा सुन्वन्त ईमहे ।
रयिं नश् चित्रम् आ भरा स्वर्विदम् ॥ ८ ०१३ ०५
स्तोता यत् ते विचर्षणिर् अतिप्रशर्धयद् गिरः ।
वया इवानु रोहते जुषन्त यत् ॥ ८ ०१३ ०६
प्रत्नवज् जनया गिरः शृणुधी जरितुर् हवम् ।
मदे-मदे ववक्षिथा सुकृत्वने ॥ ८ ०१३ ०७
क्रीळन्त्य् अस्य सूनृता आपो न प्रवता यतीः ।

अया धिया य उच्यते पतिर् दिवः ॥ ८ ०१३ ०८
उतो पतिर् य उच्यते कृष्टीनाम् एक इद् वशी ।
नमोवृधैर् अवस्युभिः सुते रण ॥ ८ ०१३ ०९
स्तुहि श्रुतं विपश्चितं हरी यस्य प्रसक्षिणा ।
गन्तारा दाशुषो गृहं नमस्विनः ॥ ८ ०१३ १०
तूतुजानो महेमते ऽश्वेभिः प्रुषितप्सुभिः ।
आ याहि यज्ञम् आशुभिः शम् इद् धि ते ॥ ८ ०१३ ११
इन्द्र शविष्ठ सत्पते रयिं गृणत्सु धारय ।
श्रवः सूरिभ्यो अमृतं वसुत्वनम् ॥ ८ ०१३ १२
हवे त्वा सूर उदिते हवे मध्यंदिने दिवः ।
जुषाण इन्द्र सप्तिभिर् न आ गहि ॥ ८ ०१३ १३
आ तू गहि प्र तु द्रव मत्स्वा सुतस्य गोमतः ।
तन्तुं तनुष्व पूर्व्यं यथा विदे ॥ ८ ०१३ १४
यच् छक्रासि परावति यद् अर्वावति वृत्रहन् ।
यद् वा समुद्रे अन्धसो ऽवितेद् असि ॥ ८ ०१३ १५
इन्द्रं वर्धन्तु नो गिर इन्द्रं सुतास इन्दवः ।
इन्द्रे हविष्मतीर् विशो अराणिषुः ॥ ८ ०१३ १६
तम् इद् विप्रा अवस्यवः प्रवत्वतीभिर् ऊतिभिः ।
इन्द्रं क्षोणीर् अवर्धयन् वया इव ॥ ८ ०१३ १७
त्रिकद्रुकेषु चेतनं देवासो यज्ञम् अत्नत ।
तम् इद् वर्धन्तु नो गिरः सदावृधम् ॥ ८ ०१३ १८
स्तोता यत् ते अनुव्रत उक्थान्य् ऋतुथा दधे ।
शुचिः पावक उच्यते सो अद्भुतः ॥ ८ ०१३ १९
तद् इद् रुद्रस्य चेतति यह्वम् प्रत्नेषु धामसु ।
मनो यत्रा वि तद् दधुर् विचेतसः ॥ ८ ०१३ २०
यदि मे सख्यम् आवर इमस्य पाह्य् अन्धसः ।
येन विश्वा अति द्विषो अतारिम ॥ ८ ०१३ २१
कदा त इन्द्र गिर्वण स्तोता भवाति शंतमः ।

कदा नो गव्ये अश्व्ये वसौ दधः ॥ ८ ०१३ २२
उत ते सुष्टुता हरी वृषणा वहतो रथम् ।
अजुर्यस्य मदिन्तमं यम् ईमहे ॥ ८ ०१३ २३
तम् ईमहे पुरुष्टुतं यह्वम् प्रत्नाभिर् ऊतिभिः ।
नि बर्हिषि प्रिये सदद् अध द्विता ॥ ८ ०१३ २४
वर्धस्वा सु पुरुष्टुत ऋषिष्टुताभिर् ऊतिभिः ।
धुक्षस्व पिप्युषीम् इषम् अवा च नः ॥ ८ ०१३ २५
इन्द्र त्वम् अवितेद् असीत्था स्तुवतो अद्रिवः ।
ऋताद् इयर्मि ते धियम् मनोयुजम् ॥ ८ ०१३ २६
इह त्या सधमाद्या युजानः सोमपीतये ।
हरी इन्द्र प्रतद्वसू अभि स्वर ॥ ८ ०१३ २७
अभि स्वरन्तु ये तव रुद्रासः सक्षत श्रियम् ।
उतो मरुत्वतीर् विशो अभि प्रयः ॥ ८ ०१३ २८
इमा अस्य प्रतूर्तयः पदं जुषन्त यद् दिवि ।
नाभा यज्ञस्य सं दधुर् यथा विदे ॥ ८ ०१३ २९
अयं दीर्घाय चक्षसे प्राचि प्रयत्य् अध्वरे ।
मिमीते यज्ञम् आनुषग् विचक्ष्य ॥ ८ ०१३ ३०
वृषायम् इन्द्र ते रथ उतो ते वृषणा हरी ।
वृषा त्वं शतक्रतो वृषा हवः ॥ ८ ०१३ ३१
वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः ।
वृषा यज्ञो यम् इन्वसि वृषा हवः ॥ ८ ०१३ ३२
वृषा त्वा वृषणं हुवे वज्रिञ् चित्राभिर् ऊतिभिः ।
वावन्थ हि प्रतिष्टुतिं वृषा हवः ॥ ८ ०१३ ३३

(६३४)
यद् इन्द्राहं यथा त्वम् ईशीय वस्व एक इत् ।
स्तोता मे गोषखा स्यात् ॥ ८ ०१४ ०१

शिक्षेयम् अस्मै दित्सेयं शचीपते मनीषिणे ।
यद् अहं गोपतिः स्याम् ॥ ८ ०१४ ०२
धेनुष् ट इन्द्र सूनृता यजमानाय सुन्वते ।
गाम् अश्वम् पिप्युषी दुहे ॥ ८ ०१४ ०३
न ते वर्तास्ति राधस इन्द्र देवो न मर्त्यः ।
यद् दित्ससि स्तुतो मघम् ॥ ८ ०१४ ०४
यज्ञ इन्द्रम् अवर्धयद् यद् भूमिं व्य् अवर्तयत् ।
चक्राण ओपशं दिवि ॥ ८ ०१४ ०५
वावृधानस्य ते वयं विश्वा धनानि जिग्युषः ।
ऊतिम् इन्द्रा वृणीमहे ॥ ८ ०१४ ०६
व्य् अ१न्तरिक्षम् अतिरन् मदे सोमस्य रोचना ।
इन्द्रो यद् अभिनद् वलम् ॥ ८ ०१४ ०७
उद् गा आजद् अङ्गिरोभ्य आविष् कृण्वन् गुहा सतीः ।
अर्वाञ्चं नुनुदे वलम् ॥ ८ ०१४ ०८
इन्द्रेण रोचना दिवो दृळ्हानि दृंहितानि च ।
स्थिराणि न पराणुदे ॥ ८ ०१४ ०९
अपाम् ऊर्मिर् मदन्न् इव स्तोम इन्द्राजिरायते ।
वि ते मदा अराजिषुः ॥ ८ ०१४ १०
त्वं हि स्तोमवर्धन इन्द्रास्य् उक्थवर्धनः ।
स्तोतॄणाम् उत भद्रकृत् ॥ ८ ०१४ ११
इन्द्रम् इत् केशिना हरी सोमपेयाय वक्षतः ।
उप यज्ञं सुराधसम् ॥ ८ ०१४ १२
अपाम् फेनेन नमुचेः शिर इन्द्रोद् अवर्तयः ।
विश्वा यद् अजय स्पृधः ॥ ८ ०१४ १३
मायाभिर् उत्सिसृप्सत इन्द्र द्याम् आरुरुक्षतः ।
अव दस्यूँर् अधूनुथाः ॥ ८ ०१४ १४
असुन्वाम् इन्द्र संसदं विषूचीं व्य् अनाशयः ।
सोमपा उत्तरो भवन् ॥ ८ ०१४ १५

(६३५)
तम् व् अभि प्र गायत पुरुहूतम् पुरुष्टुतम् ।
इन्द्रं गीर्भिस् तविषम् आ विवासत ॥ ८ ०१५ ०१
यस्य द्विबर्हसो बृहत् सहो दाधार रोदसी ।
गिरीꣳ अज्राꣳ अपः स्वर् वृषत्वना ॥ ८ ०१५ ०२
स राजसि पुरुष्टुतꣳ एको वृत्राणि जिघ्नसे ।
इन्द्र जैत्रा श्रवस्या च यन्तवे ॥ ८ ०१५ ०३
तं ते मदं गृणीमसि वृषणम् पृत्सु सासहिम् ।
उलोककृत्नुम् अद्रिवो हरिश्रियम् ॥ ८ ०१५ ०४
येन ज्योतींष्य् आयवे मनवे च विवेदिथ ।
मन्दानो अस्य बर्हिषो वि राजसि ॥ ८ ०१५ ०५
तद् अद्या चित् त उक्थिनो ऽनु ष्टुवन्ति पूर्वथा ।
वृषपत्नीर् अपो जया दिवे-दिवे ॥ ८ ०१५ ०६
तव त्यद् इन्द्रियम् बृहत् तव शुष्मम् उत क्रतुम् ।
वज्रं शिशाति धिषणा वरेण्यम् ॥ ८ ०१५ ०७
तव द्यौर् इन्द्र पौंस्यम् पृथिवी वर्धति श्रवः ।
त्वाम् आपः पर्वतासश् च हिन्विरे ॥ ८ ०१५ ०८
त्वां विष्णुर् बृहन् क्षयो मित्रो गृणाति वरुणः ।
त्वां शर्धो मदत्य् अनु मारुतम् ॥ ८ ०१५ ०९
त्वं वृषा जनानाम् मंहिष्ठ इन्द्र जज्ञिषे ।
सत्रा विश्वा स्वपत्यानि दधिषे ॥ ८ ०१५ १०
सत्रा त्वम् पुरुष्टुतꣳ एको वृत्राणि तोशसे ।
नान्य इन्द्रात् करणम् भूय इन्वति ॥ ८ ०१५ ११
यद् इन्द्र मन्मशस् त्वा नाना हवन्त ऊतये ।
अस्माकेभिर् नृभिर् अत्रा स्वर् जय ॥ ८ ०१५ १२
अरं क्षयाय नो महे विश्वा रूपाण्य् आविशन् ।

इन्द्रं जैत्राय हर्षया शचीपतिम् ॥ ८ ०१५ १३

(६३६)
प्र सम्राजं चर्षणीनाम् इन्द्रं स्तोता नव्यं गीर्भिः ।
नरं नृषाहम् मंहिष्ठम् ॥ ८ ०१६ ०१
यस्मिन्न् उक्थानि रण्यन्ति विश्वानि च श्रवस्या ।
अपाम् अवो न समुद्रे ॥ ८ ०१६ ०२
तं सुष्टुत्या विवासे ज्येष्ठराजम् भरे कृत्नुम् ।
महो वाजिनं सनिभ्यः ॥ ८ ०१६ ०३
यस्यानूना गभीरा मदा उरवस् तरुत्राः ।
हर्षुमन्तः शूरसातौ ॥ ८ ०१६ ०४
तम् इद् धनेषु हितेष्व् अधिवाकाय हवन्ते ।
येषाम् इन्द्रस् ते जयन्ति ॥ ८ ०१६ ०५
तम् इच् च्यौत्नैर् आर्यन्ति तं कृतेभिश् चर्षणयः ।
एष इन्द्रो वरिवस्कृत् ॥ ८ ०१६ ०६
इन्द्रो ब्रह्मेन्द्र ऋषिर् इन्द्रः पुरू पुरुहूतः ।
महान् महीभिः शचीभिः ॥ ८ ०१६ ०७
स स्तोम्यः स हव्यः सत्यः सत्वा तुविकूर्मिः ।
एकश् चित् सन्न् अभिभूतिः ॥ ८ ०१६ ०८
तम् अर्केभिस् तं सामभिस् तं गायत्रैश् चर्षणयः ।
इन्द्रं वर्धन्ति क्षितयः ॥ ८ ०१६ ०९
प्रणेतारं वस्यो अच्छा कर्तारं ज्योतिः समत्सु ।
सासह्वांसं युधामित्रान् ॥ ८ ०१६ १०
स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः ।
इन्द्रो विश्वा अति द्विषः ॥ ८ ०१६ ११
स त्वं न इन्द्र वाजेभिर् दशस्या च गातुया च ।
अच्छा च नः सुम्नं नेषि ॥ ८ ०१६ १२

(६३७)
आ या॑हि सुषु॒मा हि त॒ इन्द्र॒ सोम॒म् पिबा॑ इ॒मम् ।
एदम् ब॒र्हिः स॑दो॒ मम॑ ॥ ८ ०१७ ०१
आ त्वा॑ ब्रह्म॒युजा॒ हरी॒ वह॑ताम् इन्द्र के॒शिना॑ ।
उप॒ ब्रह्मा॑णि नः शृणु ॥ ८ ०१७ ०२
ब्र॒ह्माण॑स् त्वा व॒यं यु॒जा सो॑म॒पाम् इ॑न्द्र सो॒मिनः॑ ।
सु॒ताव॑न्तो हवामहे ॥ ८ ०१७ ०३
आ नो॑ याहि सु॒ताव॑तो ऽ॒स्माक॑ सुष्टु॒तीर् उप॑ ।
पिबा॒ सु शि॑प्रि॒न्न् अन्ध॑सः ॥ ८ ०१७ ०४
आ ते॑ सिञ्चामि कु॒क्ष्योर् अनु॒ गात्रा॒ वि धा॑वतु ।
गृ॒भाय जि॒ह्वया॒ मधु॑ ॥ ८ ०१७ ०५
स्वा॒दुष् टे॑ अस्तु सं॒सुदे॒ मधु॑मान् त॒न्वे॒ उ॑ तव॑ ।
सोमः॒ शम् अ॑स्तु ते हृ॒दे ॥ ८ ०१७ ०६
अ॒यम् उ॑ त्वा विचर्षणे॒ जनी॑र् इवा॒भि संवृ॑तः ।
प्र सोम॑ इन्द्र सर्पतु ॥ ८ ०१७ ०७
तु॒वि॒ग्रीवो॑ व॒पोद॑रः सुबा॒हुर् अन्ध॑सो॒ मदे॑ ।
इन्द्रो॑ वृ॒त्राणि॑ जिघ्नते ॥ ८ ०१७ ०८
इन्द्र॒ प्रेहि॑ पु॒रस् त्वं विश्व॒स्येशा॑न॒ ओज॑सा ।
वृ॒त्राणि॑ वृत्रहञ् जहि ॥ ८ ०१७ ०९
दी॒र्घस् ते॑ अस्त्व् अङ्कु॒शो येना॒ वसु॑ प्र॒यच्छ॑सि ।
यज॑मानाय सु॒न्वते ॥ ८ ०१७ १०
अ॒यं त॑ इन्द्र॒ सोमो॒ निपू॑तो॒ अधि॑ ब॒र्हिषि॑ ।
एही॑म् अ॒स्य द्रवा॒ पिब॑ ॥ ८ ०१७ ११
शाचि॑गो॒ शाचि॑पूजना॒यं रणा॑य ते सुतः ।
आख॑ण्डल॒ प्र हू॑यसे ॥ ८ ०१७ १२
यस् ते॑ शृङ्गवृषो नपा॒त् प्रण॑पात् कुण्ड॒पाय्यः॑ ।

न्य् अस्मिन् दध्र॒ आ मनः॑ ॥ ८ ०१७ १३
वास्तो॑ष् पते ध्रु॒वा स्थूणांस॑त्रं सो॒म्याना॑म् ।
द्र॒प्सो भे॒त्ता पु॒रां शश्व॑तीना॒म् इन्द्रो॒ मुनी॑नां॒ सखा॑ ॥ ८ ०१७ १४
पृदा॑कुसानुर् यज॒तो ग॒वेष॑ण॒ एकः॒ सन्न् अ॒भि भूय॑सः ।
भूर्णि॒म् अश्वं॑ नयत् तु॒जा पु॒रो गृ॒भेन्द्रं॒ सोम॑स्य पी॒तये॑ ॥ ८ ०१७ १५

(६३८)
इ॒दं ह॑ नू॒नम् ए॑षां सु॒म्नम् भि॑क्षेत॒ मर्त्यः॑ ।
आ॒दि॒त्याना॒म् अपू॑र्व्यं॒ सवी॑मनि ॥ ८ ०१८ ०१
अ॒न॒र्वाणो॒ ह्य॒ ए॑षा॒म् पन्था॑ आदि॒त्याना॑म् ।
अद॑ब्धाः॒ सन्ति॑ पा॒यवः॑ सुगे॒वृधः॑ ॥ ८ ०१८ ०२
तत् सु नः॑ सवि॒ता भगो॒ वरु॑णो मि॒त्रो अ॑र्य॒मा ।
शर्म॑ यच्छन्तु स॒प्रथो॒ यद् ईम॑हे ॥ ८ ०१८ ०३
दे॒वेभि॑र् देव्य् अदि॒तेऽरि॑ष्टभर्म॒न्न् आ ग॑हि ।
स्मत् सू॒रिभिः॑ पुरुप्रिये सु॒शर्म॑भिः ॥ ८ ०१८ ०४
ते हि पु॒त्रासो॒ अदि॑तेर् वि॒दुर् द्वेषां॑सि॒ योत॑वे ।
अं॒होश् चि॑द् उरु॒चक्र॑यो ऽने॒हसः॑ ॥ ८ ०१८ ०५
अदि॑तिर् नो॒ दिवा॑ प॒शुम् अदि॑ति॒र् नक्त॒म् अद्व॑याः ।
अदि॑तिः पा॒त्व् अंह॑सः स॒दावृ॑धा ॥ ८ ०१८ ०६
उ॒त स्या नो॒ दिवा॑ म॒तिर् अदि॑तिर् ऊ॒त्या ग॑मत् ।
सा शंता॑ति॒ मय॑स् क॒रद् अप॒ स्रिधः॑ ॥ ८ ०१८ ०७
उ॒त त्या दैव्या॑ भि॒षजा॒ शं नः॑ करतो अ॒श्विना॑ ।
यु॒यु॒याता॑म् इ॒तो रपो॒ अप॒ स्रिधः॑ ॥ ८ ०१८ ०८
शम् अ॒ग्निर् अ॒ग्निभिः॑ कर॒च् छं न॑स् तपतु॒ सूर्यः॑ ।
शं वातो॑ वात्व् अर॒पा अप॒ स्रिधः॑ ॥ ८ ०१८ ०९
अपामी॑वा॒म् अप॒ स्रिध॒म् अप॑ सेधत दु॒र्मति॑म् ।
आदि॑त्यासो यु॒योत॑ना नो॒ अंह॑सः ॥ ८ ०१८ १०

युयोता शरुम् अस्मद् आँ आदित्यास उतामतिम् ।
ऋधग् द्वेषः कृणुत विश्ववेदसः ॥ ८ ०१८ ११
तत् सु नः शर्म यच्छतादित्या यन् मुमोचति ।
एनस्वन्तं चिद् एनसः सुदानवः ॥ ८ ०१८ १२
यो नः कश् चिद् रिरिक्षति रक्षस्त्वेन मर्त्यः ।
स्वैः ष एवै रिरिषीष्ट युर् जनः ॥ ८ ०१८ १३
सम् इत् तम् अघम् अश्नवद् दुःशंसम् मर्त्यं रिपुम् ।
यो अस्मत्रा दुर्हणावाँ उप द्वयुः ॥ ८ ०१८ १४
पाकत्रा स्थन देवा हृत्सु जानीथ मर्त्यम् ।
उप द्वयुं चाद्वयुं च वसवः ॥ ८ ०१८ १५
आ शर्म पर्वतानाम् ओतापां वृणीमहे ।
द्यावाक्षामारे अस्मद् रपस् कृतम् ॥ ८ ०१८ १६
ते नो भद्रेण शर्मणा युष्माकं नावा वसवः ।
अति विश्वानि दुरिता पिपर्तन ॥ ८ ०१८ १७
तुचे तनाय तत् सु नो द्राघीय आयुर् जीवसे ।
आदित्यासः सुमहसः कृणोतन ॥ ८ ०१८ १८
यज्ञो हीळो वो अन्तर आदित्या अस्ति मृळत ।
युष्मे इद् वो अपि ष्मसि सजात्ये ॥ ८ ०१८ १९
बृहद् वरूथम् मरुतां देवं त्रातारम् अश्विना ।
मित्रम् ईमहे वरुणं स्वस्तये ॥ ८ ०१८ २०
अनेहो मित्रार्यमन् नृवद् वरुण शंस्यम् ।
त्रिवरूथम् मरुतो यन्त नश् छर्दिः ॥ ८ ०१८ २१
ये चिद् धि मृत्युबन्धव आदित्या मनवः स्मसि ।
प्र सू न आयुर् जीवसे तिरेतन ॥ ८ ०१८ २२

(६३९)
तं गूर्धया स्वर्णरं देवासो देवम् अरतिं दधन्विरे ।

देवत्रा हव्यम् ओहिरे ॥ ८ ०१९ ०१
विभूतरातिं विप्र चित्रशोचिषम् अग्निम् ईळिष्व यन्तुरम् ।
अस्य मेधस्य सोम्यस्य सोभरे प्रेम् अध्वराय पूर्व्यम् ॥ ८ ०१९ ०२
यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारम् अमर्त्यम् ।
अस्य यज्ञस्य सुक्रतुम् ॥ ८ ०१९ ०३
ऊर्जो नपातं सुभगं सुदीदितिम् अग्निं श्रेष्ठशोचिषम् ।
स नो मित्रस्य वरुणस्य सो अपाम् आ सुम्नं यक्षते दिवि ॥ ८ ०१९ ०४
यः समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये ।
यो नमसा स्वध्वरः ॥ ८ ०१९ ०५
तस्येद् अर्वन्तो रंहयन्त आशवस् तस्य द्युम्नितमं यशः ।
न तम् अंहो देवकृतं कुतश् चन न मर्त्यकृतं नशत् ॥ ८ ०१९ ०६
स्वग्नयो वो अग्निभिः स्याम सूनो सहस ऊर्जाम् पते ।
सुवीरस् त्वम् अस्मयुः ॥ ८ ०१९ ०७
प्रशंसमानो अतिथिर् न मित्रियो ऽग्नी रथो न वेद्यः ।
त्वे क्षेमासो अपि सन्ति साधवस् त्वं राजा रयीणाम् ॥ ८ ०१९ ०८
सो अद्धा दाश्वध्वरो ऽग्ने मर्तः सुभग स प्रशंस्यः ।
स धीभिर् अस्तु सनिता ॥ ८ ०१९ ०९
यस्य त्वम् ऊर्ध्वो अध्वराय तिष्ठसि क्षयद्वीरः स साधते ।
सो अर्वद्भिः सनिता स विपन्युभिः स शूरैः सनिता कृतम् ॥ ८ ०१९ १०
यस्याग्निर् वपुर् गृहे स्तोमं चनो दधीत विश्ववार्यः ।
हव्या वा वेविषद् विषः ॥ ८ ०१९ ११
विप्रस्य वा स्तुवतः सहसो यहो मक्षूतमस्य रातिषु ।
अवोदेवम् उपरिमर्त्यं कृधि वसो विविदुषो वचः ॥ ८ ०१९ १२
यो अग्निं हव्यदातिभिर् नमोभिर् वा सुदक्षम् आविवासति ।
गिरा वाजिरशोचिषम् ॥ ८ ०१९ १३
समिधा यो निशिती दाशद् अदितिं धामभिर् अस्य मर्त्यः ।
विश्वेत् स धीभिः सुभगो जनाँ अति द्युम्नैर् उद्न इव तारिषत् ॥ ८ ०१९ १४
तद् अग्ने द्युम्नम् आ भर यत् सासहत् सदने कं चिद् अत्रिणम् ।

मन्युं जनस्य दूढ्यः ॥ ८ ०१९ १५
येन चष्टे वरुणो मित्रो अर्यमा येन नासत्या भगः ।
वयं तत् ते शवसा गातुवित्तमा इन्द्रत्वोता विधेमहि ॥ ८ ०१९ १६
ते घेद् अग्ने स्वाध्यो ये त्वा विप्र निदधिरे नृचक्षसम् ।
विप्रासो देव सुक्रतुम् ॥ ८ ०१९ १७
त इद् वेदिं सुभग त आहुतिं ते सोतुं चक्रिरे दिवि ।
त इद् वाजेभिर् जिग्युर् महद् धनं ये त्वे कामं न्येरिरे ॥ ८ ०१९ १८
भद्रो नो अग्निर् आहुतो भद्रा रातिः सुभग भद्रो अध्वरः ।
भद्रा उत प्रशस्तयः ॥ ८ ०१९ १९
भद्रम् मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहः ।
अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टिभिः ॥ ८ ०१९ २०
ईळे गिरा मनुर्हितं यं देवा दूतम् अरतिं न्येरिरे ।
यजिष्ठं हव्यवाहनम् ॥ ८ ०१९ २१
तिग्मजम्भाय तरुणाय राजते प्रयो गायस्य् अग्नये ।
यः पिंशते सूनृताभिः सुवीर्यम् अग्निर् घृतेभिर् आहुतः ॥ ८ ०१९ २२
यदी घृतेभिर् आहुतो वाशीम् अग्निर् भरत उच् चाव च ।
असुर इव निर्णिजम् ॥ ८ ०१९ २३
यो हव्यान्य् ऐरयता मनुर्हितो देव आसा सुगन्धिना ।
विवासते वार्याणि स्वध्वरो होता देवो अमर्त्यः ॥ ८ ०१९ २४
यद् अग्ने मर्त्यस् त्वं स्याम् अहम् मित्रमहो अमर्त्यः ।
सहसः सूनव् आहुत ॥ ८ ०१९ २५
न त्वा रासीयाभिशस्तये वसो न पापत्वाय सन्त्य ।
न मे स्तोतामतीवा न दुर्हितः स्याद् अग्ने न पापया ॥ ८ ०१९ २६
पितुर् न पुत्रः सुभृतो दुरोण आ देवाँ एतु प्र णो हविः ॥ ८ ०१९ २७
तवाहम् अग्न ऊतिभिर् नेदिष्ठाभिः सचेय जोषम् आ वसो ।
सदा देवस्य मर्त्यः ॥ ८ ०१९ २८
तव क्रत्वा सनेयं तव रातिभिर् अग्ने तव प्रशस्तिभिः ।
त्वाम् इद् आहुः प्रमतिं वसो ममाग्ने हर्षस्व दातवे ॥ ८ ०१९ २९

प्र सो अ॑ग्ने॒ तवो॒तिभिः॑ सु॒वीरा॑भिस् तिरते॒ वाज॑भर्मभिः ।
यस्य॒ त्वं स॒ख्यम् आ॒वरः॑ ॥ ८ ०१९ ३०
तव॑ द्र॒प्सो नील॑वान् वा॒श ऋ॒त्विय॒ इन्धा॑नः सिष्ण॒व् आ द॑दे ।
त्वम् म॑ही॒नाम् उ॒षसा॑म् असि प्रि॒यः क्ष॒पो वस्तु॑षु राजसि ॥ ८ ०१९ ३१
तम् आग॑न्म॒ सोभ॑रयः स॒हस्र॑मुष्कं स्वभि॒ष्टिम् अव॑से ।
स॒म्राजं॒ त्रास॑दस्यवम् ॥ ८ ०१९ ३२
यस्य॑ ते अग्ने अ॒न्ये अ॒ग्नय॑ उप॒क्षितो॑ व॒या इ॑व ।
विपो॒ न द्यु॒म्ना नि यु॒वे जना॑नां॒ तव॑ क्ष॒त्राणि॑ व॒र्धय॑न् ॥ ८ ०१९ ३३
यम् आ॑दित्यासो अद्रुहः पा॒रं नय॑थ॒ मर्त्य॑म् ।
म॒घोनां॒ विश्वे॑षां सुदानवः ॥ ८ ०१९ ३४
यू॒यं रा॑जानः॒ कं चि॑च् चर्षणीसहः॒ क्षय॑न्त॒म् मानु॑षाँ॒ अनु॑ ।
व॒यं ते वो॒ वरु॑ण॒ मित्रार्य॑म॒न् स्यामेद् ऋ॒तस्य॑ र॒थ्यः॑ ॥ ८ ०१९ ३५
अदा॑न् मे पौरुकु॒त्स्यः प॑ञ्चा॒शतं॑ त्र॒सद॑स्युर् व॒धूना॑म् ।
मंहि॑ष्ठो अ॒र्यः सत्प॑तिः ॥ ८ ०१९ ३६
उ॒त मे॑ प्र॒यियो॑र् व॒यियोः॑ सु॒वास्त्वा॒ अधि॒ तुग्व॑नि ।
ति॒सॄ॒णां स॑प्तती॒नां श्या॒वः प्र॑णे॒ता भु॑व॒द् वसु॒र् दिया॑नां॒ पतिः॑ ॥ ८ ०१९ ३७

(६४०)
आ ग॑न्ता॒ मा रि॑षण्यत॒ प्रस्था॑वानो॒ माप॑ स्थाता समन्यवः ।
स्थि॒रा चि॑न् नमयिष्णवः ॥ ८ ०२० ०१
वी॒ळु॒प॒विभि॑र् मरुत ऋभुक्षण॒ आ रु॑द्रासः सुदी॒तिभिः॑ ।
इ॒षा नो॑ अ॒द्या ग॑ता पुरुस्पृहो य॒ज्ञम् आ सो॑भरी॒यवः॑ ॥ ८ ०२० ०२
वि॒द्मा हि रु॒द्रिया॑णां॒ शुष्म॑म् उ॒ग्रम् म॒रुतां॒ शिमी॑वताम् ।
विष्णो॑र् ए॒षस्य॑ मी॒ळ्हुषा॑म् ॥ ८ ०२० ०३
वि द्वी॒पानि॒ पाप॑त॒न् तिष्ठ॑द् दु॒च्छुनो॒भे यु॑जन्त॒ रोद॑सी ।
प्र धन्वा॑न्य् ऐरत शुभ्रखादयो॒ यद् एज॑थ स्वभानवः ॥ ८ ०२० ०४
अच्यु॑ता चिद् वो॒ अज्म॒न्न् आ नान॑दति॒ पर्व॑तासो॒ वन॒स्पतिः॑ ।

भूमि॒र् यामे॑षु रेजते ॥ ८ ०२० ०५
अमा॑य वो मरुतो॒ यात॑वे॒ द्यौर् जिही॑त॒ उत्त॑रा बृ॒हत् ।
यत्रा॒ नरो॒ देदि॑शते त॒नूष्व् आ त्वक्षां॑सि बा॒ह्वोजसः ॥ ८ ०२० ०६
स्व॒धाम् अनु॒ श्रियं॒ नरो॒ महि॑ त्वे॒षा अम॑वन्तो॒ वृष॑प्सवः ।
वह॑न्ते॒ अह्रु॑तप्सवः ॥ ८ ०२० ०७
गोभि॑र् वा॒णो अ॑ज्यते॒ सोभ॑रीणां॒ रथे॒ कोशे॑ हि॒रण्यये॑ ।
गोब॑न्धवः सुजा॒तास॑ इ॒षे भुजे॒ म॒हान्तो॑ न॒ स्पर॑से॒ नु ॥ ८ ०२० ०८
प्रति॑ वो वृषदञ्जयो॒ वृष्णे॒ शर्धा॑य॒ मारु॑ताय भरध्वम् ।
ह॒व्या वृष॑प्रयाव्णे ॥ ८ ०२० ०९
वृ॒ष॒ण॒श्वेन॑ मरुतो॒ वृष॑प्सुना॒ रथे॑न॒ वृष॑नाभिना ।
आ श्ये॒नासो॒ न प॒क्षिणो॒ वृथा॑ नरो ह॒व्या नो॑ वी॒तये॑ गत ॥ ८ ०२० १०
स॒मा॒नम् अ॒ञ्ज्य् ए॒षां वि भ्रा॑जन्ते रु॒क्मासो॒ अधि॑ बा॒हुषु॑ ।
दवि॑द्युतत्य् ऋ॒ष्टयः॑ ॥ ८ ०२० ११
त उ॒ग्रासो॒ वृष॑ण उ॒ग्रबा॑हवो॒ नकि॑ष् ट॒नूषु॑ येतिरे ।
स्थि॒रा धन्वा॒न्य् आयु॑धा॒ रथे॑षु वो ऽनी॑केष्व् अधि॒ श्रियः॑ ॥ ८ ०२० १२
येषा॒म् अर्णो॒ न स॒प्रथो॒ नाम॑ त्वे॒षं शश्व॑ता॒म् एक॒म् इद् भु॒जे ।
वयो॒ न पित्र्यं॒ सहः॑ ॥ ८ ०२० १३
तान् व॑न्दस्व म॒रुत॒स् ताँ उप॑ स्तुहि॒ तेषां॒ हि धुनी॑नाम् ।
अ॒राणां॒ न च॑र॒मस् तद् ए॑षां दा॒ना म॒ह्ना तद् ए॑षाम् ॥ ८ ०२० १४
सु॒भगः॒ स व॑ ऊ॒तिष्व् आस॒ पूर्वा॑सु मरुतो॒ व्युष्टिषु ।
यो वा॑ नू॒नम् उ॒तास॑ति ॥ ८ ०२० १५
यस्य॑ वा यू॒यम् प्रति॑ वा॒जिनो॑ नर॒ आ ह॒व्या वी॒तये॑ ग॒थ ।
अ॒भि ष द्यु॒म्नैर् उ॒त वाज॑सातिभिः सु॒म्ना वो॑ धूतयो नशत् ॥ ८ ०२० १६
यथा॑ रु॒द्रस्य॑ सू॒नवो॑ दि॒वो वश॒न्त्य् असु॑रस्य वे॒धसः॑ ।
युवा॑न॒स् तथेद् अ॑सत् ॥ ८ ०२० १७
ये चार्ह॑न्ति म॒रुतः॑ सु॒दान॑वः॒ स्मन् मी॒ळ्हु॒षश् चर॑न्ति॒ ये ।
अत॑श् चि॒द् आ न॒ उप॒ वस्य॑सा हृ॒दा युवा॑न॒ आ व॑वृध्वम् ॥ ८ ०२० १८
यून॑ ऊ॒ षु नवि॑ष्ठया॒ वृष्णः॑ पाव॒काँ अ॒भि सोभ॑रे गि॒रा ।

गाय गा इव चर्कृषत् ॥ ८ ०२० १९
साहा ये सन्ति मुष्टिहेव हव्यो विश्वासु पृत्सु होतृषु ।
वृष्णश् चन्द्रान् न सुश्रवस्तमान् गिरा वन्दस्व मरुतो अह ॥ ८ ०२० २०
गावश् चिद् घा समन्यवः सजात्येन मरुतः सबन्धवः ।
रिहते ककुभो मिथः ॥ ८ ०२० २१
मर्तश् चिद् वो नृतवो रुक्मवक्षस उप भ्रातृत्वम् आयति ।
अधि नो गात मरुतः सदा हि व आपित्वम् अस्ति निध्रुवि ॥ ८ ०२० २२
मरुतो मारुतस्य न आ भेषजस्य वहता सुदानवः ।
यूयं सखायः सप्तयः ॥ ८ ०२० २३
याभिः सिन्धुम् अवथ याभिस् तूर्वथ याभिर् दशस्यथा क्रिविम् ।
मयो नो भूतोतिभिर् मयोभुवः शिवाभिर् असचद्विषः ॥ ८ ०२० २४
यत् सिन्धौ यद् असिक्न्यां यत् समुद्रेषु मरुतः सुबर्हिषः ।
यत् पर्वतेषु भेषजम् ॥ ८ ०२० २५
विश्वम् पश्यन्तो बिभृथा तनूष्व् आ तेना नो अधि वोचत ।
क्षमा रपो मरुत आतुरस्य न इष्कर्ता विह्रुतम् पुनः ॥ ८ ०२० २६

(६४१)
वयम् उ त्वाम् अपूर्व्य स्थूरं न कच् चिद् भरन्तो ऽवस्यवः ।
वाजे चित्रं हवामहे ॥ ८ ०२१ ०१
उप त्वा कर्मन्न् ऊतये स नो युवोग्रश् चक्राम यो धृषत् ।
त्वाम् इद् ध्य् अवितारं ववृमहे सखाय इन्द्र सानसिम् ॥ ८ ०२१ ०२
आ याहीम इन्दवो ऽश्वपते गोपत उर्वरापते ।
सोमं सोमपते पिब ॥ ८ ०२१ ०३
वयं हि त्वा बन्धुमन्तम् अबन्धवो विप्रास इन्द्र येमिम ।
या ते धामानि वृषभ तेभिर् आ गहि विश्वेभिः सोमपीतये ॥ ८ ०२१ ०४
सीदन्तस् ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे ।
अभि त्वाम् इन्द्र नोनुमः ॥ ८ ०२१ ०५

अच्छा च त्वैना नमसा वदामसि किम् मुहुश् चिद् वि दीधयः ।
सन्ति कामासो हरिवो ददिष् ट्वं स्मो वयं सन्ति नो धियः ॥ ८ ०२१ ०६
नूना इद् इन्द्र ते वयम् ऊती अभूम नहि नू ते अद्रिवः ।
विद्मा पुरा परीणसः ॥ ८ ०२१ ०७
विद्मा सखित्वम् उत शूर भोज्य १म् आ ते ता वज्रिन्न् ईमहे ।
उतो समस्मिन्न् आ शिशीहि नो वसो वाजे सुशिप्र गोमति ॥ ८ ०२१ ०८
यो न इदम्-इदम् पुरा प्र वस्य आनिनाय तम् उ व स्तुषे ।
सखाय इन्द्रम् ऊतये ॥ ८ ०२१ ०९
हर्यश्वं सत्पतिं चर्षणीसहं स हि ष्मा यो अमन्दत ।
आ तु नः स वयति गव्यम् अश्व्यं स्तोतृभ्यो मघवा शतम् ॥ ८ ०२१ १०
त्वया ह स्विद् युजा वयम् प्रति श्वसन्तं वृषभ ब्रुवीमहि ।
संस्थे जनस्य गोमतः ॥ ८ ०२१ ११
जयेम कारे पुरुहूत कारिणो ऽभि तिष्ठेम दूढ्यः ।
नृभिर् वृत्रं हन्याम शूशुयाम चावेर् इन्द्र प्र णो धियः ॥ ८ ०२१ १२
अभ्रातृव्यो अना त्वम् अनापिर् इन्द्र जनुषा सनाद् असि ।
युधेद् आपित्वम् इच्छसे ॥ ८ ०२१ १३
नकी रेवन्तं सख्याय विन्दसे पीयन्ति ते सुराश्वः ।
यदा कृणोषि नदनुं सम् ऊहस्य् आद् इत् पितेव हूयसे ॥ ८ ०२१ १४
मा ते अमाजुरो यथा मूरास इन्द्र सख्ये त्वावतः ।
नि षदाम सचा सुते ॥ ८ ०२१ १५
मा ते गोदत्र निर् अराम राधस इन्द्र मा ते गृहामहि ।
दृळ्हा चिद् अर्यः प्र मृशाभ्य् आ भर न ते दामान आदभे ॥ ८ ०२१ १६
इन्द्रो वा घेद् इयन् मघं सरस्वती वा सुभगा ददिर् वसु ।
त्वं वा चित्र दाशुषे ॥ ८ ०२१ १७
चित्र इद् राजा राजका इद् अन्यके यके सरस्वतीम् अनु ।
पर्जन्य इव ततनद् धि वृष्ट्या सहस्रम् अयुता ददत् ॥ ८ ०२१ १८

(६४२)
ओ त्यम् अह्न आ रथम् अद्या दंसिष्ठम् ऊतये ।
यम् अश्विना सुहवा रुद्रवर्तनी आ सूर्यायै तस्थथुः ॥ ८ ०२२ ०१
पूर्वायुषं सुहवम् पुरुस्पृहम् भुज्युं वाजेषु पूर्व्यम् ।
सचनावन्तं सुमतिभिः सोभरे विद्वेषसम् अनेहसम् ॥ ८ ०२२ ०२
इह त्या पुरुभूतमा देवा नमोभिर् अश्विना ।
अर्वाचीना स्व् अवसे करामहे गन्तारा दाशुषो गृहम् ॥ ८ ०२२ ०३
युवो रथस्य परि चक्रम् ईयत ईर्मान्यद् वाम् इषण्यति ।
अस्माँ अच्छा सुमतिर् वां शुभस् पती आ धेनुर् इव धावतु ॥ ८ ०२२ ०४
रथो यो वां त्रिवन्धुरो हिरण्याभीशुर् अश्विना ।
परि द्यावापृथिवी भूषति श्रुतस् तेन नासत्या गतम् ॥ ८ ०२२ ०५
दशस्यन्ता मनवे पूर्व्यं दिवि यवं वृकेण कर्षथः ।
ता वाम् अद्य सुमतिभिः शुभस् पती अश्विना प्र स्तुवीमहि ॥ ८ ०२२ ०६
उप नो वाजिनीवसू यातम् ऋतस्य पथिभिः ।
येभिस् तृक्षिं वृषणा त्रासदस्यवम् महे क्षत्राय जिन्वथः ॥ ८ ०२२ ०७
अयं वाम् अद्रिभिः सुतः सोमो नरा वृषण्वसू ।
आ यातं सोमपीतये पिबतं दाशुषो गृहे ॥ ८ ०२२ ०८
आ हि रुहतम् अश्विना रथे कोशे हिरण्यये वृषण्वसू ।
युञ्जाथाम् पीवरीर् इषः ॥ ८ ०२२ ०९
याभिः पक्थम् अवथो याभिर् अध्रिगुं याभिर् बभ्रुं विजोषसम् ।
ताभिर् नो मक्षू तूयम् अश्विना गतम् भिषज्यतं यद् आतुरम् ॥ ८ ०२२ १०
यद् अध्रिगावो अध्रिगू इदा चिद् अह्नो अश्विना हवामहे ।
वयं गीर्भिर् विपन्यवः ॥ ८ ०२२ ११
ताभिर् आ यातं वृषणोप मे हवं विश्वप्सुं विश्ववार्यम् ।
इषा मंहिष्ठा पुरुभूतमा नरा याभिः क्रिविं वावृधुस् ताभिर् आ गतम् ॥ ८ ०२२ १२
ताव् इदा चिद् अहानां ताव् अश्विना वन्दमान उप ब्रुवे ।
ता उ नमोभिर् ईमहे ॥ ८ ०२२ १३
ताव् इद् दोषा ता उषसि शुभस् पती ता यामन् रुद्रवर्तनी ।

मा नो मर्ताय रिपवे वाजिनीवसू परो रुद्राव् अति ख्यतम् ॥ ८ ०२२ १४
आ सुग्म्याय सुग्म्यम् प्राता रथेनाश्विना वा सक्षणी ।
हुवे पितेव सोभरी ॥ ८ ०२२ १५
मनोजवसा वृषणा मदच्युता मक्षुंगमाभिर् ऊतिभिः ।
आरात्ताच् चिद् भूतम् अस्मे अवसे पूर्वीभिः पुरुभोजसा ॥ ८ ०२२ १६
आ नो अश्वावद् अश्विना वर्तिर् यासिष्टम् मधुपातमा नरा ।
गोमद् दस्रा हिरण्यवत् ॥ ८ ०२२ १७
सुप्रावर्गं सुवीर्यं सुष्ठु वार्यम् अनाधृष्टं रक्षस्विना ।
अस्मिन्न् आ वाम् आयाने वाजिनीवसू विश्वा वामानि धीमहि ॥ ८ ०२२ १८

(६४३)
ईळिष्वा हि प्रतीव्य १ं यजस्व जातवेदसम् ।
चरिष्णुधूमम् अगृभीतशोचिषम् ॥ ८ ०२३ ०१
दामानं विश्वचर्षणे ऽग्निं विश्वमनो गिरा ।
उत स्तुषे विष्पर्धसो रथानाम् ॥ ८ ०२३ ०२
येषाम् आबाध ऋग्मिय इषः पृक्षश् च निग्रभे ।
उपविदा वह्निर् विन्दते वसु ॥ ८ ०२३ ०३
उद् अस्य शोचिर् अस्थाद् दीदियुषो व्य् अ १ जरम् ।
तपुर्जम्भस्य सुद्युतो गणश्रियः ॥ ८ ०२३ ०४
उद् उ तिष्ठ स्वध्वर स्तवानो देव्या कृपा ।
अभिख्या भासा बृहता शुशुक्वनिः ॥ ८ ०२३ ०५
अग्ने याहि सुशस्तिभिर् हव्या जुह्वान आनुषक् ।
यथा दूतो बभूथ हव्यवाहनः ॥ ८ ०२३ ०६
अग्निं वः पूर्व्यं हुवे होतारं चर्षणीनाम् ।
तम् अया वाचा गृणे तम् उ व स्तुषे ॥ ८ ०२३ ०७
यज्ञेभिर् अद्भुतक्रतुं यं कृपा सूदयन्त इत् ।
मित्रं न जने सुधितम् ऋतावनि ॥ ८ ०२३ ०८

ऋतावानम् ऋतायवो यज्ञस्य साधनं गिरा ।
उपो एनं जुजुषुर् नमसस् पदे ॥ ८ ०२३ ०९
अच्छा नो अङ्गिरस्तमं यज्ञासो यन्तु संयतः ।
होता यो अस्ति विक्ष्व् आ यशस्तमः ॥ ८ ०२३ १०
अग्ने तव त्ये अजरेन्धानासो बृहद् भाः ।
अश्वा इव वृषणस् तविषीयवः ॥ ८ ०२३ ११
स त्वं न ऊर्जाम् पते रयिं रास्व सुवीर्यम् ।
प्राव नस् तोके तनये समत्स्व् आ ॥ ८ ०२३ १२
यद् वा उ विश्पतिः शितः सुप्रीतो मनुषो विशि ।
विश्वेद् अग्निः प्रति रक्षांसि सेधति ॥ ८ ०२३ १३
श्रुष्ट्य् अग्ने नवस्य मे स्तोमस्य वीर विश्पते ।
नि मायिनस् तपुषा रक्षसो दह ॥ ८ ०२३ १४
न तस्य मायया चन रिपुर् ईशीत मर्त्यः ।
यो अग्नये ददाश हव्यदातिभिः ॥ ८ ०२३ १५
व्यश्वस् त्वा वसुविदम् उक्षण्युर् अप्रीणाद् ऋषिः ।
महो राये तम् उ त्वा सम् इधीमहि ॥ ८ ०२३ १६
उशना काव्यस् त्वा नि होतारम् असादयत् ।
आयजिं त्वा मनवे जातवेदसम् ॥ ८ ०२३ १७
विश्वे हि त्वा सजोषसो देवासो दूतम् अक्रत ।
श्रुष्टी देव प्रथमो यज्ञियो भुवः ॥ ८ ०२३ १८
इमं घा वीरो अमृतं दूतं कृण्वीत मर्त्यः ।
पावकं कृष्णवर्तनिं विहायसम् ॥ ८ ०२३ १९
तं हुवेम यतस्रुचः सुभासं शुक्रशोचिषम् ।
विशाम् अग्निम् अजरम् प्रत्नम् ईड्यम् ॥ ८ ०२३ २०
यो अस्मै हव्यदातिभिर् आहुतिम् मर्तो ऽविधत् ।
भूरि पोषं स धत्ते वीरवद् यशः ॥ ८ ०२३ २१
प्रथमं जातवेदसम् अग्निं यज्ञेषु पूर्व्यम् ।
प्रति स्रुग् एति नमसा हविष्मती ॥ ८ ०२३ २२

आभिर् विधेमाग्नये ज्येष्ठाभिर् व्यश्ववत् ।
मंहिष्ठाभिर् मतिभिः शुक्रशोचिषे ॥ ८ ०२३ २३
नूनम् अर्च विहायसे स्तोमेभि स्थूरयूपवत् ।
ऋषे वैयश्व दम्यायाग्नये ॥ ८ ०२३ २४
अतिथिम् मानुषाणां सूनुं वनस्पतीनाम् ।
विप्रा अग्निम् अवसे प्रत्नम् ईळते ॥ ८ ०२३ २५
महो विश्वाँ अभि षतो ऽभि हव्यानि मानुषा ।
अग्ने नि षत्सि नमसाधि बर्हिषि ॥ ८ ०२३ २६
वंस्वा नो वार्या पुरु वंस्व रायः पुरुस्पृहः ।
सुवीर्यस्य प्रजावतो यशस्वतः ॥ ८ ०२३ २७
त्वं वरो सुषाम्णे ऽग्ने जनाय चोदय ।
सदा वसो रातिं यविष्ठ शश्वते ॥ ८ ०२३ २८
त्वं हि सुप्रतूर् असि त्वं नो गोमतीर् इषः ।
महो रायः सातिम् अग्ने अपा वृधि ॥ ८ ०२३ २९
अग्ने त्वं यशा अस्य् आ मित्रावरुणा वह ।
ऋतावाना सम्राजा पूतदक्षसा ॥ ८ ०२३ ३०

(६४४)
सखाय आ शिषामहि ब्रह्मेन्द्राय वज्रिणे ।
स्तुष ऊ षु वो नृतमाय धृष्णवे ॥ ८ ०२४ ०१
शवसा ह्य् असि श्रुतो वृत्रहत्येन वृत्रहा ।
मघैर् मघोनो अति शूर दाशसि ॥ ८ ०२४ ०२
स न स्तवान आ भर रयिं चित्रश्रवस्तमम् ।
निरेके चिद् यो हरिवो वसुर् ददिः ॥ ८ ०२४ ०३
आ निरेकम् उत प्रियम् इन्द्र दर्षि जनानाम् ।
धृषता धृष्णो स्तवमान आ भर ॥ ८ ०२४ ०४
न ते सव्यं न दक्षिणं हस्तं वरन्त आमुरः ।

न परिबाधो हरिवो गविष्टिषु ॥ ८ ०२४ ०५
आ त्वा गोभिर् इव व्रजं गीर्भिर् ऋणोम्य् अद्रिवः ।
आ स्मा कामं जरितुर् आ मनः पृण ॥ ८ ०२४ ०६
विश्वानि विश्वमनसो धिया नो वृत्रहन्तम ।
उग्र प्रणेतर् अधि षू वसो गहि ॥ ८ ०२४ ०७
वयं ते अस्य वृत्रहन् विद्याम शूर नव्यसः ।
वसोः स्पार्हस्य पुरुहूत राधसः ॥ ८ ०२४ ०८
इन्द्र यथा ह्य् अस्ति ते ऽपरीतं नृतो शवः ।
अमृक्ता रातिः पुरुहूत दाशुषे ॥ ८ ०२४ ०९
आ वृषस्व महामह महे नृतम राधसे ।
दृळ्हश् चिद् दृह्य मघवन् मघत्तये ॥ ८ ०२४ १०
नू अन्यत्रा चिद् अद्रिवस् त्वन् नो जग्मुर् आशसः ।
मघवञ् छग्धि तव तन् न ऊतिभिः ॥ ८ ०२४ ११
नह्य् अ१ङ्ग नृतो त्वद् अन्यं विन्दामि राधसे ।
राये द्युम्नाय शवसे च गिर्वणः ॥ ८ ०२४ १२
एन्दुम् इन्द्राय सिञ्चत पिबाति सोम्यम् मधु ।
प्र राधसा चोदयाते महित्वना ॥ ८ ०२४ १३
उपो हरीणाम् पतिं दक्षम् पृञ्चन्तम् अब्रवम् ।
नूनं श्रुधि स्तुवतो अश्व्यस्य ॥ ८ ०२४ १४
नह्य् अ१ङ्ग पुरा चन जज्ञे वीरतरस् त्वत् ।
नकी राया नैवथा न भन्दना ॥ ८ ०२४ १५
एद् उ मध्वो मदिन्तरं सिञ्च वाध्वर्यो अन्धसः ।
एवा हि वीर स्तवते सदावृधः ॥ ८ ०२४ १६
इन्द्र स्थातर् हरीणां नकिष् टे पूर्व्यस्तुतिम् ।
उद् आनंश शवसा न भन्दना ॥ ८ ०२४ १७
तं वो वाजानाम् पतिम् अहूमहि श्रवस्यवः ।
अप्रायुभिर् यज्ञेभिर् वावृधेन्यम् ॥ ८ ०२४ १८
एतो न्व् इन्द्रं स्तवाम सखायः स्तोम्यं नरम् ।

कृष्टीर् यो विश्वा अभ्य् अस्त्य् एक इत् ॥ ८ ०२४ १९
अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः ।
घृतात् स्वादीयो मधुनश् च वोचत ॥ ८ ०२४ २०
यस्यामितानि वीर्या न राधः पर्येतवे ।
ज्योतिर् न विश्वम् अभ्य् अस्ति दक्षिणा ॥ ८ ०२४ २१
स्तुहीन्द्रं व्यश्ववद् अनूर्मिं वाजिनं यमम् ।
अर्यो गयम् मंहमानं वि दाशुषे ॥ ८ ०२४ २२
एवा नूनम् उप स्तुहि वैयश्व दशमं नवम् ।
सुविद्वांसं चर्कृत्यं चरणीनाम् ॥ ८ ०२४ २३
वेत्था हि निरृतीनां वज्रहस्त परिवृजम् ।
अहर्-अहः शुन्ध्युः परिपदाम् इव ॥ ८ ०२४ २४
तद् इन्द्राव आ भर येना दंसिष्ठ कृत्वने ।
द्विता कुत्साय शिश्नथो नि चोदय ॥ ८ ०२४ २५
तम् उ त्वा नूनम् ईमहे नव्यं दंसिष्ठ सन्यसे ।
स त्वं नो विश्वा अभिमातीः सक्षणिः ॥ ८ ०२४ २६
य ऋक्षाद् अंहसो मुचद् यो वार्यात् सप्त सिन्धुषु ।
वधर् दासस्य तुविनृम्ण नीनमः ॥ ८ ०२४ २७
यथा वरो सुषाम्णे सनिभ्य आवहो रयिम् ।
व्यश्वेभ्यः सुभगे वाजिनीवति ॥ ८ ०२४ २८
आ नार्यस्य दक्षिणा व्यश्वाँ एतु सोमिनः ।
स्थूरं च राधः शतवत् सहस्रवत् ॥ ८ ०२४ २९
यत् त्वा पृच्छाद् ईजानः कुहया कुहयाकृते ।
एषो अपश्रितो वलो गोमतीम् अव तिष्ठति ॥ ८ ०२४ ३०

(६४५)
ता वां विश्वस्य गोपा देवा देवेषु यज्ञिया ।
ऋतावाना यजसे पूतदक्षसा ॥ ८ ०२५ ०१

मित्रा तना न रथ्या ३ वरुणो यश् च सुक्रतुः ।
सनात् सुजाता तनया धृतव्रता ॥ ८ ०२५ ०२
ता माता विश्ववेदसासुर्याय प्रमहसा ।
मही जजानादितिर् ऋतावरी ॥ ८ ०२५ ०३
महान्ता मित्रावरुणा सम्राजा देवाव् असुरा ।
ऋतावानाव् ऋतम् आ घोषतो बृहत् ॥ ८ ०२५ ०४
नपाता शवसो महः सूनू दक्षस्य सुक्रतू ।
सृप्रदानू इषो वास्त्व् अधि क्षितः ॥ ८ ०२५ ०५
सं या दानूनि येमथुर् दिव्याः पार्थिवीर् इषः ।
नभस्वतीर् आ वां चरन्तु वृष्टयः ॥ ८ ०२५ ०६
अधि या बृहतो दिवो ऽभि यूथेव पश्यतः ।
ऋतावाना सम्राजा नमसे हिता ॥ ८ ०२५ ०७
ऋतावाना नि षेदतुः साम्राज्याय सुक्रतू ।
धृतव्रता क्षत्रिया क्षत्रम् आशतुः ॥ ८ ०२५ ०८
अक्ष्णश् चिद् गातुवित्तरानुल्बणेन चक्षसा ।
नि चिन् मिषन्ता निचिरा नि चिक्यतुः ॥ ८ ०२५ ०९
उत नो देव्य् अदितिर् उरुष्यतां नासत्या ।
उरुष्यन्तु मरुतो वृद्धशवसः ॥ ८ ०२५ १०
ते नो नावम् उरुष्यत दिवा नक्तं सुदानवः ।
अरिष्यन्तो नि पायुभिः सचेमहि ॥ ८ ०२५ ११
अघ्नते विष्णवे वयम् अरिष्यन्तः सुदानवे ।
श्रुधि स्वयावन् सिन्धो पूर्वचित्तये ॥ ८ ०२५ १२
तद् वार्यं वृणीमहे वरिष्ठं गोपयत्यम् ।
मित्रो यत् पान्ति वरुणो यद् अर्यमा ॥ ८ ०२५ १३
उत नः सिन्धुर् अपां तन् मरुतस् तद् अश्विना ।
इन्द्रो विष्णुर् मीढ्वांसः सजोषसः ॥ ८ ०२५ १४
ते हि ष्मा वनुषो नरो ऽभिमातिं कयस्य चित् ।
तिग्मं न क्षोदः प्रतिघ्नन्ति भूर्णयः ॥ ८ ०२५ १५

अयम् एक इत्था पुरूरु चष्टे वि विश्पतिः ।
तस्य व्रतान्य् अनु वश् चरामसि ॥ ८ ०२५ १६
अनु पूर्वाण्य् ओक्या साम्राज्यस्य सश्चिम ।
मित्रस्य व्रता वरुणस्य दीर्घश्रुत् ॥ ८ ०२५ १७
परि यो रश्मिना दिवो ऽन्तान् ममे पृथिव्याः ।
उभे आ पप्रौ रोदसी महित्वा ॥ ८ ०२५ १८
उद् उ ष्य शरणे दिवो ज्योतिर् अयंस्त सूर्यः ।
अग्निर् न शुक्रः समिधान आहुतः ॥ ८ ०२५ १९
वचो दीर्घप्रसद्मनीशे वाजस्य गोमतः ।
ईशे हि पित्वो ऽविषस्य दावने ॥ ८ ०२५ २०
तत् सूर्यं रोदसी उभे दोषा वस्तोर् उप ब्रुवे ।
भोजेष्व् अस्माँ अभ्य् उच् चरा सदा ॥ ८ ०२५ २१
ऋज्रम् उक्षण्यायने रजतं हरयाणे ।
रथं युक्तम् असनाम सुषामणि ॥ ८ ०२५ २२
ता मे अश्व्यानां हरीणां नितोशना ।
उतो नु कृत्व्यानां नृवाहसा ॥ ८ ०२५ २३
स्मदभीशू कशावन्ता विप्रा नविष्ठया मती ।
महो वाजिनाव् अर्वन्ता सचासनम् ॥ ८ ०२५ २४

(६४६)
युवोर् उ षू रथं हुवे सधस्तुत्याय सूरिषु ।
अतूर्तदक्षा वृषणा वृषण्वसू ॥ ८ ०२६ ०१
युवं वरो सुषाम्णे महे तने नासत्या ।
अवोभिर् याथो वृषणा वृषण्वसू ॥ ८ ०२६ ०२
ता वाम् अद्य हवामहे हव्येभिर् वाजिनीवसू ।
पूर्वीर् इष इषयन्ताव् अति क्षपः ॥ ८ ०२६ ०३
आ वां वाहिष्ठो अश्विना रथो यातु श्रुतो नरा ।

उप स्तोमान् तुरस्य दर्शथः श्रिये ॥ ८ ०२६ ०४
जुहुराणा चिद् अश्विना मन्येथां वृषण्वसू ।
युवं हि रुद्रा पर्षथो अति द्विषः ॥ ८ ०२६ ०५
दस्रा हि विश्वम् आनुषङ् मक्षूभिः परिदीयथः ।
धियंजिन्वा मधुवर्णा शुभस् पती ॥ ८ ०२६ ०६
उप नो यातम् अश्विना राया विश्वपुषा सह ।
मघवाना सुवीराव् अनपच्युता ॥ ८ ०२६ ०७
आ मे अस्य प्रतीव्यम् इन्द्रनासत्या गतम् ।
देवा देवेभिर् अद्य सचनस्तमा ॥ ८ ०२६ ०८
वयं हि वां हवामह उक्षण्यन्तो व्यश्ववत् ।
सुमतिभिर् उप विप्राव् इहा गतम् ॥ ८ ०२६ ०९
अश्विना स्व् ऋषे स्तुहि कुवित् ते श्रवतो हवम् ।
नेदीयसः कूळयातः पणीँर् उत ॥ ८ ०२६ १०
वैयश्वस्य श्रुतं नरोतो मे अस्य वेदथः ।
सजोषसा वरुणो मित्रो अर्यमा ॥ ८ ०२६ ११
युवादत्तस्य धिष्ण्या युवानीतस्य सूरिभिः ।
अहर्-अहर् वृषण मह्यं शिक्षतम् ॥ ८ ०२६ १२
यो वां यज्ञेभिर् आवृतो ऽधिवस्त्रा वधूर् इव ।
सपर्यन्ता शुभे चक्राते अश्विना ॥ ८ ०२६ १३
यो वाम् उरुव्यचस्तमं चिकेतति नृपाय्यम् ।
वर्तिर् अश्विना परि यातम् अस्मयू ॥ ८ ०२६ १४
अस्मभ्यं सु वृषण्वसू यातं वर्तिर् नृपाय्यम् ।
विषुद्रुहेव यज्ञम् ऊहथुर् गिरा ॥ ८ ०२६ १५
वाहिष्ठो वां हवानां स्तोमो दूतो हुवन् नरा ।
युवाभ्याम् भूत्व् अश्विना ॥ ८ ०२६ १६
यद् अदो दिवो अर्णव इषो वा मदथो गृहे ।
श्रुतम् इन् मे अमर्त्या ॥ ८ ०२६ १७
उत स्या श्वेतयावरी वाहिष्ठा वां नदीनाम् ।

सिन्धुर् हिरण्यवर्तनिः ॥ ८ ०२६ १८
स्मद् एतया सुकीर्त्याश्विना श्वेतया धिया ।
वहेथे शुभ्रयावाना ॥ ८ ०२६ १९
युक्ष्वा हि त्वं रथासहा युवस्व पोष्या वसो ।
आन् नो वायो मधु पिबास्माकं सवना गहि ॥ ८ ०२६ २०
तव वायव् ऋतस्पते त्वष्टुर् जामातर् अद्भुत ।
अवांस्य् आ वृणीमहे ॥ ८ ०२६ २१
त्वष्टुर् जामातरं वयम् ईशानं राय ईमहे ।
सुतावन्तो वायुं द्युम्ना जनासः ॥ ८ ०२६ २२
वायो याहि शिवा दिवो वहस्वा सु स्वश्व्यम् ।
वहस्व महः पृथुपक्षसा रथे ॥ ८ ०२६ २३
त्वां हि सुप्सरस्तमं नृषदनेषु हूमहे ।
ग्रावाणं नाश्वपृष्ठम् मंहना ॥ ८ ०२६ २४
स त्वं नो देव मनसा वायो मन्दानो अग्रियः ।
कृधि वाजाँ अपो धियः ॥ ८ ०२६ २५

(६४७)
अग्निर् उक्थे पुरोहितो ग्रावाणो बर्हिर् अध्वरे ।
ऋचा यामि मरुतो ब्रह्मणस् पतिं देवाँ अवो वरेण्यम् ॥ ८ ०२७ ०१
आ पशुं गासि पृथिवीं वनस्पतीन् उषासा नक्तम् ओषधीः ।
विश्वे च नो वसवो विश्ववेदसो धीनाम् भूत प्रावितारः ॥ ८ ०२७ ०२
प्र सू न एत्व् अध्वरो ऽग्ना देवेषु पूर्व्यः ।
आदित्येषु प्र वरुणे धृतव्रते मरुत्सु विश्वभानुषु ॥ ८ ०२७ ०३
विश्वे हि ष्मा मनवे विश्ववेदसो भुवन् वृधे रिशादसः ।
अरिष्टेभिः पायुभिर् विश्ववेदसो यन्ता नो ऽवृकं छर्दिः ॥ ८ ०२७ ०४
आ नो अद्य समनसो गन्ता विश्वे सजोषसः ।
ऋचा गिरा मरुतो देव्य् अदिते सदने पस्त्ये महि ॥ ८ ०२७ ०५

अ॒भि प्रि॒या म॑रुतो॒ या वो॒ अश्व्या॑ ह॒व्या मि॑त्र प्रया॒थन॑ ।
आ ब॒र्हिर् इन्द्रो॒ वरु॑णस् तु॒रा नर॑ आदि॒त्यासः॑ सदन्तु नः ॥ ८ ०२७ ०६
व॒यं वो॑ वृ॒क्तब॑र्हिषो हि॒तप्र॑यस आनु॒षक् ।
सु॒तसो॑मासो वरुण हवामहे मनु॒ष्वद् इ॒द्धाग्न॑यः ॥ ८ ०२७ ०७
आ प्र या॑त मरु॑तो॒ विष्णो॒ अश्वि॑ना॒ पूष॒न् माकी॑नया धि॒या ।
इन्द्र॒ आ या॑तु प्रथ॒मः स॑नि॒ष्युभि॒र् वृषा॒ यो वृ॑त्र॒हा गृ॒णे ॥ ८ ०२७ ०८
वि नो॑ देवासो अद्रु॒हो ऽच्छि॑द्रं॒ शर्म॑ यच्छत ।
न यद् दू॒राद् व॑सवो॒ नू चि॒द् अन्ति॑तो॒ वरू॑थम् आ॒दध॑र्षति ॥ ८ ०२७ ०९
अस्ति॒ हि वः॑ सजा॒त्यं॑ रिशादसो॒ देवा॑सो॒ अस्त्य् आ॒प्य॑म् ।
प्र णः॒ पूर्व॑स्मै सुवि॒ताय॑ वोचत म॒क्षू सु॒म्नाय॒ नव्य॑से ॥ ८ ०२७ १०
इ॒दा हि व॒ उप॑स्तुतिम् इ॒दा वा॒मस्य॑ भ॒क्तये॑ ।
उप॑ वो विश्ववेदसो नम॒स्युर् आँ असृ॒क्ष्य् अन्या॑म् इव ॥ ८ ०२७ ११
उद् उ॒ ष्य वः॑ सवि॒ता सु॑प्रणीत॒यो ऽस्था॑द् ऊ॒र्ध्वो वरे॑ण्यः ।
नि द्वि॒पाद॒श् चतु॑ष्पादो अ॒र्थिनो ऽवि॑श्रन् पतयि॒ष्णवः॑ ॥ ८ ०२७ १२
दे॒वं-दे॑वं वो ऽव॑से दे॒वं-दे॑वम् अ॒भिष्ट॑ये ।
दे॒वं-दे॑वं हुवेम॒ वाज॑सातये गृ॒णन्तो॑ दे॒व्या धि॒या ॥ ८ ०२७ १३
दे॒वासो॒ हि ष्मा॒ मन॑वे॒ सम॑न्यवो॒ विश्वे॑ सा॒कं सरा॑तयः ।
ते नो॑ अ॒द्य ते अ॑प॒रं तु॒चे तु नो॒ भव॑न्तु वरिवो॒विदः॑ ॥ ८ ०२७ १४
प्र वः॑ शंसाम्य् अद्रुहः सं॒स्थ उप॑स्तुतीनाम् ।
न तं धू॒र्तिर् व॑रुण मित्र॒ मर्त्यं॒ यो वो॒ धाम॒भ्यो ऽवि॑धत् ॥ ८ ०२७ १५
प्र स क्षयं॑ तिरते॒ वि म॒हीर् इषो॒ यो वो॒ वरा॑य॒ दाश॑ति ।
प्र प्र॒जाभि॑र् जायते॒ धर्म॑ण॒स् पर्य् अरि॑ष्टः॒ सर्व॑ एधते ॥ ८ ०२७ १६
ऋ॒ते स वि॑न्दते यु॒धः सु॒गेभि॑र् या॒त्य् अध्व॑नः ।
अ॒र्य॒मा मि॒त्रो वरु॑णः॒ सरा॑तयो॒ यं त्राय॑न्ते स॒जोष॑सः ॥ ८ ०२७ १७
अ॒ज्रे॑ चि॒द् अस्मै कृणुथा॒ न्यञ्च॑नं दु॒र्गे चि॒द् आ सु॑स॒रणम् ।
ए॒षा चि॒द् अस्माद् अ॒शनिः॑ प॒रो नु सास्रे॑धन्ती॒ वि न॑श्यतु ॥ ८ ०२७ १८
यद् अ॒द्य सूर्य॑ उद्य॒ति प्रिय॑क्षत्रा ऋ॒तं द॒ध ।
यन् नि॒म्रुचि॑ प्र॒बुधि॑ विश्ववेदसो॒ यद् वा॑ म॒ध्यंदि॑ने दि॒वः ॥ ८ ०२७ १९

यद् वाभिपित्वे असुरा ऋतं यते छर्दिर् येम वि दाशुषे ।
वयं तद् वो वसवो विश्ववेदस उप स्थेयाम मध्य आ ॥ ८ ०२७ २०
यद् अद्य सूर उदिते यन् मध्यंदिन आतुचि ।
वामं धत्थ मनवे विश्ववेदसो जुह्वानाय प्रचेतसे ॥ ८ ०२७ २१
वयं तद् वः सम्राज आ वृणीमहे पुत्रो न बहुपाय्यम् ।
अश्याम तद् आदित्या जुह्वतो हविर् येन वस्यो ऽनशामहै ॥ ८ ०२७ २२

(६४८)
ये त्रिंशति त्रयस् परो देवासो बर्हिर् आसदन् ।
विदन्न् अह द्वितासनन् ॥ ८ ०२८ ०१
वरुणो मित्रो अर्यमा स्मद्रातिषाचो अग्नयः ।
पत्नीवन्तो वषट्कृताः ॥ ८ ०२८ ०२
ते नो गोपा अपाच्यास् त उदक् त इत्था न्यक् ।
पुरस्तात् सर्वया विशा ॥ ८ ०२८ ०३
यथा वशन्ति देवास् तथेद् असत् तद् एषां नकिर् आ मिनत् ।
अरावा चन मर्त्यः ॥ ८ ०२८ ०४
सप्तानां सप्त ऋष्टयः सप्त द्युम्नान्य् एषाम् ।
सप्तो अधि श्रियो धिरे ॥ ८ ०२८ ०५

(६४९)
बभ्रुर् एको विषुणः सूनरो युवाञ्ज्य् अङ्क्ते हिरण्ययम् ॥ ८ ०२९ ०१
योनिम् एक आ ससाद द्योतनो ऽन्तर् देवेषु मेधिरः ॥ ८ ०२९ ०२
वाशीम् एको बिभर्ति हस्त आयसीम् अन्तर् देवेषु निध्रुविः ॥ ८ ०२९ ०३
वज्रम् एको बिभर्ति हस्त आहितं तेन वृत्राणि जिघ्नते ॥ ८ ०२९ ०४
तिग्मम् एको बिभर्ति हस्त आयुधं शुचिर् उग्रो जलाषभेषजः ॥ ८ ०२९ ०५
पथ एकः पीपाय तस्करो यथाँ एष वेद निधीनाम् ॥ ८ ०२९ ०६

त्रीण्य् एक उरुगायो वि चक्रमे यत्र देवासो मदन्ति ॥ ८ ०२९ ०७
विभिर् द्वा चरत एकया सह प्र प्रवासेव वसतः ॥ ८ ०२९ ०८
सदो द्वा चक्राते उपमा दिवि सम्राजा सर्पिरासुती ॥ ८ ०२९ ०९
अर्चन्त एके महि साम मन्वत तेन सूर्यम् अरोचयन् ॥ ८ ०२९ १०

(६५०)
नहि वो अस्त्य् अर्भको देवासो न कुमारकः ।
विश्वे सतोमहान्त इत् ॥ ८ ०३० ०१
इति स्तुतासो असथा रिशादसो ये स्थ त्रयश् च त्रिंशच् च ।
मनोर् देवा यज्ञियासः ॥ ८ ०३० ०२
ते नस् त्राध्वं ते ऽवत त उ नो अधि वोचत ।
मा नः पथः पित्र्यान् मानवाद् अधि दूरं नैष्ट परावतः ॥ ८ ०३० ०३
ये देवास इह स्थन विश्वे वैश्वानरा उत ।
अस्मभ्यं शर्म सप्रथो गवे ऽश्वाय यच्छत ॥ ८ ०३० ०४

(६५१)
यो यजाति यजात इत् सुनवच् च पचाति च ।
ब्रह्मेद् इन्द्रस्य चाकनत् ॥ ८ ०३१ ०१
पुरोळाशं यो अस्मै सोमं ररत आशिरम् ।
पाद् इत् तं शक्रो अंहसः ॥ ८ ०३१ ०२
तस्य द्युमाꣳ असद् रथो देवजूतः स शूशुवत् ।
विश्वा वन्वन्न् अमित्रिया ॥ ८ ०३१ ०३
अस्य प्रजावती गृहे ऽसश्चन्ती दिवे-दिवे ।
इळा धेनुमती दुहे ॥ ८ ०३१ ०४
या दम्पती समनसा सुनुत आ च धावतः ।
देवासो नित्ययाशिरा ॥ ८ ०३१ ०५

प्रति प्राशव्याँ इतः सम्यञ्चा बर्हिर् आशाते ।
न ता वाजेषु वायतः ॥ ८ ०३१ ०६
न देवानाम् अपि ह्नुतः सुमतिं न जुगुक्षतः ।
श्रवो बृहद् विवासतः ॥ ८ ०३१ ०७
पुत्रिणा ता कुमारिणा विश्वम् आयुर् व्य् अश्नुतः ।
उभा हिरण्यपेशसा ॥ ८ ०३१ ०८
वीतिहोत्रा कृतद्वसू दशस्यन्तामृताय कम् ।
सम् ऊधो रोमशं हतो देवेषु कृणुतो दुवः ॥ ८ ०३१ ०९
आ शर्म पर्वतानां वृणीमहे नदीनाम् ।
आ विष्णोः सचाभुवः ॥ ८ ०३१ १०
ऐतु पूषा रयिर् भगः स्वस्ति सर्वधातमः ।
उरुर् अध्वा स्वस्तये ॥ ८ ०३१ ११
अरमतिर् अनर्वणो विश्वो देवस्य मनसा ।
आदित्यानाम् अनेह इत् ॥ ८ ०३१ १२
यथा नो मित्रो अर्यमा वरुणः सन्ति गोपाः ।
सुगा ऋतस्य पन्थाः ॥ ८ ०३१ १३
अग्निं वः पूर्व्यं गिरा देवम् ईळे वसूनाम् ।
सपर्यन्तः पुरुप्रियम् मित्रं न क्षेत्रसाधसम् ॥ ८ ०३१ १४
मक्षू देववतो रथः शूरो वा पृत्सु कासु चित् ।
देवानां य इन् मनो यजमान इयक्षत्य् अभीद् अयज्वनो भुवत् ॥ ८ ०३१ १५
न यजमान रिष्यसि न सुन्वान न देवयो ।
देवानां य इन् मनो यजमान इयक्षत्य् अभीद् अयज्वनो भुवत् ॥ ८ ०३१ १६
नकिष् टं कर्मणा नशन् न प्र योषन् न योषति ।
देवानां य इन् मनो यजमान इयक्षत्य् अभीद् अयज्वनो भुवत् ॥ ८ ०३१ १७
असद् अत्र सुवीर्यम् उत त्यद् आश्वश्व्यम् ।
देवानां य इन् मनो यजमान इयक्षत्य् अभीद् अयज्वनो भुवत् ॥ ८ ०३१ १८

(६५२)

प्र कृतान्य् ऋजीषिणः कण्वा इन्द्रस्य गाथया ।
मदे सोमस्य वोचत ॥ ८ ०३२ ०१
यः सृबिन्दम् अनर्शनिम् पिप्रुं दासम् अहीशुवम् ।
वधीद् उग्रो रिणन्न् अपः ॥ ८ ०३२ ०२
न्य् अर्बुदस्य विष्टपं वर्ष्माणम् बृहतस् तिर ।
कृषे तद् इन्द्र पौंस्यम् ॥ ८ ०३२ ०३
प्रति श्रुताय वो धृषत् तूर्णाशं न गिरेर् अधि ।
हुवे सुशिप्रम् ऊतये ॥ ८ ०३२ ०४
स गोर् अश्वस्य वि व्रजम् मन्दानः सोम्येभ्यः ।
पुरं न शूर दर्षसि ॥ ८ ०३२ ०५
यदि मे रारणः सुत उक्थे वा दधसे चनः ।
आराद् उप स्वधा गहि ॥ ८ ०३२ ०६
वयं घा ते अपि ष्मसि स्तोतार इन्द्र गिर्वणः ।
त्वं नो जिन्व सोमपाः ॥ ८ ०३२ ०७
उत नः पितुम् आ भर संरराणो अविक्षितम् ।
मघवन् भूरि ते वसु ॥ ८ ०३२ ०८
उत नो गोमतस् कृधि हिरण्यवतो अश्विनः ।
इळाभिः सं रभेमहि ॥ ८ ०३२ ०९
बृबदुक्थं हवामहे सृप्रकरस्नम् ऊतये ।
साधु कृण्वन्तम् अवसे ॥ ८ ०३२ १०
यः संस्थे चिच् छतक्रतुर् आद् ईं कृणोति वृत्रहा ।
जरितृभ्यः पुरूवसुः ॥ ८ ०३२ ११
स नः शक्रश् चिद् आ शकद् दानवाँ अन्तराभरः ।
इन्द्रो विश्वाभिर् ऊतिभिः ॥ ८ ०३२ १२
यो रायो ऽवनिर् महान् सुपारः सुन्वतः सखा ।
तम् इन्द्रम् अभि गायत ॥ ८ ०३२ १३
आयन्तारम् महि स्थिरम् पृतनासु श्रवोजितम् ।

भूरेर् ईशानम् ओजसा ॥ ८ ०३२ १४
नकिर् अस्य शचीनां नियन्ता सूनृतानाम् ।
नकिर् वक्ता न दाद् इति ॥ ८ ०३२ १५
न नूनम् ब्रह्मणाम् ऋणम् प्राशूनाम् अस्ति सुन्वताम् ।
न सोमो अप्रता पपे ॥ ८ ०३२ १६
पन्य इद् उप गायत पन्य उक्थानि शंसत ।
ब्रह्मा कृणोत पन्य इत् ॥ ८ ०३२ १७
पन्य आ दर्दिरच् छता सहस्रा वाज्य् अवृतः ।
इन्द्रो यो यज्वनो वृधः ॥ ८ ०३२ १८
वि षू चर स्वधा अनु कृष्टीनाम् अन्व् आहुवः ।
इन्द्र पिब सुतानाम् ॥ ८ ०३२ १९
पिब स्वधैनवानाम् उत यस् तुग्र्ये सचा ।
उतायम् इन्द्र यस् तव ॥ ८ ०३२ २०
अतीहि मन्युषाविणं सुषुवांसम् उपारणे ।
इमं रातं सुतम् पिब ॥ ८ ०३२ २१
इहि तिस्रः परावत इहि पञ्च जनाँ अति ।
धेना इन्द्रावचाकशत् ॥ ८ ०३२ २२
सूर्यो रश्मिं यथा सृजा त्वा यच्छन्तु मे गिरः ।
निम्नम् आपो न सध्र्यक् ॥ ८ ०३२ २३
अध्वर्यव् आ तु हि षिञ्च सोमं वीराय शिप्रिणे ।
भरा सुतस्य पीतये ॥ ८ ०३२ २४
य उद्नः फलिगम् भिनन् न्यक् सिन्धूँर् अवासृजत् ।
यो गोषु पक्वं धारयत् ॥ ८ ०३२ २५
अहन् वृत्रम् ऋचीषम और्णवाभम् अहीशुवम् ।
हिमेनाविध्यद् अर्बुदम् ॥ ८ ०३२ २६
प्र व उग्राय निष्टुरे ऽषाळ्हाय प्रसक्षिणे ।
देवत्तम् ब्रह्म गायत ॥ ८ ०३२ २७
यो विश्वान्य् अभि व्रता सोमस्य मदे अन्धसः ।

इन्द्रो॑ दे॒वेषु॒ चेत॑ति ॥ ८ ०३२ २८
इ॒ह त्या स॑ध॒माद्या॒ हरी॒ हिर॑ण्यकेश्या ।
वो॒ळ्हाम् अ॒भि प्रयो॑ हि॒तम् ॥ ८ ०३२ २९
अ॒र्वाञ्चं॑ त्वा पुरुष्टुत प्रि॒यमे॑धस्तुता॒ हरी॑ ।
सो॒म॒पेया॑य वक्षतः ॥ ८ ०३२ ३०

(६५३)
व॒यं घ॑ त्वा सु॒ताव॑न्त॒ आपो॒ न वृ॒क्तब॑र्हिषः ।
प॒वित्र॑स्य प्र॒स्रव॑णेषु वृत्रह॒न् परि॑ स्तो॒तार॑ आसते ॥ ८ ०३३ ०१
स्वर॑न्ति त्वा सु॒ते नरो॒ वसो॑ निरे॒क उ॒क्थिनः॑ ।
क॒दा सु॒तं तृ॑षा॒ण ओक॒ आ ग॑म॒ इन्द्र॑ स्व॒ब्दीव॒ वंस॑गः ॥ ८ ०३३ ०२
कण्वे॑भिर् धृष्ण॒व् आ धृ॒षद् वाजं॑ दर्षि सह॒स्रिण॑म् ।
पि॒शङ्ग॑रूपम् मघवन् विचर्षणे म॒क्षू गोम॑न्तम् ईमहे ॥ ८ ०३३ ०३
पा॒हि गायान्ध॑सो॒ मद॒ इन्द्रा॑य मेध्यातिथे ।
यः सम्मि॑श्लो॒ हर्यो॒र् यः सु॒ते सचा॑ व॒ज्री रथो॑ हि॒रण्ययः॑ ॥ ८ ०३३ ०४
यः सु॒षव्यः॑ सु॒दक्षि॑ण इ॒नो यः सु॒क्रतु॑र् गृ॒णे ।
य आ॑क॒रः स॒हस्रा॒ यः श॒ताम॑घ॒ इन्द्रो॒ यः पू॒र्भिद् आ॑रि॒तः ॥ ८ ०३३ ०५
यो धृ॑षि॒तो यो ऽवृ॑तो॒ यो अस्ति॒ श्मश्रु॑षु॒ श्रि॒तः ।
विभू॑तद्युम्न॒श् च्यव॑नः पुरुष्टु॒तः क्रत्वा॒ गौर् इ॑व शा॒किनः॑ ॥ ८ ०३३ ०६
क ईं॑ वेद सु॒ते सचा॒ पिब॑न्तं॒ कद् वयो॑ दधे ।
अ॒यं यः पुरो॑ विभि॒नत्त्य् ओज॑सा मन्दा॒नः शि॒प्र्य् अन्ध॑सः ॥ ८ ०३३ ०७
दा॒ना मृ॒गो न वा॑र॒णः पु॑रु॒त्रा च॒रथं॑ दधे ।
नकि॑ष् ट्वा॒ नि य॑म॒द् आ सु॒ते ग॑मो म॒हांश् च॑र॒स्य् ओज॑सा ॥ ८ ०३३ ०८
य उ॒ग्रः सन्न् अनि॑ष्टृत स्थि॒रो रणा॑य॒ संस्कृ॑तः ।
यदि॑ स्तो॒तुर् म॒घवा॑ शृ॒णव॒द् हवं॒ नेन्द्रो॑ योष॒त्य् आ ग॑मत् ॥ ८ ०३३ ०९
स॒त्यम् इ॒त्था वृषेद् अ॑सि॒ वृष॑जूति॒र् नो ऽवृ॑तः ।
वृषा॒ ह्य् उग्र शृ॑ण्वि॒षे प॑रा॒वति॒ वृषो॑ अर्वा॒वति॑ श्रु॒तः ॥ ८ ०३३ १०

वृष॑णस् ते अ॒भीश॑वो॒ वृषा॒ कशा॑ हिर॒ण्ययी॑ ।
वृषा॒ रथो॑ मघव॒न् वृष॑णा॒ हरी॒ वृषा॒ त्वं श॑तक्रतो ॥ ८ ०३३ ११
वृषा॒ सोता॑ सुनोतु ते॒ वृष॑न्न् ऋजीपि॒न्न् आ भ॑र ।
वृषा॑ दधन्वे॒ वृष॑णं न॒दीष्व् आ तुभ्यं॑ स्थातर् हरीणाम् ॥ ८ ०३३ १२
एन्द्र॑ याहि पी॒तये॒ मधु॑ शविष्ठ सो॒म्यम् ।
नायम् अच्छा॑ म॒घवा॑ शृ॒णव॒द् गिरो॒ ब्रह्मो॒क्था च॑ सु॒क्रतुः॑ ॥ ८ ०३३ १३
वह॑न्तु त्वा र॒थेष्ठाम् आ हर॑यो र॒थयुजः॑ ।
ति॒रश् चि॑द् अ॒र्यं सव॑नानि वृत्रहन्न् अ॒न्येषां॒ या श॑तक्रतो ॥ ८ ०३३ १४
अ॒स्माक॑म् अ॒द्यान्त॑मं॒ स्तोमं॑ धिष्व महामह ।
अ॒स्माकं॑ ते॒ सव॑ना सन्तु॒ शंत॑मा॒ मदा॑य द्युक्ष सोमपाः ॥ ८ ०३३ १५
न॒हि षस् तव॒ नो मम॑ शा॒स्त्रे अ॒न्यस्य॒ रण्य॑ति ।
यो अ॒स्मान् वी॒र आन॑यत् ॥ ८ ०३३ १६
इन्द्र॑श् चिद् घा॒ तद् अ॑ब्रवीत् स्त्रि॒या अ॑शा॒स्यम् मनः॑ ।
उ॒तो अह॒ क्रतुं॑ र॒घुम् ॥ ८ ०३३ १७
सप्ती॑ चिद् घा मद॒च्युता॑ मिथु॒ना व॑हतो॒ रथ॑म् ।
ए॒वेद् धूर् वृष्ण॒ उत्त॑रा ॥ ८ ०३३ १८
अ॒धः प॑श्यस्व॒ मोपरि॑ संत॒राम् पा॑द॒कौ ह॑र ।
मा ते॑ कशप्ल॒कौ दृ॑श॒न् स्त्री हि ब्र॒ह्मा ब॒भूवि॑थ ॥ ८ ०३३ १९

(६५४)
एन्द्र॑ याहि॒ हरि॑भि॒र् उप॒ कण्व॑स्य सुष्टु॒तिम् ।
दि॒वो अ॒मुष्य॒ शास॑तो॒ दिवं॑ य॒य दिवा॑वसो ॥ ८ ०३४ ०१
आ त्वा॒ ग्रावा॒ वद॑न्न् इ॒ह सो॒मी घोषे॑ण यच्छतु ।
दि॒वो अ॒मुष्य॒ शास॑तो॒ दिवं॑ य॒य दिवा॑वसो ॥ ८ ०३४ ०२
अत्रा॒ वि ने॒मिर् ए॑षा॒म् उ॒रां न धू॑नुते॒ वृकः॑ ।
दि॒वो अ॒मुष्य॒ शास॑तो॒ दिवं॑ य॒य दिवा॑वसो ॥ ८ ०३४ ०३
आ त्वा॒ कण्वा॑ इ॒हाव॑से॒ हव॑न्ते॒ वाज॑सातये ।

दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ८ ०३४ ०४
दधामि ते सुतानां वृष्णे न पूर्वपाय्यम् ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ८ ०३४ ०५
स्मत्पुरंधिर् न आ गहि विश्वतोधीर् न ऊतये ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ८ ०३४ ०६
आ नो याहि महेमते सहस्रोते शतामघ ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ८ ०३४ ०७
आ त्वा होता मनुर्हितो देवत्रा वक्षद् ईड्यः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ८ ०३४ ०८
आ त्वा मदच्युता हरी श्येनम् पक्षेव वक्षतः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ८ ०३४ ०९
आ याह्य् अर्य आ परि स्वाहा सोमस्य पीतये ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ८ ०३४ १०
आ नो याह्य् उपश्रुत्य् उक्थेषु रणया इह ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ८ ०३४ ११
सरूपैर् आ सु नो गहि सम्भृतैः सम्भृताश्वः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ८ ०३४ १२
आ याहि पर्वतेभ्यः समुद्रस्याधि विष्टपः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ८ ०३४ १३
आ नो गव्यान्य् अश्व्या सहस्रा शूर दर्दृहि ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ८ ०३४ १४
आ नः सहस्रशो भरायुतानि शतानि च ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ८ ०३४ १५
आ यद् इन्द्रश् च दद्वहे सहस्रं वसुरोचिषः ।
ओजिष्ठम् अश्व्यम् पशुम् ॥ ८ ०३४ १६
य ऋज्रा वातरंहसो ऽरुषासो रघुष्यदः ।
भ्राजन्ते सूर्या इव ॥ ८ ०३४ १७
पारावतस्य रातिषु द्रवच्चक्रेष्व् आशुषु ।

तिष्ठं॒ वन॑स्य॒ मध्य॒ आ ॥ ८ ०३४ १८

(६५५)
अ॒ग्निनेन्द्रे॑ण॒ वरु॑णेन॒ विष्णु॑नादि॒त्यै रु॒द्रैर् वसु॑भिः सचा॒भुवा॑ ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण च॒ सोम॑म् पिबतम् अश्विना ॥ ८ ०३५ ०१
विश्वा॑भिर् धी॒भिर् भुव॑नेन वाजिना दि॒वा पृ॑थि॒व्याद्रि॑भिः सचा॒भुवा॑ ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण च॒ सोम॑म् पिबतम् अश्विना ॥ ८ ०३५ ०२
विश्वै॑र् दे॒वैस् त्रि॒भिर् ए॑काद॒शैर् इ॒हाद्भिर् म॒रुद्भि॒र् भृगु॑भिः सचा॒भुवा॑ ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण च॒ सोम॑म् पिबतम् अश्विना ॥ ८ ०३५ ०३
जु॒षेथां॑ य॒ज्ञम् बोध॑तं॒ हव॑स्य मे॒ विश्वे॒ह दे॑वौ॒ सव॒नाव॑ गच्छतम् ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण॒ चेषं॑ नो वोळ्हम् अश्विना ॥ ८ ०३५ ०४
स्तोमं॑ जुषेथां युव॒शेव॑ क॒न्यनां॒ विश्वे॒ह दे॑वौ॒ सव॒नाव॑ गच्छतम् ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण॒ चेषं॑ नो वोळ्हम् अश्विना ॥ ८ ०३५ ०५
गिरो॑ जुषेथाम् अध्व॒रं जु॑षेथां॒ विश्वे॒ह दे॑वौ॒ सव॒नाव॑ गच्छतम् ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण॒ चेषं॑ नो वोळ्हम् अश्विना ॥ ८ ०३५ ०६
हा॒रि॒द्र॒वेव॑ पतथो॒ वनेद् उप॒ सोमं॑ सु॒तम् म॑हि॒षेवाव॑ गच्छथः ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण च॒ त्रिर् व॒र्तिर् या॑तम् अश्विना ॥ ८ ०३५ ०७
हं॒साव् इ॑व पतथो अध्व॒गाव् इ॑व॒ सोमं॑ सु॒तम् म॑हि॒षेवाव॑ गच्छथः ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण च॒ त्रिर् व॒र्तिर् या॑तम् अश्विना ॥ ८ ०३५ ०८
श्ये॒नाव् इ॑व पतथो ह॒व्यदा॑तये॒ सोमं॑ सु॒तम् म॑हि॒षेवाव॑ गच्छथः ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण च॒ त्रिर् व॒र्तिर् या॑तम् अश्विना ॥ ८ ०३५ ०९
पिब॑तं च तृप्णु॒तं चा च॑ गच्छतम् प्र॒जां च॑ ध॒त्तं द्रवि॑णं च धत्तम् ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण॒ चोर्जं॑ नो धत्तम् अश्विना ॥ ८ ०३५ १०
जय॑तं च॒ प्र स्तु॒तं च॒ प्र चा॑वतम् प्र॒जां च॑ ध॒त्तं द्रवि॑णं च धत्तम् ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण॒ चोर्जं॑ नो धत्तम् अश्विना ॥ ८ ०३५ ११
ह॒तं च॒ शत्रू॒न् यत॑तं च मि॒त्रिणः॑ प्र॒जां च॑ ध॒त्तं द्रवि॑णं च धत्तम् ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण॒ चोर्जं॑ नो धत्तम् अश्विना ॥ ८ ०३५ १२

मि॒त्रावरु॑णवन्ता उ॒त धर्म॑वन्ता म॒रुत्व॑न्ता जरि॒तुर् गच्छ॑थो॒ हव॑म् ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण चादि॒त्यैर् या॑तम् अश्विना ॥ ८ ०३५ १३
अङ्गि॑रस्वन्ता उ॒त विष्णु॑वन्ता म॒रुत्व॑न्ता जरि॒तुर् गच्छ॑थो॒ हव॑म् ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण चादि॒त्यैर् या॑तम् अश्विना ॥ ८ ०३५ १४
ऋ॒भु॒मन्ता॑ वृषणा॒ वाज॑वन्ता म॒रुत्व॑न्ता जरि॒तुर् गच्छ॑थो॒ हव॑म् ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण चादि॒त्यैर् या॑तम् अश्विना ॥ ८ ०३५ १५
ब्रह्म॑ जिन्वतम् उ॒त जि॑न्वतं॒ धियो॑ ह॒तं रक्षां॑सि॒ सेध॑तम् अमी॑वाः ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण च॒ सोमं॑ सुन्व॒तो अ॑श्विना ॥ ८ ०३५ १६
क्ष॒त्रं जि॑न्वतम् उ॒त जि॑न्वतं॒ नॄन् ह॒तं रक्षां॑सि॒ सेध॑तम् अमी॑वाः ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण च॒ सोमं॑ सुन्व॒तो अ॑श्विना ॥ ८ ०३५ १७
धे॒नूर् जि॑न्वतम् उ॒त जि॑न्वतं॒ विशो॑ ह॒तं रक्षां॑सि॒ सेध॑तम् अमी॑वाः ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण च॒ सोमं॑ सुन्व॒तो अ॑श्विना ॥ ८ ०३५ १८
अत्रे॑र् इव शृणुतम् पू॒र्व्यस्तु॑तिं श्या॒वाश्व॑स्य सुन्व॒तो म॑दच्युता ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण चा॒श्विना॑ ति॒रोअ॑ह्न्यम् ॥ ८ ०३५ १९
सर्गाँ॑ इव सृजतं सुष्टु॒तीर् उप॑ श्या॒वाश्व॑स्य सुन्व॒तो म॑दच्युता ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण चा॒श्विना॑ ति॒रोअ॑ह्न्यम् ॥ ८ ०३५ २०
र॒श्मीँर् इ॑व यच्छतम् अध्व॒राँ उप॑ श्या॒वाश्व॑स्य सुन्व॒तो म॑दच्युता ।
स॒जोष॑सा उ॒षसा॒ सूर्ये॑ण चा॒श्विना॑ ति॒रोअ॑ह्न्यम् ॥ ८ ०३५ २१
अ॒र्वाग् र॒थं नि य॑च्छतम् पिब॑तं सो॒म्यम् मधु॑ ।
आ या॑तम् अश्वि॒ना ग॑तम् अव॒स्युर् वा॑म् अ॒हं हु॑वे ध॒त्तं रत्ना॑नि दा॒शुषे॑ ॥ ८ ०३५ २२
न॒मो॒वा॒के प्रस्थि॑ते अध्व॒रे न॑रा वि॒वक्ष॑णस्य पी॒तये॑ ।
आ या॑तम् अश्वि॒ना ग॑तम् अव॒स्युर् वा॑म् अ॒हं हु॑वे ध॒त्तं रत्ना॑नि दा॒शुषे॑ ॥ ८ ०३५ २३
स्वाहा॑कृतस्य तृम्पतं सु॒तस्य॑ दे॒वाव् अन्ध॑सः ।
आ या॑तम् अश्वि॒ना ग॑तम् अव॒स्युर् वा॑म् अ॒हं हु॑वे ध॒त्तं रत्ना॑नि दा॒शुषे॑ ॥ ८ ०३५ २४

(६५६)
अ॒वि॒तासि॑ सुन्व॒तो वृ॒क्तब॑र्हिषः पिबा॒ सोम॒म् मदा॑य॒ कं श॑तक्रतो ।

यं ते भागम् अधारयन् विश्वाः सेहानः पृतना ।
उरु ज्रयः सम् अप्सुजिन् मरुत्वाँ इन्द्र सत्पते ॥ ८ ०३६ ०१
प्राव स्तोतारम् मघवन्न् अव त्वाम् पिबा सोमम् मदाय कं शतक्रतो ।
यं ते भागम् अधारयन् विश्वाः सेहानः पृतना ।
उरु ज्रयः सम् अप्सुजिन् मरुत्वाँ इन्द्र सत्पते ॥ ८ ०३६ ०२
ऊर्जा देवाँ अवस्य् ओजसा त्वाम् पिबा सोमम् मदाय कं शतक्रतो ।
यं ते भागम् अधारयन् विश्वाः सेहानः पृतना ।
उरु ज्रयः सम् अप्सुजिन् मरुत्वाँ इन्द्र सत्पते ॥ ८ ०३६ ०३
जनिता दिवो जनिता पृथिव्याः पिबा सोमम् मदाय कं शतक्रतो ।
यं ते भागम् अधारयन् विश्वाः सेहानः पृतना ।
उरु ज्रयः सम् अप्सुजिन् मरुत्वाँ इन्द्र सत्पते ॥ ८ ०३६ ०४
जनिताश्वानां जनिता गवाम् असि पिबा सोमम् मदाय कं शतक्रतो ।
यं ते भागम् अधारयन् विश्वाः सेहानः पृतना ।
उरु ज्रयः सम् अप्सुजिन् मरुत्वाँ इन्द्र सत्पते ॥ ८ ०३६ ०५
अत्रीणां स्तोमम् अद्रिवो महस् कृधि पिबा सोमम् मदाय कं शतक्रतो ।
यं ते भागम् अधारयन् विश्वाः सेहानः पृतना ।
उरु ज्रयः सम् अप्सुजिन् मरुत्वाँ इन्द्र सत्पते ॥ ८ ०३६ ०६
श्यावाश्वस्य सुन्वतस् तथा शृणु यथाशृणोर् अत्रेः कर्माणि कृण्वतः ।
प्र त्रसदस्युम् आविथ त्वम् एक इन् नृषाह्य इन्द्र ब्रह्माणि वर्धयन् ॥ ८ ०३६ ०७

(६५७)
प्रेदम् ब्रह्म वृत्रतूर्येष्व् आविथ प्र सुन्वतः शचीपत ।
इन्द्र विश्वाभिर् ऊतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्न् अनेद्य पिबा सोमस्य वज्रिवः ॥ ८ ०३७ ०१
सेहान उग्र पृतना अभि द्रुहः शचीपत इन्द्र विश्वाभिर् ऊतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्न् अनेद्य पिबा सोमस्य वज्रिवः ॥ ८ ०३७ ०२
एकराळ् अस्य भुवनस्य राजसि शचीपत इन्द्र विश्वाभिर् ऊतिभिः ।

माध्यंदिनस्य सवनस्य वृत्रहन्न् अनेद्य पिबा सोमस्य वज्रिवः ॥ ८ ०३७ ०३
सस्थावाना यवयसि त्वम् एक इच् छचीपत इन्द्र विश्वाभिर् ऊतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्न् अनेद्य पिबा सोमस्य वज्रिवः ॥ ८ ०३७ ०४
क्षेमस्य च प्रयुजश् च त्वम् ईशिषे शचीपत इन्द्र विश्वाभिर् ऊतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्न् अनेद्य पिबा सोमस्य वज्रिवः ॥ ८ ०३७ ०५
क्षत्राय त्वम् अवसि न त्वम् आविथ शचीपत इन्द्र विश्वाभिर् ऊतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्न् अनेद्य पिबा सोमस्य वज्रिवः ॥ ८ ०३७ ०६
श्यावाश्वस्य रेभतस् तथा शृणु यथाशृणोर् अत्रेः कर्माणि कृण्वतः ।
प्र त्रसदस्युम् आविथ त्वम् एक इन् नृषाह्य इन्द्र क्षत्राणि वर्धयन् ॥ ८ ०३७ ०७

(६५८)
यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु ।
इन्द्राग्नी तस्य बोधतम् ॥ ८ ०३८ ०१
तोशासा रथयावाना वृत्रहणापराजिता ।
इन्द्राग्नी तस्य बोधतम् ॥ ८ ०३८ ०२
इदं वाम् मदिरम् मध्व् अधुक्षन्न् अद्रिभिर् नरः ।
इन्द्राग्नी तस्य बोधतम् ॥ ८ ०३८ ०३
जुषेथां यज्ञम् इष्टये सुतं सोमं सधस्तुती ।
इन्द्राग्नी आ गतं नरा ॥ ८ ०३८ ०४
इमा जुषेथां सवना येभिर् हव्यान्य् ऊहथुः ।
इन्द्राग्नी आ गतं नरा ॥ ८ ०३८ ०५
इमां गायत्रवर्तनिं जुषेथां सुष्टुतिम् मम ।
इन्द्राग्नी आ गतं नरा ॥ ८ ०३८ ०६
प्रातर्यावभिर् आ गतं देवेभिर् जेन्यावसू ।
इन्द्राग्नी सोमपीतये ॥ ८ ०३८ ०७
श्यावाश्वस्य सुन्वतो ऽत्रीणां शृणुतं हवम् ।
इन्द्राग्नी सोमपीतये ॥ ८ ०३८ ०८

ए॒वा वा॑म् अह्व ऊ॒तये॒ यथाहु॑वन्त॒ मेधि॑राः ।
इन्द्रा॑ग्नी॒ सोम॑पीतये ॥ ८ ०३८ ०९
आहं सर॑स्वतीवतोर् इन्द्रा॒ग्न्योर् अवो॑ वृणे ।
याभ्यां॑ गाय॒त्रम् ऋ॒च्यते॑ ॥ ८ ०३८ १०

(६५९)
अ॒ग्निम् अ॑स्तोष्य् ऋ॒ग्मिय॑म् अ॒ग्निम् ई॒ळा य॒जध्यै॑ ।
अ॒ग्निर् दे॒वाꣳ अ॑नक्तु न उ॒भे हि वि॒दथे॑ क॒विर् ।
अ॒न्तश् चर॑ति दू॒त्य१॒॑ नभ॑न्ताम् अन्य॒के स॑मे ॥ ८ ०३९ ०१
न्य् अग्ने॒ नव्य॑सा॒ वच॑स् त॒नूषु॒ शंस॑म् एषाम् ।
न्य् अरा॑ती॒ ररा॑व्णां॒ विश्वा॑ अ॒र्यो अरा॑तीर् ।
इ॒तो यु॑च्छन्त्व् आ॒मुरो॒ नभ॑न्ताम् अन्य॒के स॑मे ॥ ८ ०३९ ०२
अग्ने॒ मन्मा॑नि॒ तुभ्य॒ं कं घृ॒तं न जु॑ह्व आ॒सनि॑ ।
स दे॒वेषु॒ प्र चि॑किद्धि॒ त्वं ह्य॒ असि॑ पू॒र्व्यः ।
शि॒वो दू॒तो वि॒वस्व॑तो॒ नभ॑न्ताम् अन्य॒के स॑मे ॥ ८ ०३९ ०३
तत्-त॑द् अ॒ग्निर् वयो॑ दधे॒ यथा॑-यथा कृप॒ण्यति॑ ।
ऊ॒र्जाहु॑ति॒र् वसू॑नां॒ शं च॒ योश् च॒ मयो॑ दधे ।
विश्व॑स्यै दे॒वहू॑त्यै॒ नभ॑न्ताम् अन्य॒के स॑मे ॥ ८ ०३९ ०४
स चि॑केत॒ सही॑यसा॒ग्निश् चि॒त्रेण॒ कर्म॑णा ।
स होता॒ शश्व॑तीनां॒ दक्षि॑णाभिर् अ॒भीवृ॑त ।
इ॒नोति॑ च प्रती॒व्य१॒॑ नभ॑न्ताम् अन्य॒के स॑मे ॥ ८ ०३९ ०५
अ॒ग्निर् जा॒ता दे॒वाना॑म् अ॒ग्निर् वे॑द॒ मर्ता॑नाम् अपी॒च्यम् ।
अ॒ग्निः स द्र॑विणो॒दा अ॒ग्निर् द्वारा॒ व्य् ऊर्णुते ।
स्वाहु॒तो नवी॑यसा॒ नभ॑न्ताम् अन्य॒के स॑मे ॥ ८ ०३९ ०६
अ॒ग्निर् दे॒वेषु॒ संव॑सुः॒ स वि॒क्षु य॒ज्ञिया॒स्व् आ ।
स मु॒दा काव्या॑ पु॒रु विश्व॒म् भूमे॑व पुष्यति ।
दे॒वो दे॒वेषु॑ य॒ज्ञियो॒ नभ॑न्ताम् अन्य॒के स॑मे ॥ ८ ०३९ ०७

यो अग्निः सप्तमानुषः श्रितो विश्वेषु सिन्धुषु ।
तम् आगन्म त्रिपस्त्यम् मन्धातुर् दस्युहन्तमम् ।
अग्निं यज्ञेषु पूर्व्यं नभन्ताम् अन्यके समे ॥ ८ ०३९ ०८
अग्निस् त्रीणि त्रिधातून्य् आ क्षेति विदथा कविः ।
स त्रीँर् एकादशाँ इह यक्षच् च पिप्रयच् च नो ।
विप्रो दूतः परिष्कृतो नभन्ताम् अन्यके समे ॥ ८ ०३९ ०९
त्वं नो अग्न आयुषु त्वं देवेषु पूर्व्य वस्व एक इरज्यसि ।
त्वाम् आपः परिस्रुतः परि यन्ति स्वसेतवो नभन्ताम् अन्यके समे ॥ ८ ०३९ १०

(६६०)
इन्द्राग्नी युवं सु नः सहन्ता दासथो रयिम् ।
येन दृळ्हा समत्स्व् आ वीळु चित् साहिषीमह्य् अग्निर् वनेव वात इन् नभन्ताम् अन्यके समे ॥ ८ ०४० ०१
नहि वां वव्रयामहे ऽथेन्द्रम् इद् यजामहे शविष्ठं नृणां नरम् ।
स नः कदा चिद् अर्वता गमद् आ वाजसातये गमद् आ मेधसातये नभन्ताम् अन्यके समे ॥ ८ ०४० ०२
ता हि मध्यम् भराणाम् इन्द्राग्नी अधिक्षितः ।
ता उ कवित्वना कवी पृच्छ्यमाना सखीयते सं धीतम् अश्नुतं नरा नभन्ताम् अन्यके समे ॥ ८ ०४० ०३
अभ्य् अर्च नभाकवद् इन्द्राग्नी यजसा गिरा ।
ययोर् विश्वम् इदं जगद् इयं द्यौः पृथिवी मह्य् उपस्थे बिभृतो वसु नभन्ताम् अन्यके समे ॥ ८ ०४० ०४
प्र ब्रह्माणि नभाकवद् इन्द्राग्निभ्याम् इरज्यत ।
या सप्तबुध्नम् अर्णवं जिह्मबारम् अपोर्णुत इन्द्र ईशान ओजसा नभन्ताम् अन्यके समे ॥ ८ ०४० ०५
अपि वृश्च पुराणवद् व्रततेर् इव गुष्पितम् ओजो दासस्य दम्भय ।
वयं तद् अस्य सम्भृतं वस्व् इन्द्रेण वि भजेमहि नभन्ताम् अन्यके समे ॥ ८ ०४० ०६

यद् इन्द्राग्नी जना इमे विह्वयन्ते तना गिरा ।
अस्माकेभिर् नृभिर् वयं सासह्याम पृतन्यतो वनुयाम वनुष्यतो नभन्ताम् अन्यके समे
॥ ८ ०४० ०७
या नु श्वेताव् अवो दिव उच्चरात उप द्युभिः ।
इन्द्राग्न्योर् अनु व्रतम् उहाना यन्ति सिन्धवो यान् सीम् बन्धाद् अमुञ्चतां नभन्ताम्
अन्यके समे ॥ ८ ०४० ०८
पूर्वीष् ट इन्द्रोपमातयः पूर्वीर् उत प्रशस्तयः सूनो हिन्वस्य हरिवः ।
वस्वो वीरस्यापृचो या नु साधन्त नो धियो नभन्ताम् अन्यके समे ॥ ८ ०४० ०९
तं शिशीता सुवृक्तिभिस् त्वेषं सत्वानम् ऋग्मियम् ।
उतो नु चिद् य ओजसा शुष्णस्याण्डानि भेदति जेषत् स्वर्वतीर् अपो नभन्ताम् अन्यके
समे ॥ ८ ०४० १०
तं शिशीता स्वध्वरं सत्यं सत्वानम् ऋत्वियम् ।
उतो नु चिद् य ओहत आण्डा शुष्णस्य भेदत्य् अजैः स्वर्वतीर् अपो नभन्ताम् अन्यके
समे ॥ ८ ०४० ११
एवेन्द्राग्निभ्याम् पितृवन् नवीयो मन्धातृवद् अङ्गिरस्वद् अवाचि ।
त्रिधातुना शर्मणा पातम् अस्मान् वयं स्याम पतयो रयीणाम् ॥ ८ ०४० १२

(६६१)
अस्मा ऊ षु प्रभूतये वरुणाय मरुद्भ्यो ऽर्चा विदुष्टरेभ्यः ।
यो धीता मानुषाणाम् पश्वो गा इव रक्षति नभन्ताम् अन्यके समे ॥ ८ ०४१ ०१
तम् ऊ षु समना गिरा पितॄणां च मन्मभिः ।
नाभाकस्य प्रशस्तिभिर् यः सिन्धूनाम् उपोदये सप्तस्वसा स मध्यमो नभन्ताम् अन्यके
समे ॥ ८ ०४१ ०२
स क्षपः परि षस्वजे न्य् उ१स्रो मायया दधे स विश्वम् परि दर्शतः ।
तस्य वेनीर् अनु व्रतम् उषस् तिस्रो अवर्धयन् नभन्ताम् अन्यके समे ॥ ८ ०४१ ०३
यः ककुभो निधारयः पृथिव्याम् अधि दर्शतः ।
स माता पूर्व्यम् पदं तद् वरुणस्य सप्त्यं स हि गोपा इवेर्यो नभन्ताम् अन्यके समे ॥

८ ०४१ ०४
यो धर्ता भुवनानां य उस्राणाम् अपीच्या ३ वेद नामानि गुह्या ।
स कविः काव्या पुरु रूपं द्यौर् इव पुष्यति नभन्ताम् अन्यके समे ॥ ८ ०४१ ०५
यस्मिन् विश्वानि काव्या चक्रे नाभिर् इव श्रिता ।
त्रितं जूती सपर्यत व्रजे गावो न संयुजे युजे अश्वाँ अयुक्षत नभन्ताम् अन्यके समे ॥
८ ०४१ ०६
य आस्व् अत्क आशये विश्वा जातान्य् एषाम् ।
परि धामानि मर्मृशद् वरुणस्य पुरो गये विश्वे देवा अनु व्रतं नभन्ताम् अन्यके समे ॥
८ ०४१ ०७
स समुद्रो अपीच्यस् तुरो द्याम् इव रोहति नि यद् आसु यजुर् दधे ।
स माया अर्चिना पदास्तृणान् नाकम् आरुहन् नभन्ताम् अन्यके समे ॥ ८ ०४१ ०८
यस्य श्वेता विचक्षणा तिस्रो भूमीर् अधिक्षितः ।
त्रिर् उत्तराणि पप्रतुर् वरुणस्य ध्रुवं सदः स सप्तानाम् इरज्यति नभन्ताम् अन्यके समे
॥ ८ ०४१ ०९
यः श्वेताँ अधिनिर्णिजश् चक्रे कृष्णाँ अनु व्रता ।
स धाम पूर्व्यम् ममे य स्कम्भेन वि रोदसी अजो न द्याम् अधारयन् नभन्ताम् अन्यके
समे ॥ ८ ०४१ १०

(६६२)
अस्तभ्नाद् द्याम् असुरो विश्ववेदा अमिमीत वरिमाणम् पृथिव्याः ।
आसीदद् विश्वा भुवनानि सम्राड् विश्वेत् तानि वरुणस्य व्रतानि ॥ ८ ०४२ ०१
एवा वन्दस्व वरुणम् बृहन्तं नमस्या धीरम् अमृतस्य गोपाम् ।
स नः शर्म त्रिवरूथं वि यंसत् पातं नो द्यावापृथिवी उपस्थे ॥ ८ ०४२ ०२
इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं शिशाधि ।
ययाति विश्वा दुरिता तरेम सुतर्माणम् अधि नावं रुहेम ॥ ८ ०४२ ०३
आ वां ग्रावाणो अश्विना धीभिर् विप्रा अचुच्यवुः ।
नासत्या सोमपीतये नभन्ताम् अन्यके समे ॥ ८ ०४२ ०४
यथा वाम् अत्रिर् अश्विना गीर्भिर् विप्रो अजोहवीत् ।

नासत्या सोमपीतये नभन्ताम् अन्यके समे ॥ ८ ०४२ ०५
एवा वाम् अह्व ऊतये यथाहुवन्त मेधिराः ।
नासत्या सोमपीतये नभन्ताम् अन्यके समे ॥ ८ ०४२ ०६

(६६३)
इमे विप्रस्य वेधसो ऽग्नेर् अस्तृतयज्वनः ।
गिर स्तोमास ईरते ॥ ८ ०४३ ०१
अस्मै ते प्रतिहर्यते जातवेदो विचर्षणे ।
अग्ने जनामि सुष्टुतिम् ॥ ८ ०४३ ०२
आरोका इव घेद् अह तिग्मा अग्ने तव त्विषः ।
दद्भिर् वनानि बप्सति ॥ ८ ०४३ ०३
हरयो धूमकेतवो वातजूता उप द्यवि ।
यतन्ते वृथग् अग्नयः ॥ ८ ०४३ ०४
एते त्ये वृथग् अग्नय इद्धासः सम् अदृक्षत ।
उषसाम् इव केतवः ॥ ८ ०४३ ०५
कृष्णा रजांसि पत्सुतः प्रयाणे जातवेदसः ।
अग्निर् यद् रोधति क्षमि ॥ ८ ०४३ ०६
धासिं कृण्वान ओषधीर् बप्सद् अग्निर् न वायति ।
पुनर् यन् तरुणीर् अपि ॥ ८ ०४३ ०७
जिह्वाभिर् अह नन्नमद् अर्चिषा जञ्जणाभवन् ।
अग्निर् वनेषु रोचते ॥ ८ ०४३ ०८
अप्स्व् अग्ने सधिष् टव सौषधीर् अनु रुध्यसे ।
गर्भे सञ् जायसे पुनः ॥ ८ ०४३ ०९
उद् अग्ने तव तद् घृताद् अर्ची रोचत आहुतम् ।
निंसानं जुह्वो मुखे ॥ ८ ०४३ १०
उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे ।
स्तोमैर् विधेमाग्नये ॥ ८ ०४३ ११

उत त्वा नमसा वयं होतर् वरेण्यक्रतो ।
अग्ने समिद्भिर् ईमहे ॥ ८ ०४३ १२
उत त्वा भृगुवच् छुचे मनुष्वद् अग्न आहुत ।
अङ्गिरस्वद् धवामहे ॥ ८ ०४३ १३
त्वं ह्य् अग्ने अग्निना विप्रो विप्रेण सन् सता ।
सखा सख्या समिध्यसे ॥ ८ ०४३ १४
स त्वं विप्राय दाशुषे रयिं देहि सहस्रिणम् ।
अग्ने वीरवतीम् इषम् ॥ ८ ०४३ १५
अग्ने भ्रातः सहस्कृत रोहिदश्व शुचिव्रत ।
इमं स्तोमं जुषस्व मे ॥ ८ ०४३ १६
उत त्वाग्ने मम स्तुतो वाश्राय प्रतिहर्यते ।
गोष्ठं गाव इवाशत ॥ ८ ०४३ १७
तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक् ।
अग्ने कामाय येमिरे ॥ ८ ०४३ १८
अग्निं धीभिर् मनीषिणो मेधिरासो विपश्चितः ।
अद्मसद्याय हिन्विरे ॥ ८ ०४३ १९
तं त्वाम् अज्मेषु वाजिनं तन्वाना अग्ने अध्वरम् ।
वह्निं होतारम् ईळते ॥ ८ ०४३ २०
पुरुत्रा हि सदृङ्ङ् असि विशो विश्वा अनु प्रभुः ।
समत्सु त्वा हवामहे ॥ ८ ०४३ २१
तम् ईळिष्व य आहुतो ऽग्निर् विभ्राजते घृतैः ।
इमं नः शृणवद् धवम् ॥ ८ ०४३ २२
तं त्वा वयं हवामहे शृण्वन्तं जातवेदसम् ।
अग्ने घ्नन्तम् अप द्विषः ॥ ८ ०४३ २३
विशां राजानम् अद्भुतम् अध्यक्षं धर्मणाम् इमम् ।
अग्निम् ईळे स उ श्रवत् ॥ ८ ०४३ २४
अग्निं विश्वायुवेपसम् मर्यं न वाजिनं हितम् ।
सप्तिं न वाजयामसि ॥ ८ ०४३ २५

घ्नन् मृ॒ध्राण्य् अप॒ द्विषो॒ दह॒न् रक्षां॑सि वि॒श्वहा॑ ।
अग्ने॑ ति॒ग्मेन॑ दीदिहि ॥ ८ ०४३ २६
यं त्वा॒ जना॑स इन्ध॒ते म॑नु॒ष्वद् अ॑ङ्गिरस्तम ।
अग्ने॒ स बो॑धि मे॒ वचः॑ ॥ ८ ०४३ २७
यद् अ॑ग्ने दिवि॒जा अस्य् अ॑प्सु॒जा वा॑ सहस्कृत ।
तं त्वा॑ गी॒र्भिर् ह॑वामहे ॥ ८ ०४३ २८
तुभ्यं॒ घेत् ते जना॑ इ॒मे विश्वाः॑ सुक्षि॒तयः॒ पृथ॑क् ।
धा॒सिं हि॑न्वन्त्य् अत्त॑वे ॥ ८ ०४३ २९
ते घेद् अ॑ग्ने स्वा॒ध्यो ऽ॑हा॒ विश्वा॑ नृ॒चक्ष॑सः ।
तर॑न्तः स्याम दु॒र्गहा॑ ॥ ८ ०४३ ३०
अ॒ग्निम् म॒न्द्रम् पु॑रुप्रि॒यं शी॒रम् पा॑व॒कशो॑चिषम् ।
हृ॒द्भिर् म॒न्द्रेभि॑र् ईमहे ॥ ८ ०४३ ३१
स त्वम् अ॑ग्ने वि॒भाव॑सुः सृ॒जन् सूर्यो॑ न र॒श्मिभिः॑ ।
शर्ध॒न् तमां॑सि जिघ्नसे ॥ ८ ०४३ ३२
तत् ते॑ सहस्व ईमहे दा॒त्रं यन् नोप॒दस्य॑ति ।
त्वद् अ॑ग्ने॒ वार्यं॒ वसु॑ ॥ ८ ०४३ ३३

(६६४)
स॒मिधा॒ग्निं दु॑वस्यत घृ॒तैर् बो॑धय॒ताति॑थिम् ।
आस्मि॑न् ह॒व्या जु॑होतन ॥ ८ ०४४ ०१
अग्ने॒ स्तोमं॑ जुषस्व मे॒ वर्ध॑स्वा॒नेन॒ मन्म॑ना ।
प्रति॑ सू॒क्तानि॑ हर्य नः ॥ ८ ०४४ ०२
अ॒ग्निं दू॒तम् पु॒रो द॑धे हव्य॒वाह॒म् उप॑ ब्रुवे ।
दे॒वाँ आ सा॑दयाद् इ॒ह ॥ ८ ०४४ ०३
उत् ते॑ बृ॒हन्तो॑ अ॒र्चयः॑ समिधा॒नस्य॑ दीदिवः ।
अग्ने॑ शु॒क्रास॑ ईरते ॥ ८ ०४४ ०४
उप॑ त्वा जु॒ह्वो॒३ मम॑ घृ॒ताची॑र् यन्तु हर्यत ।

अग्ने हव्या जुषस्व नः ॥ ८ ०४४ ०५
मन्द्रं होतारम् ऋत्विजं चित्रभानुं विभावसुम् ।
अग्निम् ईळे स उ श्रवत् ॥ ८ ०४४ ०६
प्रत्नं होतारम् ईड्यं जुष्टम् अग्निं कविक्रतुम् ।
अध्वराणाम् अभिश्रियम् ॥ ८ ०४४ ०७
जुषाणो अङ्गिरस्तमेमा हव्यान्य् आनुषक् ।
अग्ने यज्ञं नय ऋतुथा ॥ ८ ०४४ ०८
समिधान उ सन्त्य शुक्रशोच इहा वह ।
चिकित्वान् दैव्यं जनम् ॥ ८ ०४४ ०९
विप्रं होतारम् अद्रुहं धूमकेतुं विभावसुम् ।
यज्ञानां केतुम् ईमहे ॥ ८ ०४४ १०
अग्ने नि पाहि नस् त्वम् प्रति ष्म देव रीषतः ।
भिन्धि द्वेषः सहस्कृत ॥ ८ ०४४ ११
अग्निः प्रत्नेन मन्मना शुम्भानस् तन्व स्वाम् ।
कविर् विप्रेण वावृधे ॥ ८ ०४४ १२
ऊर्जो नपातम् आ हुवे ऽग्निम् पावकशोचिषम् ।
अस्मिन् यज्ञे स्वध्वरे ॥ ८ ०४४ १३
स नो मित्रमहस् त्वम् अग्ने शुक्रेण शोचिषा ।
देवैर् आ सत्सि बर्हिषि ॥ ८ ०४४ १४
यो अग्निं तन्वो दमे देवम् मर्तः सपर्यति ।
तस्मा इद् दीदयद् वसु ॥ ८ ०४४ १५
अग्निर् मूर्धा दिवः ककुत् पतिः पृथिव्या अयम् ।
अपां रेतांसि जिन्वति ॥ ८ ०४४ १६
उद् अग्ने शुचयस् तव शुक्रा भ्राजन्त ईरते ।
तव ज्योतींष्य् अर्चयः ॥ ८ ०४४ १७
ईशिषे वार्यस्य हि दात्रस्याग्ने स्वर्पतिः ।
स्तोता स्यां तव शर्मणि ॥ ८ ०४४ १८
त्वाम् अग्ने मनीषिणस् त्वां हिन्वन्ति चित्तिभिः ।

त्वां वर्धन्तु नो गिरः ॥ ८ ०४४ १९
अदब्धस्य स्वधावतो दूतस्य रेभतः सदा ।
अग्नेः सख्यं वृणीमहे ॥ ८ ०४४ २०
अग्निः शुचिव्रततमः शुचिर् विप्रः शुचिः कविः ।
शुची रोचत आहुतः ॥ ८ ०४४ २१
उत त्वा धीतयो मम गिरो वर्धन्तु विश्वहा ।
अग्ने सख्यस्य बोधि नः ॥ ८ ०४४ २२
यद् अग्ने स्याम् अहं त्वं त्वं वा घा स्या अहम् ।
स्युष् टे सत्या इहाशिषः ॥ ८ ०४४ २३
वसुर् वसुपतिर् हि कम् अस्य् अग्ने विभावसुः ।
स्याम ते सुमताव् अपि ॥ ८ ०४४ २४
अग्ने धृतव्रताय ते समुद्रायेव सिन्धवः ।
गिरो वाश्रास ईरते ॥ ८ ०४४ २५
युवानं विश्पतिं कविं विश्वादम् पुरुवेपसम् ।
अग्निं शुम्भामि मन्मभिः ॥ ८ ०४४ २६
यज्ञानां रथ्ये वयं तिग्मजम्भाय वीळवे ।
स्तोमैर् इषेमाग्नये ॥ ८ ०४४ २७
अयम् अग्ने त्वे अपि जरिता भूतु सन्त्य ।
तस्मै पावक मृळय ॥ ८ ०४४ २८
धीरो ह्य् अस्य् अद्मसद् विप्रो न जागृविः सदा ।
अग्ने दीदयसि द्यवि ॥ ८ ०४४ २९
पुराग्ने दुरितेभ्यः पुरा मृध्रेभ्यः कवे ।
प्र ण आयुर् वसो तिर ॥ ८ ०४४ ३०

(६६५)
आ घा ये अग्निम् इन्धते स्तृणन्ति बर्हिर् आनुषक् ।
येषाम् इन्द्रो युवा सखा ॥ ८ ०४५ ०१

बृहन्न् इद् इध्म एषाम् भूरि शस्तम् पृथुः स्वरुः ।
येषाम् इन्द्रो युवा सखा ॥ ८ ०४५ ०२
अयुद्ध इद् युधा वृतं शूर आजति सत्वभिः ।
येषाम् इन्द्रो युवा सखा ॥ ८ ०४५ ०३
आ बुन्दं वृत्रहा ददे जातः पृच्छद् वि मातरम् ।
क उग्राः के ह शृण्विरे ॥ ८ ०४५ ०४
प्रति त्वा शवसी वदद् गिराव् अप्सो न योधिषत् ।
यस् ते शत्रुत्वम् आचके ॥ ८ ०४५ ०५
उत त्वम् मघवञ् छृणु यस् ते वष्टि ववक्षि तत् ।
यद् वीळयासि वीळु तत् ॥ ८ ०४५ ०६
यद् आजिं यात्य् आजिकृद् इन्द्रः स्वश्वयुर् उप ।
रथीतमो रथीनाम् ॥ ८ ०४५ ०७
वि षु विश्वा अभियुजो वज्रिन् विष्वग् यथा वृह ।
भवा नः सुश्रवस्तमः ॥ ८ ०४५ ०८
अस्माकं सु रथम् पुर इन्द्रः कृणोतु सातये ।
न यं धूर्वन्ति धूर्तयः ॥ ८ ०४५ ०९
वृज्याम ते परि द्विषो ऽरं ते शक्र दावने ।
गमेमेद् इन्द्र गोमतः ॥ ८ ०४५ १०
शनैश् चिद् यन्तो अद्रिवो ऽश्वावन्तः शतग्विनः ।
विवक्षणा अनेहसः ॥ ८ ०४५ ११
ऊर्ध्वा हि ते दिवे-दिवे सहस्रा सूनृता शता ।
जरितृभ्यो विमंहते ॥ ८ ०४५ १२
विद्मा हि त्वा धनंजयम् इन्द्र दृळ्हा चिद् आरुजम् ।
आदारिणं यथा गयम् ॥ ८ ०४५ १३
ककुहं चित् त्वा कवे मन्दन्तु धृष्णव् इन्दवः ।
आ त्वा पणिं यद् ईमहे ॥ ८ ०४५ १४
यस् ते रेवाँ अदाशुरिः प्रममर्ष मघत्तये ।
तस्य नो वेद आ भर ॥ ८ ०४५ १५

इ॒म उ॑ त्वा॒ वि च॑क्षते॒ सखा॑य इन्द्र सो॒मिनः॑ ।
पु॒ष्टाव॑न्तो॒ यथा॑ प॒शुम् ॥ ८ ०४५ १६
उ॒त त्वाब॑धिरं व॒यं श्रुत्क॑र्णं॒ सन्त॑म् ऊ॒तये॑ ।
दू॒राद् इ॒ह ह॑वामहे ॥ ८ ०४५ १७
यच् छु॑श्रू॒या इ॒मं हवं॑ दु॒र्मर्षं॑ चक्रिया उ॒त ।
भवे॑र् आ॒पिर् नो॒ अन्त॑मः ॥ ८ ०४५ १८
यच् चि॒द् धि ते॒ अपि॒ व्यथि॑र् जग॒न्वांसो॒ अम॑न्महि ।
गो॒दा इद् इ॑न्द्र बोधि नः ॥ ८ ०४५ १९
आ त्वा॑ र॒म्भं न जिव्र॑यो रर॒भ्मा श॑वसस् पते ।
उ॒श्मसि॑ त्वा स॒धस्थ॒ आ ॥ ८ ०४५ २०
स्तो॒त्रम् इन्द्रा॑य गायत पुरु॒नृम्णा॑य॒ सत्व॑ने ।
नकि॒र् यं वृ॑ण्व॒ते यु॒धि ॥ ८ ०४५ २१
अ॒भि त्वा॑ वृषभा सु॒ते सु॒तं सृ॑जामि पी॒तये॑ ।
तृ॒म्पा व्य् अ॑श्नुही॒ मद॑म् ॥ ८ ०४५ २२
मा त्वा॑ मू॒रा अ॑वि॒ष्यवो॒ मोप॒हस्वा॑न॒ आ द॑भन् ।
माकी॑म् ब्रह्म॒द्विषो॑ वनः ॥ ८ ०४५ २३
इ॒ह त्वा॒ गोप॑रीणसा म॒हे म॑न्दन्तु॒ राध॑से ।
सरो॑ गौ॒रो यथा॑ पिब ॥ ८ ०४५ २४
या वृ॑त्र॒हा प॑रा॒वति॒ सना॒ नवा॑ च चुच्यु॒वे ।
ता सं॒सत्सु॒ प्र वो॑चत ॥ ८ ०४५ २५
अपि॑बत् क॒द्रुवः॑ सु॒तम् इन्द्रः॑ स॒हस्र॑बाह्वे ।
अत्रा॑दिदिष्ट॒ पौंस्य॑म् ॥ ८ ०४५ २६
स॒त्यं तत् तु॒र्वशे॒ यदौ॒ विदा॑नो अ॒ह्नवा॒य्यम् ।
व्य् आनट् तु॒र्वणे॒ शमि॑ ॥ ८ ०४५ २७
त॒रणिं॑ वो॒ जना॑नां त्र॒दं वाज॑स्य॒ गोम॑तः ।
स॒मा॒नम् उ॒ प्र शं॑सिषम् ॥ ८ ०४५ २८
ऋ॒भु॒क्षणं॒ न वर्त॑व उ॒क्थेषु॑ तुग्र्या॒वृध॑म् ।
इन्द्रं॒ सोमे॒ सचा॑ सु॒ते ॥ ८ ०४५ २९

यः कृ॒न्तद् इद् वि यो॒न्यं त्रि॒शोका॑य गि॒रिम् पृ॒थुम् ।
गोभ्यो॑ गा॒तुं निरे॑तवे ॥ ८ ०४५ ३०
यद् द॑धि॒षे म॑न॒स्यसि॑ मन्दा॒नः प्रेद् इय॑क्षसि ।
मा तत् क॑र् इन्द्र मृ॒ळय॑ ॥ ८ ०४५ ३१
द॒भ्रं चि॒द् धि त्वाव॑तः कृ॒तं शृ॒ण्वे अधि॒ क्षमि॑ ।
जिगा॑त्व् इन्द्र ते॒ मनः॑ ॥ ८ ०४५ ३२
तवेद् उ॒ ताः सु॑की॒र्तयो ऽस॑न्न् उ॒त प्रश॑स्तयः ।
यद् इ॑न्द्र मृ॒ळया॑सि नः ॥ ८ ०४५ ३३
मा न॒ एक॑स्मिन्न् आग॑सि॒ मा द्वयो॑र् उ॒त त्रि॒षु ।
वधी॒र् मा शू॑र॒ भूरि॑षु ॥ ८ ०४५ ३४
बि॒भया॒ हि त्वाव॑त उ॒ग्राद् अ॑भिप्रभ॒ङ्गिणः॑ ।
द॒स्माद् अ॒हम् ऋ॑ती॒षहः॑ ॥ ८ ०४५ ३५
मा सख्यु॒ः शून॒म् आ वि॑दे॒ मा पु॒त्रस्य॑ प्रभूवसो ।
आ॒वृत्व॑द् भूतु ते॒ मनः॑ ॥ ८ ०४५ ३६
को नु म॑र्या॒ अमि॑थितः॒ सखा॒ सखा॑यम् अब्रवीत् ।
ज॒हा को अ॒स्मद् ई॑षते ॥ ८ ०४५ ३७
ए॒वारे॑ वृषभा सु॒ते ऽसि॑न्व॒न् भूर्य् आ॑वयः ।
श्व॒घ्नीव॑ नि॒वता॒ चर॑न् ॥ ८ ०४५ ३८
आ त॑ ए॒ता व॑चो॒युजा॒ हरी॑ गृभ्णे सु॒मद्र॑था ।
यद् ई॑म् ब्र॒ह्मभ्य॒ इद् ददः॑ ॥ ८ ०४५ ३९
भि॒न्धि विश्वा॒ अप॒ द्विषः॒ परि॒ बाधो॑ ज॒ही मृधः॑ ।
वसु॑ स्पा॒र्हं तद् आ भ॑र ॥ ८ ०४५ ४०
यद् वी॒ळाव् इ॑न्द्र॒ यत् स्थि॒रे यत् पर्शा॑ने॒ परा॑भृतम् ।
वसु॑ स्पा॒र्हं तद् आ भ॑र ॥ ८ ०४५ ४१
यस्य॑ ते वि॒श्वमा॑नुषो॒ भूरे॑र् द॒त्तस्य॒ वेद॑ति ।
वसु॑ स्पा॒र्हं तद् आ भ॑र ॥ ।

(६६६)
त्वावतः पुरूवसो वयम् इन्द्र प्रणेतः ।
स्मसि स्थातर् हरीणाम् ॥ ८ ०४६ ०१
त्वां हि सत्यम् अद्रिवो विद्म दातारम् इषाम् ।
विद्म दातारं रयीणाम् ॥ ८ ०४६ ०२
आ यस्य ते महिमानं शतमूते शतक्रतो ।
गीर्भिर् गृणन्ति कारवः ॥ ८ ०४६ ०३
सुनीथो घा स मर्त्यो यम् मरुतो यम् अर्यमा ।
मित्रः पान्त्य् अद्रुहः ॥ ८ ०४६ ०४
दधानो गोमद् अश्ववत् सुवीर्यम् आदित्यजूत एधते ।
सदा राया पुरुस्पृहा ॥ ८ ०४६ ०५
तम् इन्द्रं दानम् ईमहे शवसानम् अभीर्वम् ।
ईशानं राय ईमहे ॥ ८ ०४६ ०६
तस्मिन् हि सन्त्य् ऊतयो विश्वा अभीरवः सचा ।
तम् आ वहन्तु सप्तयः पुरूवसुम् मदाय हरयः सुतम् ॥ ८ ०४६ ०७
यस् ते मदो वरेण्यो य इन्द्र वृत्रहन्तमः ।
य आददिः स्व १ र् नृभिर् यः पृतनासु दुष्टरः ॥ ८ ०४६ ०८
यो दुष्टरो विश्ववार श्रवाय्यो वाजेष्व् अस्ति तरुता ।
स नः शविष्ठ सवना वसो गहि गमेम गोमति व्रजे ॥ ८ ०४६ ०९
गव्यो षु णो यथा पुराश्वयोत रथया ।
वरिवस्य महामह ॥ ८ ०४६ १०
नहि ते शूर राधसो ऽन्तं विन्दामि सत्रा ।
दशस्या नो मघवन् नू चिद् अद्रिवो धियो वाजेभिर् आविथ ॥ ८ ०४६ ११
य ऋष्वः श्रावयत्सखा विश्वेत् स वेद जनिमा पुरुष्टुतः ।
तं विश्वे मानुषा युगेन्द्रं हवन्ते तविषं यतस्रुचः ॥ ८ ०४६ १२
स नो वाजेष्व् अविता पुरूवसुः पुरस्थाता मघवा वृत्रहा भुवत् ॥ ८ ०४६ १३
अभि वो वीरम् अन्धसो मदेषु गाय गिरा महा विचेतसम् ।
इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा ॥ ८ ०४६ १४

द॒दी रेक्ण॑स् त॒न्वे द॒दिर् वसु॑ द॒दिर् वाजे॑षु पुरुहूत वा॒जिन॑म् ।
नू॒नम् अथ॑ ॥ ८ ०४६ १५
विश्वे॑षाम् इ॒रज्यन्त॒ं वसू॑नां सास॒ह्वांस॑ं चिद् अ॒स्य वर्प॑सः ।
कृ॒प॒य॒तो नू॒नम् अत्य् अथ॑ ॥ ८ ०४६ १६
म॒हः सु वो॒ अर॑म् इषे स्तवा॑महे मी॒ळ्हुषे॑ अरंग॒माय॒ जग्म॑ये । ।
य॒ज्ञेभि॑र् गी॒र्भिर् वि॒श्वम॑नुषाम् म॒रुता॑म् इयक्षसि॒ गाये॑ त्वा॒ नम॑सा गि॒रा ॥ ।
ये पा॒तय॑न्ते अज्म॑भिर् गिरी॒णां स्नुभि॑र् एषाम् ।
अ॒ज्ञम् म॑हि॒ष्वणी॑नां सु॒म्नं तु॑वि॒ष्वणी॑नाम् प्राध्व॒रे ॥ ८ ०४६ १८
प्र॒भ॒ङ्गं दु॑र्म॒तीनाम् इन्द्र॑ शवि॒ष्ठा भ॑र ।
र॒यिम् अ॒स्मभ्य॒ं युज्य॑ं चोदयन्मत॒े ज्येष्ठ॑ं चोदयन्मते ॥ ८ ०४६ १९
सनि॑तः सुस॑नित॒र् उग्र॒ चित्र॒ चेति॑ष्ठ सूनृ॑त ।
प्रा॒सहा॑ सम्रा॒ट् सहु॑रिं सह॑न्तम् भु॒ज्युं वाजे॑षु॒ पूर्व्य॑म् ॥ ८ ०४६ २०
आ स ए॑तु॒ य ईव॒द् आ॑ꣳ अदे॑वः पू॒र्तम् आ॑द॒दे ।
यथा॑ चि॒द् वशो॑ अ॒श्व्यः पृ॑थु॒श्रव॑सि कानी॒ते ऽस्या॒ व्युष्य् आ॑द॒दे ॥ ८ ०४६ २१
ष॒ष्टिं स॒हस्राश्व्य॑स्यायु॒तास॑न॒म् उष्ट्रा॑नां विंश॑तिं श॒ता ।
दश॒ श्यावी॑नां श॒ता दश॒ त्र्यरुषीणा॒ं दश॒ गवा॑ं स॒हस्रा॑ ॥ ८ ०४६ २२
दश॑ श्या॒वा ऋ॒धद्र॑यो वी॒तवा॑रास आ॒शवः॑ ।
म॒थ्रा ने॒मिं नि वा॑वृतुः ॥ ८ ०४६ २३
दाना॑सः पृथु॒श्रव॑सः कानी॒तस्य॑ सु॒राध॑सः ।
रथ॑ं हि॒रण्यय॒ं दद॒न् मंहि॑ष्ठः सू॒रिर् अ॑भूद् ।
वर्षि॑ष्ठम् अकृ॒त श्रवः॑ ॥ ८ ०४६ २४
आ नो॑ वायो म॒हे तने॑ या॒हि म॒खाय॒ पाज॑से ।
व॒यं हि ते॑ चकृ॒मा भूरि॑ दा॒वने॑ स॒द्यश् चि॒न् महि॑ दा॒वने॑ ॥ ८ ०४६ २५
यो अश्वे॑भिर् वह॑ते॒ वस्त॑ उ॒स्रास् त्रिः स॒प्त स॑प्तती॒नाम् ।
ए॒भिः सोमे॑भिः सोम॒सुद्भिः॑ सोमपा दा॒नाय॑ शुक्रपूतपाः ॥ ८ ०४६ २६
यो म॑ इ॒मं चि॑द् उ॒ त्मनाम॑न्दच् चि॒त्रं दा॒वने॑ ।
अ॒र॒ट्वे अक्षे॒ नहु॑षे सु॒कृत्व॑नि सु॒कृत्त॑राय सु॒क्रतुः॑ ॥ ८ ०४६ २७
उ॒च॒थ्ये॒ ३॑ वपु॑षि॒ यः स्व॒राळ् उ॒त वा॑यो घृत॒स्नाः ।

अश्वे॑षितं॒ रजे॑षितं॒ शुने॑षित॒म् प्राज्म॒ तद् इ॒दं नु तत् ॥ ८ ०४६ २८
अध॑ प्रि॒यम् इ॒षि॒राय॑ ष॒ष्टिं स॒हस्रा॑सनम् ।
अश्वा॑ना॒म् इन् न वृष्णा॑म् ॥ ८ ०४६ २९
गावो॒ न यू॒थम् उप॑ यन्ति॒ वध्र॑य॒ उप॒ मा य॑न्ति॒ वध्र॑यः ॥ ८ ०४६ ३०
अ॒ध यच् चार॑थे ग॒णे श॒तम् उष्ट्रा॒ँ अचि॑क्रदत् ।
अ॒ध श्वित्ने॑षु विं॒शतिं॑ श॒ता ॥ ८ ०४६ ३१
श॒तं दा॒से ब॑ल्बूथे॑ विप्र॒स् तरु॑क्ष॒ आ द॑दे ।
ते ते॑ वायव् इ॒मे जना॒ मद॒न्तीन्द्र॑गोपा॒ मद॑न्ति दे॒वगो॑पाः ॥ ८ ०४६ ३२
अ॒ध स्या योष॑णा म॒ही प्र॑ती॒ची वश॑म् अ॒श्व्यम् ।
अधि॑रुक्मा॒ वि नी॑यते ॥ ८ ०४६ ३३

(६६७)
महि॑ वो मह॒ताम् अवो॒ वरु॑ण॒ मित्र॑ दा॒शुषे॑ ।
यम् आ॑दित्या अ॒भि द्रु॒हो रक्ष॑था॒ नेम् अ॒घं न॑शद् अ॒नेहसो॑ व ऊ॒तयः॑ सू॒उतयो॑ व ऊ
॒तयः॑ ॥ ८ ०४७ ०१
वि॒दा दे॑वा अ॒घाना॒म् आदि॑त्यासो अ॒पाकृ॑तिम् ।
प॒क्षा वयो॒ यथो॒परि॒ व्य् अ॒१॒स्मे शर्म॑ यच्छताने॒हसो॑ व ऊ॒तयः॑ सू॒उतयो॑ व ऊ॒तयः॑ ॥
८ ०४७ ०२
व्य् अ॒१॒स्मे अधि॒ शर्म॒ तत् प॒क्षा वयो॒ न य॑न्तन ।
विश्वा॑नि विश्ववेदसो व॒रूथ्या मनामहे ऽने॒हसो॑ व ऊ॒तयः॑ सू॒उतयो॑ व ऊ॒तयः॑ ॥ ८
०४७ ०३
यस्मा॒ अरा॑सत॒ क्षय॑ं जी॒वातु॑ं च॒ प्रचे॑तसः ।
मनो॒र् विश्व॑स्य॒ घेद् इ॒म आ॑दि॒त्या रा॒य ई॑शते ऽने॒हसो॑ व ऊ॒तयः॑ सू॒उतयो॑ व ऊ॒तयः॑ ॥
८ ०४७ ०४
परि॑ णो वृणजन्न् अ॒घा दु॒र्गाणि॑ र॒थ्यो यथा ।
स्यामेद् इन्द्र॑स्य॒ शर्म॑ण्य् आदि॒त्याना॑म् उ॒ताव॑स्य् अ॒नेहसो॑ व ऊ॒तयः॑ सू॒उतयो॑ व ऊ
॒तयः॑ ॥ ८ ०४७ ०५

प॒रि॒ह्वृ॒तेद् अ॒ना जनो॑ यु॒ष्माद॑त्तस्य वायति ।
देवा॒ अद॑भ्रम् आश वो॒ यम् आ॑दित्या॒ अहे॑तनाने॒हसो॑ व ऊ॒तयः॑ सू॒उतयो॑ व ऊ॒तयः॑ ॥
८ ०४७ ०६
न तं ति॒ग्मं च॒न त्यजो॒ न द्रा॑सद् अ॒भि तं गु॒रु ।
यस्मा॑ उ॒ शर्म॑ स॒प्रथ॒ आदि॑त्यासो॒ अरा॑ध्वम् अने॒हसो॑ व ऊ॒तयः॑ सू॒उतयो॑ व ऊ॒तयः॑ ॥
८ ०४७ ०७
यु॒ष्मे दे॑वा॒ अपि॑ ष्मसि॒ युध्य॑न्त इ॒व वर्म॑सु ।
यू॒यम् म॒हो न॒ एन॑सो यू॒यम् अर्भा॑द् उरुष्यताने॒हसो॑ व ऊ॒तयः॑ सू॒उतयो॑ व ऊ॒तयः॑ ॥ ८
०४७ ०८
अदि॑तिर् न उरुष्य॒त्व् अदि॑तिः॒ शर्म॑ यच्छतु ।
मा॒ता मि॒त्रस्य॑ रे॒वतो॑ ऽर्य॒म्णो वरु॑णस्य चाने॒हसो॑ व ऊ॒तयः॑ सू॒उतयो॑ व ऊ॒तयः॑ ॥ ८
०४७ ०९
यद् दे॑वाः॒ शर्म॑ श॒रणं यद् भ॒द्रं यद् अ॑नातु॒रम् ।
त्रि॒धातु॒ यद् व॑रू॒थ्य १॒॑ तद् अ॒स्मासु॒ वि य॑न्तनाने॒हसो॑ व ऊ॒तयः॑ सू॒उतयो॑ व ऊ॒तयः॑ ॥
८ ०४७ १०
आदि॑त्या॒ अव॒ हि ख्यताधि॒ कूला॑द् इ॒व स्पशः॑ ।
सु॒ती॒र्थम् अर्व॑तो य॒थानु॑ नो नेषथा सु॒गम् अ॑ने॒हसो॑ व ऊ॒तयः॑ सू॒उतयो॑ व ऊ॒तयः॑ ॥ ८
०४७ ११
नेह भ॒द्रं र॑क्षस्विने॒ नाव॒यै नोप॒या उ॒त ।
गवे॑ च भ॒द्रं धे॒नवे॑ वी॒राय॑ च श्रवस्य॒ते ऽने॒हसो॑ व ऊ॒तयः॑ सू॒उतयो॑ व ऊ॒तयः॑ ॥ ८
०४७ १२
यद् आ॒विर् यद् अ॑पी॒च्य १॒॑ देवा॑सो॒ अस्ति॑ दुष्कृ॒तम् ।
त्रि॒ते तद् विश्व॑म् आ॒प्त्य आ॒रे अ॒स्मद् द॑धातनाने॒हसो॑ व ऊ॒तयः॑ सू॒उतयो॑ व ऊ॒तयः॑ ॥
८ ०४७ १३
यच् च॒ गोषु॑ दु॒ष्वप्न्यं॒ यच् चा॒स्मे दु॑हितर् दिवः ।
त्रि॒ता॒य तद् वि॑भावर्य् आ॒प्त्याय॒ परा॑ वहाने॒हसो॑ व ऊ॒तयः॑ सू॒उतयो॑ व ऊ॒तयः॑ ॥ ८
०४७ १४
नि॒ष्कं वा॑ घा कृ॒णव॑ते॒ स्रजं॑ वा दुहितर् दिवः ।

त्रिते दुष्वप्न्यं सर्वम् आप्त्ये परि दद्मस्य् अनेहसो व ऊतयः सूउतयो व ऊतयः ॥ ८ ०४७ १५
तदन्नाय तदपसे तम् भागम् उपसेदुषे ।
त्रिताय च द्विताय चोषो दुष्वप्न्यं वहानेहसो व ऊतयः सूउतयो व ऊतयः ॥ ८ ०४७ १६
यथा कलां यथा शफं यथ ऋणं संनयामसि ।
एवा दुष्वप्न्यं सर्वम् आप्त्ये सं नयामस्य् अनेहसो व ऊतयः सूउतयो व ऊतयः ॥ ८ ०४७ १७
अजैष्माद्यासनाम चाभूमानागसो वयम् ।
उषो यस्माद् दुष्वप्न्याद् अभैष्माप तद् उच्छत्व् अनेहसो व ऊतयः सूउतयो व ऊतयः ॥ ८ ०४७ १८

(६६८)
स्वादोर् अभक्षि वयसः सुमेधाः स्वाध्यो वरिवोवित्तरस्य ।
विश्वे यं देवा उत मर्त्यासो मधु ब्रुवन्तो अभि संचरन्ति ॥ ८ ०४८ ०१
अन्तश् च प्रागा अदितिर् भवास्य् अवयाता हरसो दैव्यस्य ।
इन्दव् इन्द्रस्य सख्यं जुषाणः श्रौष्टीव धुरम् अनु राय ऋध्याः ॥ ८ ०४८ ०२
अपाम सोमम् अमृता अभूम ऋगन्म ज्योतिर् अविदाम देवान् ।
किं नूनम् अस्मान् कृणवद् अरातिः किम् उ धूर्तिर् अमृत मर्त्यस्य ॥ ८ ०४८ ०३
शं नो भव हृद आ पीत इन्दो पितेव सोम सूनवे सुशेवः ।
सखेव सख्य उरुशंस धीरः प्र ण आयुर् जीवसे सोम तारीः ॥ ८ ०४८ ०४
इमे मा पीता यशस उरुष्यवो रथं न गावः सम् अनाह पर्वसु ।
ते मा रक्षन्तु विस्रसश् चरित्राद् उत मा स्रामाद् यवयन्त्व् इन्दवः ॥ ८ ०४८ ०५
अग्निं न मा मथितं सं दिदीपः प्र चक्षय कृणुहि वस्यसो नः ।
अथा हि ते मद आ सोम मन्ये रेवाँ इव प्र चरा पुष्टिम् अच्छ ॥ ८ ०४८ ०६
इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः ।
सोम राजन् प्र ण आयूंषि तारीर् अहानीव सूर्यो वासराणि ॥ ८ ०४८ ०७
सोम राजन् मृळया नः स्वस्ति तव स्मसि व्रत्या३स् तस्य विद्धि ।

अल॑र्ति॒ दक्ष॑ उ॒त म॒न्युर् इ॒न्दो मा नो॑ अ॒र्यो अ॑नुका॒मम् परा॑ दाः ॥ ८ ०४८ ०८
त्वं हि न॑स् त॒न्वः सोम गो॒पा गात्रे॑-गात्रे नि॒षसत्था॑ नृ॒चक्षाः॑ ।
यत् ते॑ व॒यम् प्र॑मि॒नाम॑ व्र॒तानि॒ स नो॑ मृळ सु॒षखा दे॑व॒ वस्यः॑ ॥ ८ ०४८ ०९
ऋ॒दूदरे॑ण॒ सख्या॑ सचेय॒ यो मा॒ न रिष्ये॑द् धर्यश्व पी॒तः ।
अ॒यं यः सोमो॒ न्य् अधा॑य्य् अ॒स्मे तस्मा॒ इन्द्र॑म् प्र॒तिर॑म् ए॒म्य् आयुः॑ ॥ ८ ०४८ १०
अप॒ त्या अ॑स्थु॒र् अनि॑रा॒ अमी॑वा॒ निर् अ॑त्रसन् तमि॑षीची॒र् अभै॑षुः ।
आ सोमो॑ अ॒स्माँ अ॑रुह॒द् विहा॑या॒ अग॑न्म॒ यत्र॑ प्रति॒रन्त॒ आयुः॑ ॥ ८ ०४८ ११
यो न॒ इन्दुः॑ पितरो हृ॒त्सु पी॒तो ऽम॑र्त्यो॒ मर्त्याँ॑ आवि॒वेश॑ ।
तस्मै॒ सोमा॑य ह॒विषा॑ विधेम मृळी॒के अ॑स्य सुम॒तौ स्या॑म ॥ ८ ०४८ १२
त्वं सो॑म पि॒तृभिः॑ संविदा॒नो ऽनु॒ द्यावा॑पृथि॒वी आ त॑तन्थ ।
तस्मै॑ त इन्दो ह॒विषा॑ विधेम व॒यं स्या॑म॒ पत॑यो रयी॒णाम् ॥ ८ ०४८ १३
त्राता॑रो देवा॒ अधि॑ वोचता नो॒ मा नो॑ नि॒द्रा ई॑शत॒ मोत जल्पिः॑ ।
व॒यं सोम॑स्य वि॒श्वह॑ प्रि॒यासः॑ सु॒वीरा॑सो वि॒दथ॒म् आ व॑देम ॥ ८ ०४८ १४
त्वं नः॑ सोम वि॒श्वतो॑ वयो॒धास् त्वं स्व॒र्विद् आ वि॑शा नृ॒चक्षाः॑ ।
त्वं न॑ इन्द ऊ॒तिभिः॑ स॒जोषाः॑ पा॒हि प॒श्चाता॑द् उ॒त वा॑ पु॒रस्ता॑त् ॥ ८ ०४८ १५

(१०१८)
अ॒भि प्र वः॑ सु॒राध॑सम् इन्द्र॑म् अर्च॒ यथा॑ वि॒दे ।
यो ज॑रि॒तृभ्यो॑ म॒घवा॑ पु॒रू॒वसुः॑ स॒हस्रे॑णेव॒ शिक्ष॑ति ॥ ८ ०४९ ०१
श॒तानी॑केव॒ प्र जि॑गाति धृष्णु॒या हन्ति॑ वृ॒त्राणि॑ दा॒शुषे॑ ।
गि॒रेर् इ॑व॒ प्र रसा॑ अस्य पिन्वि॒रे दत्रा॑णि पु॒रुभोज॑सः ॥ ८ ०४९ ०२
आ त्वा॑ सु॒तास॒ इन्द॑वो॒ मदा॒ य इ॑न्द्र गिर्वणः ।
आपो॒ न व॑ज्रि॒न्न् अन्व् ओ॒क्य१ं सरः॑ पृ॒णन्ति॑ शू॒र राध॑से ॥ ८ ०४९ ०३
अ॒ने॒हस॑म् प्र॒तर॑णं वि॒वक्ष॑णम् मध्वः॒ स्वादि॑ष्ठम् ईम् पिब ।
आ यथा॑ मन्दसा॒नः कि॒रासि॑ नः॒ प्र क्षु॒द्रेव॒ त्मना॑ धृ॒षत् ॥ ८ ०४९ ०४
आ न॒ स्तोम॑म् उप॑ द्र॒वद् धि॑या॒नो अश्वो॒ न सोतृ॑भिः ।
यं ते॑ स्वधावन् स्व॒दय॑न्ति धे॒नव॒ इन्द्र॒ कण्वे॑षु रा॒तयः॑ ॥ ८ ०४९ ०५

उग्रं न वीरं नमसोप सेदिम विभूतिम् अक्षितावसुम् ।
उद्रीव वज्रिन्न् अवतो न सिञ्चते क्षरन्तीन्द्र धीतयः ॥ ८ ०४९ ०६
यद् ध नूनं यद् वा यज्ञे यद् वा पृथिव्याम् अधि ।
अतो नो यज्ञम् आशुभिर् महेमत उग्र उग्रेभिर् आ गहि ॥ ८ ०४९ ०७
अजिरासो हरयो ये त आशवो वाता इव प्रसक्षिणः ।
येभिर् अपत्यम् मनुषः परीयसे येभिर् विश्वं स्वर् दृशे ॥ ८ ०४९ ०८
एतावतस् त ईमह इन्द्र सुम्नस्य गोमतः ।
यथा प्रावो मघवन् मेध्यातिथिं यथा नीपातिथिं धने ॥ ८ ०४९ ०९
यथा कण्वे मघवन् त्रसदस्यवि यथा पक्थे दशव्रजे ।
यथा गोशर्ये असनोर् ऋजिश्वनीन्द्र गोमद् धिरण्यवत् ॥ ८ ०४९ १०

(१०१९)
प्र सु श्रुतं सुराधसम् अर्चा शक्रम् अभिष्टये ।
यः सुन्वते स्तुवते काम्यं वसु सहस्रेणेव मंहते ॥ ८ ०५० ०१
शतानीका हेतयो अस्य दुष्टरा इन्द्रस्य समिषो महीः ।
गिरिर् न भुज्मा मघवत्सु पिन्वते यद् ईं सुता अमन्दिषुः ॥ ८ ०५० ०२
यद् ईं सुतास इन्दवो ऽभि प्रियम् अमन्दिषुः ।
आपो न धायि सवनम् म आ वसो दुघा इवोप दाशुषे ॥ ८ ०५० ०३
अनेहसं वो हवमानम् ऊतये मध्वः क्षरन्ति धीतयः ।
आ त्वा वसो हवमानास इन्दव उप स्तोत्रेषु दधिरे ॥ ८ ०५० ०४
आ नः सोमे स्वध्वर इयानो अत्यो न तोशते ।
यं ते स्वदावन् स्वदन्ति गूर्तयः पौरे छन्दयसे हवम् ॥ ८ ०५० ०५
प्र वीरम् उग्रं विविचिं धनस्पृतं विभूतिं राधसो महः ।
उद्रीव वज्रिन्न् अवतो वसुत्वना सदा पीपेथ दाशुषे ॥ ८ ०५० ०६
यद् ध नूनम् परावति यद् वा पृथिव्यां दिवि ।
युजान इन्द्र हरिभिर् महेमत ऋष्व ऋष्वेभिर् आ गहि ॥ ८ ०५० ०७
रथिरासो हरयो ये ते अस्रिध ओजो वातस्य पिप्रति ।

येभिर् नि दस्युम् मनुषो निघोषयो येभिः स्वः परीयसे ॥ ८ ०५० ०८
एतावतस् ते वसो विद्याम शूर नव्यसः ।
यथा प्राव एतशं कृत्व्ये धने यथा वशं दशव्रजे ॥ ८ ०५० ०९
यथा कण्वे मघवन् मेधे अध्वरे दीर्घनीथे दमूनसि ।
यथा गोशर्ये असिषासो अद्रिवो मयि गोत्रं हरिश्रियम् ॥ ८ ०५० १०

(१०२०)
यथा मनौ सांवरणौ सोमम् इन्द्रापिबः सुतम् ।
नीपातिथौ मघवन् मेध्यातिथौ पुष्टिगौ श्रुष्टिगौ सचा ॥ ८ ०५१ ०१
पार्षद्वाणः प्रस्कण्वं सम् असादयच् छयानं जिव्रिम् उद्धितम् ।
सहस्राण्य् असिषासद् गवाम् ऋषिस् त्वोतो दस्यवे वृकः ॥ ८ ०५१ ०२
य उक्थेभिर् न विन्धते चिकिद् य ऋषिचोदनः ।
इन्द्रं तम् अच्छा वद नव्यस्या मत्य् अरिष्यन्तं न भोजसे ॥ ८ ०५१ ०३
यस्मा अर्कं सप्तशीर्षाणम् आनृचुस् त्रिधातुम् उत्तमे पदे ।
स त्व् इमा विश्वा भुवनानि चिक्रदद् आद् इज् जनिष्ट पौंस्यम् ॥ ८ ०५१ ०४
यो नो दाता वसूनाम् इन्द्रं तं हूमहे वयम् ।
विद्मा ह्य् अस्य सुमतिं नवीयसीं गमेम गोमति व्रजे ॥ ८ ०५१ ०५
यस्मै त्वं वसो दानाय शिक्षसि स रायस् पोषम् अश्नुते ।
तं त्वा वयम् मघवन्न् इन्द्र गिर्वणः सुतावन्तो हवामहे ॥ ८ ०५१ ०६
कदा चन स्तरीर् असि नेन्द्र सश्चसि दाशुषे ।
उपोपेन् नु मघवन् भूय इन् नु ते दानं देवस्य पृच्यते ॥ ८ ०५१ ०७
प्र यो ननक्षे अभ्य् ओजसा क्रिविं वधैः शुष्णं निघोषयन् ।
यदेद् अस्तम्भीत् प्रथयन्न् अमूं दिवम् आद् इज् जनिष्ट पार्थिवः ॥ ८ ०५१ ०८
यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।
तिरश् चिद् अर्ये रुशमे परीरवि तुभ्येत् सो अज्यते रयिः ॥ ८ ०५१ ०९
तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कम् आनृचुः ।
अस्मे रयिः पप्रथे वृष्ण्यं शवो ऽस्मे सुवानास इन्दवः ॥ ८ ०५१ १०

(१०२१)
यथा मनौ विवस्वति सोमं शक्रापिबः सुतम् ।
यथा त्रिते छन्द इन्द्र जुजोषस्य् आयौ मादयसे सचा ॥ ८ ०५२ ०१
पृषध्रे मेध्ये मातरिश्वनीन्द्र सुवाने अमन्दथाः ।
यथा सोमं दशशिप्रे दशोण्ये स्यूमरश्माव् ऋजूनसि ॥ ८ ०५२ ०२
य उक्था केवला दधे यः सोमं धृषितापिबत् ।
यस्मै विष्णुस् त्रीणि पदा विचक्रम उप मित्रस्य धर्मभिः ॥ ८ ०५२ ०३
यस्य त्वम् इन्द्र स्तोमेषु चाकनो वाजे वाजिञ् छतक्रतो ।
तं त्वा वयं सुदुघाम् इव गोदुहो जुहूमसि श्रवस्यवः ॥ ८ ०५२ ०४
यो नो दाता स नः पिता महाँ उग्र ईशानकृत् ।
अयामन्न् उग्रो मघवा पुरूवसुर् गोर् अश्वस्य प्र दातु नः ॥ ८ ०५२ ०५
यस्मै त्वं वसो दानाय मंहसे स रायस् पोषम् इन्वति ।
वसूयवो वसुपतिं शतक्रतुं स्तोमैर् इन्द्रं हवामहे ॥ ८ ०५२ ०६
कदा चन प्र युच्छस्य् उभे नि पासि जन्मनी ।
तुरीयादित्य हवनं त इन्द्रियम् आ तस्थाव् अमृतं दिवि ॥ ८ ०५२ ०७
यस्मै त्वम् मघवन्न् इन्द्र गिर्वणः शिक्षो शिक्षसि दाशुषे ।
अस्माकं गिर उत सुष्टुतिं वसो कण्ववच् छृणुधी हवम् ॥ ८ ०५२ ०८
अस्तावि मन्म पूर्व्यम् ब्रह्मेन्द्राय वोचत ।
पूर्वीर् ऋतस्य बृहतीर् अनूषत स्तोतुर् मेधा असृक्षत ॥ ८ ०५२ ०९
सम् इन्द्रो रायो बृहतीर् अधूनुत सं क्षोणी सम् उ सूर्यम् ।
सं शुक्रासः शुचयः सं गवाशिरः सोमा इन्द्रम् अमन्दिषुः ॥ ८ ०५२ १०

(१०२२)
उपमं त्वा मघोनां ज्येष्ठं च वृषभाणाम् ।
पूर्भित्तमम् मघवन्न् इन्द्र गोविदम् ईशानं राय ईमहे ॥ ८ ०५३ ०१

य आयुं कुत्सम् अतिथिग्वम् अर्दयो वावृधानो दिवे-दिवे ।
तं त्वा वयं हर्यश्वं शतक्रतुं वाजयन्तो हवामहे ॥ ८ ०५३ ०२
आ नो विश्वेषां रसम् मध्वः सिञ्चन्त्व् अद्रयः ।
ये परावति सुन्विरे जनेष्व् आ ये अर्वावतीन्दवः ॥ ८ ०५३ ०३
विश्वा द्वेषांसि जहि चाव चा कृधि विश्वे सन्वन्त्व् आ वसु ।
शीष्टेषु चित् ते मदिरासो अंशवो यत्रा सोमस्य तृम्पसि ॥ ८ ०५३ ०४
इन्द्र नेदीय एद् इहि मितमेधाभिर् ऊतिभिः ।
आ शंतम शंतमाभिर् अभिष्टिभिर् आ स्वापे स्वापिभिः ॥ ८ ०५३ ०५
आजितुरं सत्पतिं विश्वचर्षणिं कृधि प्रजास्व् आभगम् ।
प्र सू तिरा शचीभिर् ये त उक्थिनः क्रतुम् पुनत आनुषक् ॥ ८ ०५३ ०६
यस् ते साधिष्ठो ऽवसे ते स्याम भरेषु ते ।
वयं होत्राभिर् उत देवहूतिभिः ससवांसो मनामहे ॥ ८ ०५३ ०७
अहं हि ते हरिवो ब्रह्म वाजयुर् आजिं यामि सदोतिभिः ।
त्वाम् इद् एव तम् अमे सम् अश्वयुर् गव्युर् अग्रे मथीनाम् ॥ ८ ०५३ ०८

(१०२३)
एतत् त इन्द्र वीर्यं गीर्भिर् गृणन्ति कारवः ।
ते स्तोभन्त ऊर्जम् आवन् घृतश्चुतम् पौरासो नक्षन् धीतिभिः ॥ ८ ०५४ ०१
नक्षन्त इन्द्रम् अवसे सुकृत्यया येषां सुतेषु मन्दसे ।
यथा संवर्ते अमदो यथा कृश एवास्मे इन्द्र मत्स्व ॥ ८ ०५४ ०२
आ नो विश्वे सजोषसो देवासो गन्तनोप नः ।
वसवो रुद्रा अवसे न आ गमञ् छृण्वन्तु मरुतो हवम् ॥ ८ ०५४ ०३
पूषा विष्णुर् हवनम् मे सरस्वत्य् अवन्तु सप्त सिन्धवः ।
आपो वातः पर्वतासो वनस्पतिः शृणोतु पृथिवी हवम् ॥ ८ ०५४ ०४
यद् इन्द्र राधो अस्ति ते माघोनम् मघवत्तम ।
तेन नो बोधि सधमाद्यो वृधे भगो दानाय वृत्रहन् ॥ ८ ०५४ ०५
आजिपते नृपते त्वम् इद् धि नो वाज आ वक्षि सुक्रतो ।

वीती होत्राभिर् उत देववीतिभिः ससवांसो वि शृण्विरे ॥ ८ ०५४ ०६
सन्ति ह्य अ १ र्य आशिष इन्द्र आयुर् जनानाम् ।
अस्मान् नक्षस्व मघवन्न् उपावसे धुक्षस्व पिप्युषीम् इषम् ॥ ८ ०५४ ०७
वयं त इन्द्र स्तोमेभिर् विधेम त्वम् अस्माकं शतक्रतो ।
महि स्थूरं शशयं राधो अह्रयम् प्रस्कण्वाय नि तोशय ॥ ८ ०५४ ०८

(१०२४)
भूरीद् इन्द्रस्य वीर्य १ं व्य् अख्यम् अभ्य् आयति ।
राधस् ते दस्यवे वृक ॥ ८ ०५५ ०१
शतं श्वेतास उक्षणो दिवि तारो न रोचन्ते ।
मह्ना दिवं न तस्तभुः ॥ ८ ०५५ ०२
शतं वेणूञ् छतं शुनः शतं चर्माणि म्लातानि ।
शतम् मे बल्बजस्तुका अरुषीणां चतुःशतम् ॥ ८ ०५५ ०३
सुदेवा स्थ काण्वायना वयो-वयो विचरन्तः ।
अश्वासो न चङ्क्रमत ॥ ८ ०५५ ०४
आद् इत् साप्तस्य चर्किरन्न् आनूनस्य महि श्रवः ।
श्यावीर् अतिध्वसन् पथश् चक्षुषा चन संनशे ॥ ८ ०५५ ०५

(१०२५)
प्रति ते दस्यवे वृक राधो अदर्श्य् अह्रयम् ।
द्यौर् न प्रथिना शवः ॥ ८ ०५६ ०१
दश मह्यम् पौतक्रतः सहस्रा दस्यवे वृकः ।
नित्याद् रायो अमंहत ॥ ८ ०५६ ०२
शतम् मे गर्दभानां शतम् ऊर्णावतीनाम् ।
शतं दासाँ अति स्रजः ॥ ८ ०५६ ०३
तत्रो अपि प्राणीयत पूतक्रतायै व्यक्ता ।

अश्वानाम् इन् न यूथ्याम् ॥ ८ ०५६ ०४
अचेत्य् अग्निश् चिकितुर् हव्यवाट् स सुमद्रथः ।
अग्निः शुक्रेण शोचिषा बृहत् सूरो अरोचत दिवि सूर्यो अरोचत ॥ ८ ०५६ ०५

(१०२६)
युवं देवा क्रतुना पूर्व्येण युक्ता रथेन तविषं यजत्रा ।
आगच्छतं नासत्या शचीभिर् इदं तृतीयं सवनम् पिबाथः ॥ ८ ०५७ ०१
युवां देवास् त्रय एकादशासः सत्याः सत्यस्य ददृशे पुरस्तात् ।
अस्माकं यज्ञं सवनं जुषाणा पातं सोमम् अश्विना दीद्यग्नी ॥ ८ ०५७ ०२
पनाय्यं तद् अश्विना कृतं वां वृषभो दिवो रजसः पृथिव्याः ।
सहस्रं शंसा उत ये गविष्टौ सर्वाँ इत् ताँ उप याता पिबध्यै ॥ ८ ०५७ ०३
अयं वाम् भागो निहितो यजत्रेमा गिरो नासत्योप यातम् ।
पिबतं सोमम् मधुमन्तम् अस्मे प्र दाश्वांसम् अवतं शचीभिः ॥ ८ ०५७ ०४

(१०२७)
यम् ऋत्विजो बहुधा कल्पयन्तः सचेतसो यज्ञम् इमं वहन्ति ।
यो अनूचानो ब्राह्मणो युक्त आसीत् का स्वित् तत्र यजमानस्य संवित् ॥ ८ ०५८ ०१
एक एवाग्निर् बहुधा समिद्ध एकः सूर्यो विश्वम् अनु प्रभूतः ।
एकैवोषाः सर्वम् इदं वि भात्य् एकं वा इदं वि बभूव सर्वम् ॥ ८ ०५८ ०२
ज्योतिष्मन्तं केतुमन्तं त्रिचक्रं सुखं रथं सुषदम् भूरिवारम् ।
चित्रामघा यस्य योगे ऽधिजज्ञे तं वां हुवे अति रिक्तम् पिबध्यै ॥ ८ ०५८ ०३

(१०२९)
इमानि वाम् भागधेयानि सिस्रत इन्द्रावरुणा प्र महे सुतेषु वाम् ।
यज्ञे-यज्ञे ह सवना भुरण्यथो यत् सुन्वते यजमानाय शिक्षथः ॥ ८ ०५९ ०१

निष्षिध्वरीर् ओषधीर् आप आस्ताम् इन्द्रावरुणा महिमानम् आशत ।
या सिस्रतू रजसः पारे अध्वनो ययोः शत्रुर् नकिर् आदेव ओहते ॥ ८ ०५९ ०२
सत्यं तद् इन्द्रावरुणा कृशस्य वाम् मध्व ऊर्मिं दुहते सप्त वाणीः ।
ताभिर् दाश्वांसम् अवतं शुभस् पती यो वाम् अदब्धो अभि पाति चित्तिभिः ॥ ८ ०५९ ०३
घृतप्रुषः सौम्या जीरदानवः सप्त स्वसारः सदन ऋतस्य ।
या ह वाम् इन्द्रावरुणा घृतश्चुतस् ताभिर् धत्तं यजमानाय शिक्षतम् ॥ ८ ०५९ ०४
अवोचाम महते सौभगाय सत्यं त्वेषाभ्याम् महिमानम् इन्द्रियम् ।
अस्मान् स्व् इन्द्रावरुणा घृतश्चुतस् त्रिभिः साप्तेभिर् अवतं शुभस् पती ॥ ८ ०५९ ०५
इन्द्रावरुणा यद् ऋषिभ्यो मनीषां वाचो मतिं श्रुतम् अदत्तम् अग्रे ।
यानि स्थानान्य् असृजन्त धीरा यज्ञं तन्वानास् तपसाभ्य् अपश्यम् ॥ ८ ०५९ ०६
इन्द्रावरुणा सौमनसम् अदृप्तं रायस् पोषं यजमानेषु धत्तम् ।
प्रजाम् पुष्टिम् भूतिम् अस्मासु धत्तं दीर्घायुत्वाय प्र तिरतं न आयुः ॥ ८ ०५९ ०७

(६६१)
अग्न आ याह्य् अग्निभिर् होतारं त्वा वृणीमहे ।
आ त्वाम् अनक्तु प्रयता हविष्मती यजिष्ठम् बर्हिर् आसदे ॥ ८ ०६० ०१
अच्छा हि त्वा सहसः सूनो अङ्गिरः स्रुचश् चरन्त्य् अध्वरे ।
ऊर्जो नपातं घृतकेशम् ईमहे ऽग्निं यज्ञेषु पूर्व्यम् ॥ ८ ०६० ०२
अग्ने कविर् वेधा असि होता पावक यक्ष्यः ।
मन्द्रो यजिष्ठो अध्वरेष्व् ईड्यो विप्रेभिः शुक्र मन्मभिः ॥ ८ ०६० ०३
अद्रोघम् आ वहोशतो यविष्ठ्य देवाँ अजस्र वीतये ।
अभि प्रयांसि सुधिता वसो गहि मन्दस्व धीतिभिर् हितः ॥ ८ ०६० ०४
त्वम् इत् सप्रथा अस्य् अग्ने त्रातर् ऋतस् कविः ।
त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥ ८ ०६० ०५
शोचा शोचिष्ठ दीदिहि विशे मयो रास्व स्तोत्रे महाँ असि ।
देवानां शर्मन् मम सन्तु सूरयः शत्रूषाहः स्वग्नयः ॥ ८ ०६० ०६

यथा चिद् वृद्धम् अतसम् अग्ने संजूर्वसि क्षमि ।
एवा दह मित्रमहो यो अस्मध्रुग् दुर्मन्मा कश् च वेनति ॥ ८ ०६० ०७
मा नो मर्ताय रिपवे रक्षस्विने माघशंसाय रीरधः ।
अस्रेधद्भिस् तरणिभिर् यविष्ठ्य शिवेभिः पाहि पायुभिः ॥ ८ ०६० ०८
पाहि नो अग्न एकया पाह्य उ१त द्वितीयया ।
पाहि गीर्भिस् तिसृभिर् ऊर्जाम् पते पाहि चतसृभिर् वसो ॥ ८ ०६० ०९
पाहि विश्वस्माद् रक्षसो अराव्णः प्र स्म वाजेषु नो ऽव ।
त्वाम् इद् धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥ ८ ०६० १०
आ नो अग्ने वयोवृधं रयिम् पावक शंस्यम् ।
रास्वा च न उपमाते पुरुस्पृहं सुनीती स्वयशस्तरम् ॥ ८ ०६० ११
येन वंसाम पृतनासु शर्धतस् तरन्तो अर्य आदिशः ।
स त्वं नो वर्ध प्रयसा शचीवसो जिन्वा धियो वसुविदः ॥ ८ ०६० १२
शिशानो वृषभो यथाग्निः शृङ्गे दविध्वत् ।
तिग्मा अस्य हनवो न प्रतिधृषे सुजम्भः सहसो यहुः ॥ ८ ०६० १३
नहि ते अग्ने वृषभ प्रतिधृषे जम्भासो यद् वितिष्ठसे ।
स त्वं नो होतः सुहुतं हविष् कृधि वंस्वा नो वार्या पुरु ॥ ८ ०६० १४
शेषे वनेषु मात्रोः सं त्वा मर्तास इन्धते ।
अतन्द्रो हव्या वहसि हविष्कृत आद् इद् देवेषु राजसि ॥ ८ ०६० १५
सप्त होतारस् तम् इद् ईळते त्वाग्ने सुत्यजम् अह्रयम् ।
भिनत्स्य् अद्रिं तपसा वि शोचिषा प्राग्ने तिष्ठ जनाँ अति ॥ ८ ०६० १६
अग्निम्-अग्निं वो अध्रिगुं हुवेम वृक्तबर्हिषः ।
अग्निं हितप्रयसः शश्वतीष्व् आ होतारं चर्षणीनाम् ॥ ८ ०६० १७
केतेन शर्मन् सचते सुषामण्य् अग्ने तुभ्यं चिकित्वना ।
इषण्यया नः पुरुरूपम् आ भर वाजं नेदिष्ठम् ऊतये ॥ ८ ०६० १८
अग्ने जरितर् विश्पतिस् तेपानो देव रक्षसः ।
अप्रोषिवान् गृहपतिर् महाँ असि दिवस् पायुर् दुरोणयुः ॥ ८ ०६० १९
मा नो रक्ष आ वेशीद् आघृणीवसो मा यातुर् यातुमावताम् ।
परोगव्यूत्य् अनिराम् अप क्षुधम् अग्ने सेध रक्षस्विनः ॥ ८ ०६० २०

(६७०)
उभयं शृणवच् च न इन्द्रो अर्वाग् इदं वचः ।
सत्राच्या मघवा सोमपीतये धिया शविष्ठ आ गमत् ॥ ८ ०६१ ०१
तं हि स्वराजं वृषभं तम् ओजसे धिषणे निष्टतक्षतुः ।
उतोपमानाम् प्रथमो नि षीदसि सोमकामं हि ते मनः ॥ ८ ०६१ ०२
आ वृषस्व पुरूवसो सुतस्येन्द्रान्धसः ।
विद्मा हि त्वा हरिवः पृत्सु सासहिम् अधृष्टं चिद् दधृष्वणिम् ॥ ८ ०६१ ०३
अप्रामिसत्य मघवन् तथेद् असद् इन्द्र क्रत्वा यथा वशः ।
सनेम वाजं तव शिप्रिन्न् अवसा मक्षू चिद् यन्तो अद्रिवः ॥ ८ ०६१ ०४
शग्ध्य् ऊ ३ षु शचीपत इन्द्र विश्वाभिर् ऊतिभिः ।
भगं न हि त्वा यशसं वसुविदम् अनु शूर चरामसि ॥ ८ ०६१ ०५
पौरो अश्वस्य पुरुकृद् गवाम् अस्य् उत्सो देव हिरण्ययः ।
नकिर् हि दानम् परिमर्धिषत् त्वे यद्-यद् यामि तद् आ भर ॥ ८ ०६१ ०६
त्वं ह्य् एहि चेरवे विदा भगं वसुत्तये ।
उद् वावृषस्व मघवन् गविष्टय उद् इन्द्राश्वमिष्टये ॥ ८ ०६१ ०७
त्वम् पुरू सहस्राणि शतानि च यूथा दानाय मंहसे ।
आ पुरंदरं चकृम विप्रवचस इन्द्रं गायन्तो ऽवसे ॥ ८ ०६१ ०८
अविप्रो वा यद् अविधद् विप्रो वेन्द्र ते वचः ।
स प्र ममन्दत् त्वाया शतक्रतो प्राचामन्यो अहंसन ॥ ८ ०६१ ०९
उग्रबाहुर् म्रक्षकृत्वा पुरंदरो यदि मे शृणवद् धवम् ।
वसूयवो वसुपतिं शतक्रतुं स्तोमैर् इन्द्रं हवामहे ॥ ८ ०६१ १०
न पापासो मनामहे नारायासो न जळ्हवः ।
यद् इन् न्व् इन्द्रं वृषणं सचा सुते सखायं कृणवामहै ॥ ८ ०६१ ११
उग्रं युयुज्म पृतनासु सासहिम् ऋणकातिम् अदाभ्यम् ।
वेदा भृमं चित् सनिता रथीतमो वाजिनं यम् इद् ऊ नशत् ॥ ८ ०६१ १२
यत इन्द्र भयामहे ततो नो अभयं कृधि ।

मघवञ् छग्धि तव तन् न ऊतिभिर् वि द्विषो वि मृधो जहि ॥ ८ ०६१ १३
त्वं हि राधस्पते राधसो महः क्षयस्यासि विधतः ।
तं त्वा वयम् मघवन्न् इन्द्र गिर्वणः सुतावन्तो हवामहे ॥ ८ ०६१ १४
इन्द्र स्पळ् उत वृत्रहा परस्पा नो वरेण्यः ।
स नो रक्षिषच् चरमं स मध्यमं स पश्चात् पातु नः पुरः ॥ ८ ०६१ १५
त्वं नः पश्चाद् अधराद् उत्तरात् पुर इन्द्र नि पाहि विश्वतः ।
आरे अस्मत् कृणुहि दैव्यम् भयम् आरे हेतीर् अदेवीः ॥ ८ ०६१ १६
अद्याद्या श्वः-श्व इन्द्र त्रास्व परे च नः ।
विश्वा च नो जरितॄन् सत्पते अहा दिवा नक्तं च रक्षिषः ॥ ८ ०६१ १७
प्रभङ्गी शूरो मघवा तुवीमघः सम्मिश्लो विर्याय कम् ।
उभा ते बाहू वृषणा शतक्रतो नि या वज्रम् मिमिक्षतुः ॥ ८ ०६१ १८

(६७१)
प्रो अस्मा उपस्तुतिम् भरता यज् जुजोषति ।
उक्थैर् इन्द्रस्य माहिनं वयो वर्धन्ति सोमिनो ।
भद्रा इन्द्रस्य रातयः ॥ ८ ०६२ ०१
अयुजो असमो नृभिर् एकः कृष्टीर् अयास्यः ।
पूर्वीर् अति प्र वावृधे विश्वा जातान्य् ओजसा ।
भद्रा इन्द्रस्य रातयः ॥ ८ ०६२ ०२
अहितेन चिद् अर्वता जीरदानुः सिषासति ।
प्रवाच्यम् इन्द्र तत् तव वीर्याणि करिष्यतो ।
भद्रा इन्द्रस्य रातयः ॥ ८ ०६२ ०३
आ याहि कृणवाम त इन्द्र ब्रह्माणि वर्धना ।
येभिः शविष्ठ चाकनो भद्रम् इह श्रवस्यते ।
भद्रा इन्द्रस्य रातयः ॥ ८ ०६२ ०४
धृषतश् चिद् धृषन् मनः कृणोषीन्द्र यत् त्वम् ।
तीव्रैः सोमैः सपर्यतो नमोभिः प्रतिभूषतो ।

भद्रा इन्द्रस्य रातयः ॥ ८ ०६२ ०५
अव चष्ट ऋचीषमो ऽवताँ इव मानुषः ।
जुष्ट्वी दक्षस्य सोमिनः सखायं कृणुते युजम् ।
भद्रा इन्द्रस्य रातयः ॥ ८ ०६२ ०६
विश्वे त इन्द्र वीर्यं देवा अनु क्रतुं ददुः ।
भुवो विश्वस्य गोपतिः पुरुष्टुत भद्रा इन्द्रस्य रातयः ॥ ८ ०६२ ०७
गृणे तद् इन्द्र ते शव उपमं देवतातये ।
यद् धंसि वृत्रम् ओजसा शचीपते भद्रा इन्द्रस्य रातयः ॥ ८ ०६२ ०८
समनेव वपुष्यतः कृणवन् मानुषा युगा ।
विदे तद् इन्द्रश् चेतनम् अध श्रुतो भद्रा इन्द्रस्य रातयः ॥ ८ ०६२ ०९
उज् जातम् इन्द्र ते शव उत् त्वाम् उत् तव क्रतुम् ।
भूरिगो भूरि वावृधुर् मघवन् तव शर्मणि ।
भद्रा इन्द्रस्य रातयः ॥ ८ ०६२ १०
अहं च त्वं च वृत्रहन् सं युज्याव सनिभ्य आ ।
अरातीवा चिद् अद्रिवो ऽनु नौ शूर मंसते ।
भद्रा इन्द्रस्य रातयः ॥ ८ ०६२ ११
सत्यम् इद् वा उ तं वयम् इन्द्रं स्तवाम नानृतम् ।
महाँ असुन्वतो वधो भूरि ज्योतींषि सुन्वतो ।
भद्रा इन्द्रस्य रातयः ॥ ८ ०६२ १२

(६७२)
स पूर्व्यो महानां वेनः क्रतुभिर् आनजे ।
यस्य द्वारा मनुष् पिता देवेषु धिय आनजे ॥ ८ ०६३ ०१
दिवो मानं नोत् सदन् सोमपृष्ठासो अद्रयः ।
उक्था ब्रह्म च शंस्या ॥ ८ ०६३ ०२
स विद्वाँ अङ्गिरोभ्य इन्द्रो गा अवृणोद् अप ।

स्तुषे तद् अस्य पौंस्यम् ॥ ८ ०६३ ०३
स प्रत्नथा कविवृध इन्द्रो वाकस्य वक्षणिः ।
शिवो अर्कस्य होमन्य् अस्मत्रा गन्त्व् अवसे ॥ ८ ०६३ ०४
आद् ऊ नु ते अनु क्रतुं स्वाहा वरस्य यज्यवः ।
श्वात्रम् अर्का अनूषतेन्द्र गोत्रस्य दावने ॥ ८ ०६३ ०५
इन्द्रे विश्वानि वीर्या कृतानि कर्त्वानि च ।
यम् अर्का अध्वरं विदुः ॥ ८ ०६३ ०६
यत् पाञ्चजन्यया विशेन्द्रे घोषा असृक्षत ।
अस्तृणाद् बर्हणा विपो ऽर्यो मानस्य स क्षयः ॥ ८ ०६३ ०७
इयम् उ ते अनुष्टुतिश् चकृषे तानि पौंस्या ।
प्रावश् चक्रस्य वर्तनिम् ॥ ८ ०६३ ०८
अस्य वृष्णो व्योदन उरु क्रमिष्ट जीवसे ।
यवं न पश्व आ ददे ॥ ८ ०६३ ०९
तद् दधाना अवस्यवो युष्माभिर् दक्षपितरः ।
स्याम मरुत्वतो वृधे ॥ ८ ०६३ १०
बळ् ऋत्वियाय धाम्न ऋक्वभिः शूर नोनुमः ।
जेषामेन्द्र त्वया युजा ॥ ८ ०६३ ११
अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः ॥ ८ ०६३ १२

(६७३)
उत् त्वा मन्दन्तु स्तोमाः कृणुष्व राधो अद्रिवः ।
अव ब्रह्मद्विषो जहि ॥ ८ ०६४ ०१
पदा पणीँर् अराधसो नि बाधस्व महाँ असि ।
नहि त्वा कश् चन प्रति ॥ ८ ०६४ ०२
त्वम् ईशिषे सुतानाम् इन्द्र त्वम् असुतानाम् ।
त्वं राजा जनानाम् ॥ ८ ०६४ ०३

ए॒हि प्रे॒हि क्षयो॑ दि॒व्य् आ३॑ घोष॑ञ् चर्षणी॒नाम् ।
ओभे पृ॑णासि॒ रोद॑सी ॥ ८ ०६४ ०४
त्वं चि॒त् पर्व॑तं गि॒रिं श॒तव॑न्तं स॒हस्रिण॑म् ।
वि स्तो॒तृभ्यो॑ रुरोजिथ ॥ ८ ०६४ ०५
व॒यम् उ॑ त्वा॒ दिवा॑ सु॒ते व॒यं नक्तं॑ हवामहे ।
अ॒स्माकं॒ काम॒म् आ पृ॒ण ॥ ८ ०६४ ०६
क्व१॒ स्य वृ॑ष॒भो युवा॑ तुवि॒ग्रीवो॒ अना॑नतः ।
ब्र॒ह्मा कस् तं स॑पर्यति ॥ ८ ०६४ ०७
कस्य॑ स्वि॒त् सव॑नं॒ वृषा॑ जु॒जुष्वाꣳअव॑ गच्छति ।
इन्द्रं॒ क उ॑ स्वि॒द् आ च॑के ॥ ८ ०६४ ०८
कं ते॑ दा॒ना अ॑सक्षत॒ वृत्र॑ह॒न् कं सु॒वीर्या॑ ।
उ॒क्थे क उ॑ स्वि॒द् अन्त॑मः ॥ ८ ०६४ ०९
अ॒यं ते॒ मानु॑षे जने॒ सोमः॑ पू॒रुषु॑ सूयते ।
तस्ये॒हि प्र द्र॑वा॒ पिब॑ ॥ ८ ०६४ १०
अ॒यं ते॑ शर्य॒णाव॑ति सु॒षोमा॑या॒म् अधि॑ प्रि॒यः ।
आ॒र्जी॒कीये॑ म॒दिन्त॑मः ॥ ८ ०६४ ११
तम् अ॒द्य राध॑से म॒हे चारु॒म् मदा॑य॒ घृष्व॑ये ।
एही॑म् इन्द्र॒ द्रवा॒ पिब॑ ॥ ८ ०६४ १२

(६७४)
यद् इ॑न्द्र॒ प्राग् अपा॒ग् उद॒ङ् न्यग् वा हू॒यसे॒ नृभिः॑ ।
आ या॑हि॒ तूय॑म् आ॒शुभिः॑ ॥ ८ ०६५ ०१
यद् वा॑ प्र॒स्रव॑णे दि॒वो मा॒दया॑से॒ स्व॑र्णरे ।
यद् वा॑ समु॒द्रे अन्ध॑सः ॥ ८ ०६५ ०२
आ त्वा॑ गी॒र्भिर् म॒हाम् उ॒रुं हु॒वे गाम् इ॑व॒ भोज॑से ।
इन्द्र॒ सोम॑स्य पी॒तये॑ ॥ ८ ०६५ ०३
आ त॑ इन्द्र महि॒मानं॒ हर॑यो देव ते॒ महः॑ ।

रथे वहन्तु बिभ्रतः ॥ ८ ०६५ ०४
इन्द्रं गृणीष उ स्तुषे महाँ उग्र ईशानकृत् ।
एहि नः सुतम् पिब ॥ ८ ०६५ ०५
सुतावन्तस् त्वा वयम् प्रयस्वन्तो हवामहे ।
इदं नो बर्हिर् आसदे ॥ ८ ०६५ ०६
यच् चिद् धि शश्वताम् असीन्द्र साधारणस् त्वम् ।
तं त्वा वयं हवामहे ॥ ८ ०६५ ०७
इदं ते सोम्यम् मध्व् अधुक्षन्न् अद्रिभिर् नरः ।
जुषाण इन्द्र तत् पिब ॥ ८ ०६५ ०८
विश्वाँ अर्यो विपश्चितो ऽति ख्यस् तूयम् आ गहि ।
अस्मे धेहि श्रवो बृहत् ॥ ८ ०६५ ०९
दाता मे पृषतीनां राजा हिरण्यवीनाम् ।
मा देवा मघवा रिषत् ॥ ८ ०६५ १०
सहस्रे पृषतीनाम् अधि श्चन्द्रम् बृहत् पृथु ।
शुक्रं हिरण्यम् आ ददे ॥ ८ ०६५ ११
नपातो दुर्गहस्य मे सहस्रेण सुराधसः ।
श्रवो देवेष्व् अक्रत ॥ ८ ०६५ १२

(६७५)
तरोभिर् वो विदद्वसुम् इन्द्रं सबाध ऊतये ।
बृहद् गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ ८ ०६६ ०१
न यं दुध्रा वरन्ते न स्थिरा मुरो मदे सुशिप्रम् अन्धसः ।
य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम् ॥ ८ ०६६ ०२
यः शक्रो मृक्षो अश्व्यो यो वा कीजो हिरण्ययः ।
स ऊर्वस्य रेजयत्य् अपावृतिम् इन्द्रो गव्यस्य वृत्रहा ॥ ८ ०६६ ०३
निखातं चिद् यः पुरुसम्भृतं वसूद् इद् वपति दाशुषे ।
वज्री सुशिप्रो हर्यश्व इत् करद् इन्द्रः क्रत्वा यथा वशत् ॥ ८ ०६६ ०४

यद् वावन्थ पुरुष्टुत पुरा चिच् छूर नृणाम् ।
वयं तत् त इन्द्र सम् भरामसि यज्ञम् उक्थं तुरं वचः ॥ ८ ०६६ ०५
सचा सोमेषु पुरुहूत वज्रिवो मदाय द्युक्ष सोमपाः ।
त्वम् इद् धि ब्रह्मकृते काम्यं वसु देष्ठः सुन्वते भुवः ॥ ८ ०६६ ०६
वयम् एनम् इदा ह्यो ऽपीपेमेह वज्रिणम् ।
तस्मा उ अद्य समना सुतम् भरा नूनम् भूषत श्रुते ॥ ८ ०६६ ०७
वृकश् चिद् अस्य वारण उरामथिर् आ वयुनेषु भूषति ।
सेमं न स्तोमं जुजुषाण आ गहि इन्द्र प्र चित्रया धिया ॥ ८ ०६६ ०८
कद् ऊ न्व् अ१ स्याकृतम् इन्द्रस्यास्ति पौंस्यम् ।
केनो नु कं श्रोमतेन न शुश्रुवे जनुषः परि वृत्रहा ॥ ८ ०६६ ०९
कद् ऊ महीर् अधृष्टा अस्य तविषीः कद् उ वृत्रघ्नो अस्तृतम् ।
इन्द्रो विश्वान् बेकनाटाँ अहर्दृश उत क्रत्वा पणीँर् अभि ॥ ८ ०६६ १०
वयं घा ते अपूर्व्येन्द्र ब्रह्माणि वृत्रहन् ।
पुरूतमासः पुरुहूत वज्रिवो भृतिं न प्र भरामसि ॥ ८ ०६६ ११
पूर्वीश् चिद् धि त्वे तुविकूर्मिन्न् आशसो हवन्त इन्द्रोतयः ।
तिरश् चिद् अर्यः सवना वसो गहि शविष्ठ श्रुधि मे हवम् ॥ ८ ०६६ १२
वयं घा ते त्वे इद् व् इन्द्र विप्रा अपि ष्मसि ।
नहि त्वद् अन्यः पुरुहूत कश् चन मघवन्न् अस्ति मर्डिता ॥ ८ ०६६ १३
त्वं नो अस्या अमतेर् उत क्षुधो ऽभिशस्तेर् अव स्पृधि ।
त्वं न ऊती तव चित्रया धिया शिक्षा शचिष्ठ गातुवित् ॥ ८ ०६६ १४
सोम इद् वः सुतो अस्तु कलयो मा बिभीतन ।
अपेद् एष ध्वस्मायति स्वयं घैषो अपायति ॥ ८ ०६६ १५

(६७६)
त्यान् नु क्षत्रियाँ अव आदित्यान् याचिषामहे ।
सुमृळीकाँ अभिष्टये ॥ ८ ०६७ ०१
मित्रो नो अत्य् अंहतिं वरुणः पर्षद् अर्यमा ।

आ॒दि॒त्यासो॒ यथा॑ वि॒दुः ॥ ८ ०६७ ०२
तेषां॒ हि चि॒त्रम् उ॒क्थ्य॒१ं॑ वरू॑थ॒म् अस्ति॑ दा॒शुषे॑ ।
आ॒दि॒त्याना॑म् अ॒रंकृते॑ ॥ ८ ०६७ ०३
महि॑ वो मह॒ताम् अवो॒ वरु॑ण॒ मित्रार्य॑मन् ।
अवां॒स्य् आ वृ॑णीमहे ॥ ८ ०६७ ०४
जी॒वान् नो॑ अ॒भि धे॑त॒नादि॑त्यासः पु॒रा ह॒थात् ।
कद् ध॑ स्थ हवनश्रुतः ॥ ८ ०६७ ०५
यद् वः॑ श्रा॒न्ताय॑ सुन्व॒ते वरू॑थ॒म् अस्ति॒ यच् छ॒र्दिः ।
तेना॑ नो॒ अधि॑ वोचत ॥ ८ ०६७ ०६
अस्ति॑ देवा अं॒होर् उ॒र्व् अस्ति॒ रत्न॒म् अना॑गसः ।
आदि॑त्या॒ अद्भु॑तैनसः ॥ ८ ०६७ ०७
मा नः॒ सेतुः॑ सिषेद् अ॒यम् म॒हे वृ॑णक्तु न॒स् परि॑ ।
इन्द्र॒ इद् धि श्रु॒तो व॒शी ॥ ८ ०६७ ०८
मा नो॑ मृ॒चा रि॑पू॒णां वृ॑जि॒नाना॑म् अविष्यवः ।
देवा॑ अ॒भि प्र मृ॑क्षत ॥ ८ ०६७ ०९
उ॒त त्वाम् अ॑दिते मह्य् अ॒हं दे॒व्य् उप॑ ब्रुवे ।
सु॒मृ॒ळी॒काम् अ॒भिष्ट॑ये ॥ ८ ०६७ १०
पर्षि॑ दी॒ने ग॑भी॒र आँ उग्र॑पुत्रे॒ जिघां॑सतः ।
माकि॑स् तो॒कस्य॑ नो रिषत् ॥ ८ ०६७ ११
अ॒ने॒हो न॑ उरुव्रज॒ उरू॑चि॒ वि प्रस॑र्तवे ।
कृ॒धि तो॒काय॑ जी॒वसे॑ ॥ ८ ०६७ १२
ये मू॒र्धानः॑ क्षिती॒नाम् अद॑ब्धासः॒ स्वय॑शसः ।
व्र॒ता रक्ष॑न्ते अ॒द्रुहः॑ ॥ ८ ०६७ १३
ते न॑ आ॒स्नो वृका॑णा॒म् आदि॑त्यासो मु॒मोच॑त ।
स्ते॒नम् ब॒द्धम् इ॑वादिते ॥ ८ ०६७ १४
अपो॒ षु ण॑ इ॒यं शरु॒र् आदि॑त्या॒ अप॑ दु॒र्मतिः ।
अ॒स्मद् ए॒त्व् अज॑घ्नुषी ॥ ८ ०६७ १५
शश्व॒द् धि वः॑ सुदानव॒ आदि॑त्या ऊ॒तिभि॑र् व॒यम् ।

पुरा नूनम् बुभुज्महे ॥ ८ ०६७ १६
शश्वन्तं हि प्रचेतसः प्रतियन्तं चिद् एनसः ।
देवाः कृणुथ जीवसे ॥ ८ ०६७ १७
तत् सु नो नव्यं सन्यस आदित्या यन् मुमोचति ।
बन्धाद् बद्धम् इवादिते ॥ ८ ०६७ १८
नास्माकम् अस्ति तत् तर आदित्यासो अतिष्कदे ।
यूयम् अस्मभ्यम् मृळत ॥ ८ ०६७ १९
मा नो हेतिर् विवस्वत आदित्याः कृत्रिमा शरुः ।
पुरा नु जरसो वधीत् ॥ ८ ०६७ २०
वि षु द्वेषो व्य् अंहतिम् आदित्यासो वि संहितम् ।
विष्वग् वि वृहता रपः ॥ ८ ०६७ २१

(६७७)
आ त्वा रथं यथोतये सुम्नाय वर्तयामसि ।
तुविकूर्मिम् ऋतीषहम् इन्द्र शविष्ठ सत्पते ॥ ८ ०६८ ०१
तुविशुष्म तुविक्रतो शचीवो विश्वया मते ।
आ पप्राथ महित्वना ॥ ८ ०६८ ०२
यस्य ते महिना महः परि ज्मायन्तम् ईयतुः ।
हस्ता वज्रं हिरण्ययम् ॥ ८ ०६८ ०३
विश्वानरस्य वस् पतिम् अनानतस्य शवसः ।
एवैश् च चर्षणीनाम् ऊती हुवे रथानाम् ॥ ८ ०६८ ०४
अभिष्टये सदावृधं स्वर्मीळ्हेषु यं नरः ।
नाना हवन्त ऊतये ॥ ८ ०६८ ०५
परोमात्रम् ऋचीषमम् इन्द्रम् उग्रं सुराधसम् ।
ईशानं चिद् वसूनाम् ॥ ८ ०६८ ०६
तं-तम् इद् राधसे मह इन्द्रं चोदामि पीतये ।
यः पूर्व्याम् अनुष्टुतिम् ईशे कृष्टीनां नृतुः ॥ ८ ०६८ ०७

न यस्य ते शवसान सख्यम् आनंश मर्त्यः ।
नकिः शवांसि ते नशत् ॥ ८ ०६८ ०८
त्वोतासस् त्वा युजाप्सु सूर्ये महद् धनम् ।
जयेम पृत्सु वज्रिवः ॥ ८ ०६८ ०९
तं त्वा यज्ञेभिर् ईमहे तं गीर्भिर् गिर्वणस्तम ।
इन्द्र यथा चिद् आविथ वाजेषु पुरुमाय्यम् ॥ ८ ०६८ १०
यस्य ते स्वादु सख्यं स्वाद्वी प्रणीतिर् अद्रिवः ।
यज्ञो वितन्तसाय्यः ॥ ८ ०६८ ११
उरु णस् तन्वे तन उरु क्षयाय नस् कृधि ।
उरु णो यन्धि जीवसे ॥ ८ ०६८ १२
उरुं नृभ्य उरुं गव उरुं रथाय पन्थाम् ।
देववीतिम् मनामहे ॥ ८ ०६८ १३
उप मा षड् द्वा-द्वा नरः सोमस्य हर्ष्या ।
तिष्ठन्ति स्वादुरातयः ॥ ८ ०६८ १४
ऋज्राव् इन्द्रोत आ ददे हरी ऋक्षस्य सूनवि ।
आश्वमेधस्य रोहिता ॥ ८ ०६८ १५
सुरथाँ आतिथिग्वे स्वभीशूँर् आर्क्षे ।
आश्वमेधे सुपेशसः ॥ ८ ०६८ १६
षळ् अश्वाँ आतिथिग्व इन्द्रोते वधूमतः ।
सचा पूतक्रतौ सनम् ॥ ८ ०६८ १७
ऐषु चेतद् वृषण्वत्य् अन्तर् ऋज्रेष्व् अरुषी ।
स्वभीशुः कशावती ॥ ८ ०६८ १८
न युष्मे वाजबन्धवो निनित्सुश् चन मर्त्यः ।
अवद्यम् अधि दीधरत् ॥ ८ ०६८ १९

(६७८)
प्र-प्र वस् त्रिष्टुभम् इषम् मन्दद्वीरायेन्दवे ।

धि॒या वो॑ मे॒धसा॑तये॒ पु॒रंध्या वि॑वासति ॥ ८ ०६९ ०१
न॒दं व॒ ओद॑तीनां न॒दं योयु॑वतीनाम् ।
पतिं॑ वो॒ अघ्न्या॑नां धेनू॒नाम् इ॑षुध्यसि ॥ ८ ०६९ ०२
ता अ॑स्य॒ सूद॑दोहसः॒ सोमं॑ श्रीणन्ति॒ पृश्न॑यः ।
जन्म॑न् दे॒वानां॒ विश॑स् त्रि॒ष्व् आ रो॑च॒ने दि॒वः ॥ ८ ०६९ ०३
अ॒भि प्र गोप॑तिं गि॒रेन्द्र॑म् अर्च॒ यथा॑ वि॒दे ।
सू॒नुं स॒त्यस्य॒ सत्प॑तिम् ॥ ८ ०६९ ०४
आ हर॑यः ससृज्रि॒रे ऽरु॑षी॒र् अधि॑ ब॒र्हिषि॑ ।
यत्रा॒भि सं॒नवा॑महे ॥ ८ ०६९ ०५
इन्द्रा॑य॒ गाव॑ आ॒शिरं॑ दु॒दु॒ह्रे व॒ज्रिणे॒ मधु॑ ।
यत् सी॑म् उपह्व॒रे वि॒दत् ॥ ८ ०६९ ०६
उद् यद् ब्र॒ध्नस्य॑ वि॒ष्टपं॑ गृ॒हम् इन्द्र॑श् च॒ गन्व॑हि ।
मध्वः॑ पी॒त्वा सचे॑वहि॒ त्रिः स॒प्त सख्युः॑ प॒दे ॥ ८ ०६९ ०७
अर्च॑त॒ प्रार्च॑त॒ प्रिय॑मेधासो॒ अर्च॑त ।
अर्च॑न्तु पु॒त्रका उ॒त पु॒रं न धृ॒ष्ण्व् अर्चत ॥ ८ ०६९ ०८
अव॑ स्वराति॒ गर्ग॑रो गो॒धा परि॑ सनिष्वणत् ।
पिङ्गा॒ परि॑ चनिष्कद॒द् इन्द्रा॑य॒ ब्रह्मोद्य॑तम् ॥ ८ ०६९ ०९
आ यत् पत॑न्त्य् ए॒न्यः सु॒दुघा॒ अन॑पस्फुरः ।
अ॒प॒स्फुरं॑ गृभायत॒ सोम॒म् इन्द्रा॑य॒ पात॑वे ॥ ८ ०६९ १०
अपा॒द् इन्द्रो॒ अपा॑द् अ॒ग्निर् विश्वे॑ दे॒वा अ॑मत्सत ।
वरु॑ण॒ इद् इ॒ह क्ष॑यत् तम् आपो॑ अ॒भ्य् अनूषत व॒त्सं सं॒शिश्व॑रीर् इव ॥ ८ ०६९ ११
सु॒दे॒वो अ॑सि वरुण॒ यस्य॑ ते स॒प्त सिन्ध॑वः ।
अ॒नु॒क्षर॑न्ति का॒कुदं॑ सू॒र्म्यं॑ सुषि॒राम् इ॑व ॥ ८ ०६९ १२
यो व्यती॒ँर् अफा॑णयत् सुयु॑क्ताँ उप॑ दा॒शुषे॑ ।
त॒क्वो ने॒ता तद् इद् वपु॑र् उप॒मा यो अमु॑च्यत ॥ ८ ०६९ १३
अतीद् उ॑ श॒क्र ओ॑हत॒ इन्द्रो॒ विश्वा॒ अति॒ द्विषः॑ ।
भि॒नत् क॒नीन॑ ओद॒नम् प॒च्यमा॑नम् प॒रो गि॒रा ॥ ८ ०६९ १४
अ॒र्भ॒को न कु॑मार॒को ऽधि॑ तिष्ठ॒न् नवं॒ रथ॑म् ।

स प॑क्षन् महि॒षम् मृ॒गम् पि॒त्रे मा॒त्रे वि॑भु॒क्रतु॑म् ॥ ८ ०६९ १५
आ तू सु॑शिप्र दम्पते॒ रथं॑ तिष्ठा हि॒रण्यय॑म् ।
अध॑ द्यु॒क्षं स॑चेवहि स॒हस्र॑पादम् अरु॒षं स्व॑स्ति॒गाम् अ॑ने॒हस॑म् ॥ ८ ०६९ १६
तं घे॑म् इ॒त्था न॑म॒स्विन॒ उप॑ स्व॒राज॑म् आसते ।
अर्थं॑ चिद् अस्य॒ सुधि॑तं॒ यद् एत॑व आ॒वर्त॑यन्ति दा॒वने॑ ॥ ८ ०६९ १७
अनु॑ प्र॒त्नस्यौक॑सः प्रि॒यमे॑धास एषाम् ।
पूर्वा॒म् अनु॒ प्रय॑तिं वृ॒क्तब॑र्हिषो हि॒तप्र॑यस आशत ॥ ८ ०६९ १८

(६७९)
यो राजा॑ चर्षणी॒नां याता॒ रथे॑भि॒र् अध्रि॑गुः ।
विश्वा॑सां तरु॒ता पृत॑नानां॒ ज्येष्ठो॒ यो वृ॑त्र॒हा गृ॒णे ॥ ८ ०७० ०१
इन्द्रं॒ तं शु॑म्भ पुरुहन्म॒न्न् अव॑से॒ यस्य॑ द्वि॒ता वि॑ध॒र्तरि॑ ।
हस्ता॑य॒ वज्रः॒ प्रति॑ धायि दर्श॒तो म॒हो दि॒वे न सूर्यः॑ ॥ ८ ०७० ०२
नकि॒ष् टं कर्म॑णा नश॒द् यश् च॒कार॑ स॒दावृ॑धम् ।
इन्द्रं॒ न य॒ज्ञैर् वि॒श्वगू॑र्त॒म् ऋभ्व॑स॒म् अधृ॑ष्टं धृ॒ष्णवो॑जसम् ॥ ८ ०७० ०३
अषा॑ळ्हम् उ॒ग्रम् पृत॑नासु सास॒हिं यस्मि॑न् म॒हीर् उ॑रु॒ज्रयः॑ ।
सं धे॒नवो॒ जाय॑माने अनोनवु॒र् द्यावः॒ क्षामो॑ अनोनवुः ॥ ८ ०७० ०४
यद् द्याव॑ इन्द्र ते श॒तं श॒तम् भूमी॑र् उ॒त स्युः ।
न त्वा॑ वज्रिन् स॒हस्रं॒ सूर्या॒ अनु॒ न जा॒तम् अ॑ष्ट॒ रोद॑सी ॥ ८ ०७० ०५
आ प॑प्राथ महि॒ना वृष्ण्या॑ वृष॒न् विश्वा॑ शविष्ठ॒ शव॑सा ।
अ॒स्माँ अ॑व मघव॒न् गोम॑ति व्र॒जे वज्रि॑ञ् चि॒त्राभि॑र् ऊ॒तिभिः॑ ॥ ८ ०७० ०६
न सी॒म् अदे॑व आप॒द् इषं॑ दीर्घायो॒ मर्त्यः॑ ।
एत॑ग्वा चि॒द् य एत॑शा यु॒योज॑ते॒ हरी॒ इन्द्रो॑ यु॒योज॑ते ॥ ८ ०७० ०७
तं वो॑ म॒हो म॒हाय्य॒म् इन्द्रं॑ दा॒नाय॑ स॒क्षणि॑म् ।
यो गा॒धेषु॒ य आर॑णेषु॒ हव्यो॒ वाजे॒ष्व् अस्ति॒ हव्यः॑ ॥ ८ ०७० ०८
उद् ऊ॒ षु णो॑ वसो म॒हे मृ॒शस्व॑ शू॒र राध॑से ।
उद् ऊ॒ षु म॒ह्यै म॑घवन् म॒घत्त॑य॒ उद् इ॑न्द्र॒ श्रव॑से म॒हे ॥ ८ ०७० ०९

त्वं न इन्द्र ऋतयुस् त्वानिदो नि तृम्पसि ।
मध्ये वसिष्व तुविनृम्णोर्वोर् नि दासं शिश्नथो हथैः ॥ ८ ०७० १०
अन्यव्रतम् अमानुषम् अयज्वानम् अदेवयुम् ।
अव स्वः सखा दुधुवीत पर्वतः सुघ्नाय दस्युम् पर्वतः ॥ ८ ०७० ११
त्वं न इन्द्रासां हस्ते शविष्ठ दावने ।
धानानां न सं गृभायास्मयुर् द्विः सं गृभायास्मयुः ॥ ८ ०७० १२
सखायः क्रतुम् इच्छत कथा राधाम शरस्य ।
उपस्तुतिम् भोजः सूरिर् यो अह्रयः ॥ ८ ०७० १३
भूरिभिः समह ऋषिभिर् बर्हिष्मद्भि स्तविष्यसे ।
यद् इत्थम् एकम्-एकम् इच् छर वत्सान् पराददः ॥ ८ ०७० १४
कर्णगृह्या मघवा शौरदेव्यो वत्सं नस् त्रिभ्य आनयत् ।
अजां सूरिर् न धातवे ॥ ८ ०७० १५

(६८०)
त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः ।
उत द्विषो मर्त्यस्य ॥ ८ ०७१ ०१
नहि मन्युः पौरुषेय ईशे हि वः प्रियजात ।
त्वम् इद् असि क्षपावान् ॥ ८ ०७१ ०२
स नो विश्वेभिर् देवेभिर् ऊर्जो नपाद् भद्रशोचे ।
रयिं देहि विश्ववारम् ॥ ८ ०७१ ०३
न तम् अग्ने अरातयो मर्तं युवन्त रायः ।
यं त्रायसे दाश्वांसम् ॥ ८ ०७१ ०४
यं त्वं विप्र मेधसाताव् अग्ने हिनोषि धनाय ।
स तवोती गोषु गन्ता ॥ ८ ०७१ ०५
त्वं रयिम् पुरुवीरम् अग्ने दाशुषे मर्ताय ।
प्र णो नय वस्यो अच्छ ॥ ८ ०७१ ०६
उरुष्या णो मा परा दा अघायते जातवेदः ।

दुराध्ये ३ मर्ताय ॥ ८ ०७१ ०७
अग्ने माकिष् टे देवस्य रातिम् अदेवो युयोत ।
त्वम् ईशिषे वसूनाम् ॥ ८ ०७१ ०८
स नो वस्व उप मास्य् ऊर्जो नपान् माहिनस्य ।
सखे वसो जरितृभ्यः ॥ ८ ०७१ ०९
अच्छा नः शीरशोचिषं गिरो यन्तु दर्शतम् ।
अच्छा यज्ञासो नमसा पुरूवसुम् पुरुप्रशस्तम् ऊतये ॥ ८ ०७१ १०
अग्निं सूनुं सहसो जातवेदसं दानाय वार्याणाम् ।
द्विता यो भूद् अमृतो मर्त्येष्व् आ होता मन्द्रतमो विशि ॥ ८ ०७१ ११
अग्निं वो देवयज्ययाग्निम् प्रयत्य् अध्वरे ।
अग्निं धीषु प्रथमम् अग्निम् अर्वत्य् अग्निं क्षैत्राय साधसे ॥ ८ ०७१ १२
अग्निर् इषां सख्ये ददातु न ईशे यो वार्याणाम् ।
अग्निं तोके तनये शश्वद् ईमहे वसुं सन्तं तनूपाम् ॥ ८ ०७१ १३
अग्निम् ईळिष्वावसे गाथाभिः शीरशोचिषम् ।
अग्निं राये पुरुमीळ्ह श्रुतं नरो ऽग्निं सुदीतये छर्दिः ॥ ८ ०७१ १४
अग्निं द्वेषो योतवै नो गृणीमस्य् अग्निं शं योश् च दातवे ।
विश्वासु विक्ष्व् अवितेव हव्यो भुवद् वस्तुर् ऋषूणाम् ॥ ८ ०७१ १५

(६८१)
हविष् कृणुध्वम् आ गमद् अध्वर्युर् वनते पुनः ।
विद्वाँ अस्य प्रशासनम् ॥ ८ ०७२ ०१
नि तिग्मम् अभ्य् अ१ंशुं सीदद् धोता मनाव् अधि ।
जुषाणो अस्य सख्यम् ॥ ८ ०७२ ०२
अन्तर् इच्छन्ति तं जने रुद्रम् परो मनीषया ।
गृभ्णन्ति जिह्वया ससम् ॥ ८ ०७२ ०३
जाम्य् अतीतपे धनुर् वयोधा अरुहद् वनम् ।
दृषदं जिह्वयावधीत् ॥ ८ ०७२ ०४

चरन् वत्सो रुशन्न् इह निदातारं न विन्दते ।
वेति स्तोतव अम्ब्यम् ॥ ८ ०७२ ०५
उतो न्व् अस्य यन् महद् अश्वावद् योजनम् बृहद् ।
दामा रथस्य ददृशे ॥ ८ ०७२ ०६
दुहन्ति सप्तैकाम् उप द्वा पञ्च सृजतः ।
तीर्थे सिन्धोर् अधि स्वरे ॥ ८ ०७२ ०७
आ दशभिर् विवस्वत इन्द्रः कोशम् अचुच्यवीत् ।
खेदया त्रिवृता दिवः ॥ ८ ०७२ ०८
परि त्रिधातुर् अध्वरं जूर्णिर् एति नवीयसी ।
मध्वा होतारो अञ्जते ॥ ८ ०७२ ०९
सिञ्चन्ति नमसावतम् उच्चाचक्रम् परिज्मानम् ।
नीचीनबारम् अक्षितम् ॥ ८ ०७२ १०
अभ्यारम् इद् अद्रयो निषिक्तम् पुष्करे मधु ।
अवतस्य विसर्जने ॥ ८ ०७२ ११
गाव उपावतावतम् मही यज्ञस्य रप्सुदा ।
उभा कर्णा हिरण्यया ॥ ८ ०७२ १२
आ सुते सिञ्चत श्रियं रोदस्योर् अभिश्रियम् ।
रसा दधीत वृषभम् ॥ ८ ०७२ १३
ते जानत स्वम् ओक्य १ं सं वत्सासो न मातृभिः ।
मिथो नसन्त जामिभिः ॥ ८ ०७२ १४
उप स्रक्केषु बप्सतः कृण्वते धरुणं दिवि ।
इन्द्रे अग्ना नमः स्वः ॥ ८ ०७२ १५
अधुक्षत् पिप्युषीम् इषम् ऊर्जं सप्तपदीम् अरिः ।
सूर्यस्य सप्त रश्मिभिः ॥ ८ ०७२ १६
सोमस्य मित्रावरुणोदिता सूर आ ददे ।
तद् आतुरस्य भेषजम् ॥ ८ ०७२ १७
उतो न्व् अस्य यत् पदं हर्यतस्य निधान्यम् ।
परि द्यां जिह्वयातनत् ॥ ८ ०७२ १८

(६८२)
उद् ईराथाम् ऋतायते युञ्जाथाम् अश्विना रथम् ।
अन्ति षद् भूतु वाम् अवः ॥ ८ ०७३ ०१
निमिषश् चिज् जवीयसा रथेना यातम् अश्विना ।
अन्ति षद् भूतु वाम् अवः ॥ ८ ०७३ ०२
उप स्तृणीतम् अत्रये हिमेन घर्मम् अश्विना ।
अन्ति षद् भूतु वाम् अवः ॥ ८ ०७३ ०३
कुह स्थः कुह जग्मथुः कुह श्येनेव पेतथुः ।
अन्ति षद् भूतु वाम् अवः ॥ ८ ०७३ ०४
यद् अद्य कर्हि कर्हि चिच् छुश्रूयातम् इमं हवम् ।
अन्ति षद् भूतु वाम् अवः ॥ ८ ०७३ ०५
अश्विना यामहूतमा नेदिष्ठं याम्य् आप्यम् ।
अन्ति षद् भूतु वाम् अवः ॥ ८ ०७३ ०६
अवन्तम् अत्रये गृहं कृणुतं युवम् अश्विना ।
अन्ति षद् भूतु वाम् अवः ॥ ८ ०७३ ०७
वरेथे अग्निम् आतपो वदते वल्ग्व् अत्रये ।
अन्ति षद् भूतु वाम् अवः ॥ ८ ०७३ ०८
प्र सप्तवध्रिर् आशसा धाराम् अग्नेर् अशायत ।
अन्ति षद् भूतु वाम् अवः ॥ ८ ०७३ ०९
इहा गतं वृषण्वसू शृणुतम् म इमं हवम् ।
अन्ति षद् भूतु वाम् अवः ॥ ८ ०७३ १०
किम् इदं वाम् पुराणवज् जरतोर् इव शस्यते ।
अन्ति षद् भूतु वाम् अवः ॥ ८ ०७३ ११
समानं वां सजात्यं समानो बन्धुर् अश्विना ।
अन्ति षद् भूतु वाम् अवः ॥ ८ ०७३ १२
यो वां रजांस्य् अश्विना रथो वियाति रोदसी ।

अन्ति॑ षद् भूतु वा॒म् अवः॑ ॥ ८ ०७३ १३
आ नो॒ गव्ये॑भि॒र् अश्व्यैः॑ स॒हस्रै॒र् उप॑ गच्छतम् ।
अन्ति॑ षद् भूतु वा॒म् अवः॑ ॥ ८ ०७३ १४
मा नो॒ गव्ये॑भि॒र् अश्व्यैः॑ स॒हस्रे॑भि॒र् अति॑ ख्यतम् ।
अन्ति॑ षद् भूतु वा॒म् अवः॑ ॥ ८ ०७३ १५
अ॒रु॒णप्सु॑र् उ॒षा अ॑भू॒द् अक॒र् ज्योति॑र् ऋ॒ताव॑री ।
अन्ति॑ षद् भूतु वा॒म् अवः॑ ॥ ८ ०७३ १६
अ॒श्विना॒ सु वि॒चाक॑शद् वृ॒क्षम् प॑रशु॒माँ इ॑व ।
अन्ति॑ षद् भूतु वा॒म् अवः॑ ॥ ८ ०७३ १७
पु॒रं न धृ॑ष्ण॒व् आ रु॑ज कृ॒ष्णया॑ बाधि॒तो वि॒शा ।
अन्ति॑ षद् भूतु वा॒म् अवः॑ ॥ ८ ०७३ १८

(६८३)
वि॒शो-वि॑शो वो॒ अति॑थिं वाज॒यन्तः॑ पुरुप्रि॒यम् ।
अ॒ग्निं वो॒ दु॒र्यं॑ वच॑ स्तु॒षे शू॒षस्य॒ मन्म॑भिः ॥ ८ ०७४ ०१
यं जना॑सो ह॒विष्म॑न्तो मि॒त्रं न स॒र्पिरा॑सुतिम् ।
प्र॒शंस॑न्ति॒ प्रश॑स्तिभिः ॥ ८ ०७४ ०२
पन्यां॑सं जा॒तवे॑दसं॒ यो दे॒वता॒त्य् उद्य॑ता ।
ह॒व्यान्य् ऐर॑यत् दि॒वि ॥ ८ ०७४ ०३
आग॑न्म वृत्र॒हन्त॑मं॒ ज्येष्ठ॑म् अ॒ग्निम् आन॑वम् ।
यस्य॑ श्रु॒तर्वा॑ बृ॒हन्न् आ॒र्क्षो अनी॑क॒ एध॑ते ॥ ८ ०७४ ०४
अ॒मृतं॑ जा॒तवे॑दसं ति॒रस् तमां॑सि द॒र्शतम् ।
घृ॒ताह॑वन॒म् ईड्य॑म् ॥ ८ ०७४ ०५
स॒बाधो॒ यं जना॑ इ॒मे ऽग्निं ह॒व्येभि॒र् ईळ॑ते ।
जु॒ह्वा॑नासो य॒तस्रु॑चः ॥ ८ ०७४ ०६
इ॒यं ते॒ नव्य॑सी म॒तिर् अग्ने॒ अधा॒य्य् अ॒स्मद् आ ।
मन्द्र॒ सुजा॑त॒ सुक्र॒तो ऽमू॑र॒ दस्माति॑थे ॥ ८ ०७४ ०७

सा ते॑ अग्ने॒ शंत॑मा॒ चनि॑ष्ठा भवतु प्रि॒या ।
तया॑ वर्धस्व॒ सुष्टु॑तः ॥ ८ ०७४ ०८
सा द्यु॒म्नैर् द्यु॒म्निनी॑ बृ॒हद् उपो॑प॒ श्रव॑सि॒ श्रवः॑ ।
दधी॑त वृत्र॒तूर्ये॑ ॥ ८ ०७४ ०९
अश्व॒म् इद् गां र॑थ॒प्रां त्वे॒षम् इन्द्रं॒ न सत्प॑तिम् ।
यस्य॒ श्रवां॑सि॒ तूर्व॑थ॒ पन्य॑म्-पन्यं च कृ॒ष्टयः॑ ॥ ८ ०७४ १०
यं त्वा॑ गो॒पव॑नो गि॒रा चनि॑ष्ठद् अग्ने अङ्गिरः ।
स पा॑वक श्रुधी॒ हव॑म् ॥ ८ ०७४ ११
यं त्वा॒ जना॑स॒ ईळ॑ते स॒बाधो॒ वाज॑सातये ।
स बो॑धि वृत्र॒तूर्ये॑ ॥ ८ ०७४ १२
अ॒हं हु॑वा॒न आ॒र्क्षे श्रु॒तर्व॑णि मद॒च्युति॑ ।
शर्धां॑सीव स्तुका॒विना॑म् मृ॒क्षा शी॒र्षा च॑तु॒र्णाम् ॥ ८ ०७४ १३
मां च॒त्वार॑ आ॒शवः॒ शवि॑ष्ठस्य द्रवि॒त्नवः॑ ।
सु॒रथा॑सो अ॒भि प्रयो॒ वक्ष॒न् वयो॒ न तुग्र्य॑म् ॥ ८ ०७४ १४
स॒त्यम् इत् त्वा॑ महेनदि॒ परु॒ष्ण्य् अव॑ देदिशम् ।
नेम् आ॑पो अश्व॒दात॑रः॒ शवि॑ष्ठाद् अस्ति॒ मर्त्यः॑ ॥ ८ ०७४ १५

(६८४)
यु॒क्ष्वा हि दे॑व॒हूत॑माँ॒ अश्वाँ॑ अग्ने र॒थीर् इ॑व ।
नि होता॑ पू॒र्व्यः स॑दः ॥ ८ ०७५ ०१
उ॒त नो॑ देव दे॒वाँ अच्छा॑ वोचो वि॒दुष्ट॑रः ।
श्रद् विश्वा॒ वार्या॑ कृधि ॥ ८ ०७५ ०२
त्वं ह॒ यद् य॑विष्ठ्य॒ सह॑सः सूनव् आहुत ।
ऋ॒तावा॑ य॒ज्ञियो॒ भुवः॑ ॥ ८ ०७५ ०३
अ॒यम् अ॒ग्निः स॑ह॒स्रिणो॒ वाज॑स्य श॒तिन॒स् पतिः॑ ।
मू॒र्धा क॒वी र॑यी॒णाम् ॥ ८ ०७५ ०४
तं ने॒मिम् ऋ॒भवो॑ य॒था न॑मस्व॒ सहू॑तिभिः ।

नेदीयो यज्ञम् अङ्गिरः ॥ ८ ०७५ ०५
तस्मै नूनम् अभिद्यवे वाचा विरूप नित्यया ।
वृष्णे चोदस्व सुष्टुतिम् ॥ ८ ०७५ ०६
कम् उ ष्विद् अस्य सेनयाग्नेर् अपाकचक्षसः ।
पणिं गोषु स्तरामहे ॥ ८ ०७५ ०७
मा नो देवानां विशः प्रस्नातीर् इवोस्राः ।
कृशं न हासुर् अघ्न्याः ॥ ८ ०७५ ०८
मा नः समस्य दूढ्य १ः परिद्वेषसो अंहतिः ।
ऊर्मिर् न नावम् आ वधीत् ॥ ८ ०७५ ०९
नमस् ते अग्न ओजसे गृणन्ति देव कृष्टयः ।
अमैर् अमित्रम् अर्दय ॥ ८ ०७५ १०
कुवित् सु नो गविष्टये ऽग्ने संवेषिषो रयिम् ।
उरुकृद् उरु णस् कृधि ॥ ८ ०७५ ११
मा नो अस्मिन् महाधने परा वर्ग् भारभृद् यथा ।
संवर्गं सं रयिं जय ॥ ८ ०७५ १२
अन्यम् अस्मद् भिया इयम् अग्ने सिषक्तु दुच्छुना ।
वर्धा नो अमवच् छवः ॥ ८ ०७५ १३
यस्याजुषन् नमस्विनः शमीम् अदुर्मखस्य वा ।
तं घेद् अग्निर् वृधावति ॥ ८ ०७५ १४
परस्या अधि संवतो ऽवराँ अभ्य् आ तर ।
यत्राहम् अस्मि ताँ अव ॥ ८ ०७५ १५
विद्मा हि ते पुरा वयम् अग्ने पितुर् यथावसः ।
अधा ते सुम्नम् ईमहे ॥ ८ ०७५ १६

(६८५)
इमं नु मायिनं हुव इन्द्रम् ईशानम् ओजसा ।
मरुत्वन्तं न वृञ्जसे ॥ ८ ०७६ ०१

अयम् इन्द्रो मरुत्सखा वि वृत्रस्याभिनच् छिरः ।
वज्रेण शतपर्वणा ॥ ८ ०७६ ०२
वावृधानो मरुत्सखेन्द्रो वि वृत्रम् ऐरयत् ।
सृजन् समुद्रिया अपः ॥ ८ ०७६ ०३
अयं ह येन वा इदं स्वर् मरुत्वता जितम् ।
इन्द्रेण सोमपीतये ॥ ८ ०७६ ०४
मरुत्वन्तम् ऋजीषिणम् ओजस्वन्तं विरप्शिनम् ।
इन्द्रं गीर्भिर् हवामहे ॥ ८ ०७६ ०५
इन्द्रम् प्रत्नेन मन्मना मरुत्वन्तं हवामहे ।
अस्य सोमस्य पीतये ॥ ८ ०७६ ०६
मरुत्वाँ इन्द्र मीढ्वः पिबा सोमं शतक्रतो ।
अस्मिन् यज्ञे पुरुष्टुत ॥ ८ ०७६ ०७
तुभ्येद् इन्द्र मरुत्वते सुताः सोमासो अद्रिवः ।
हृदा हूयन्त उक्थिनः ॥ ८ ०७६ ०८
पिबेद् इन्द्र मरुत्सखा सुतं सोमं दिविष्टिषु ।
वज्रं शिशान ओजसा ॥ ८ ०७६ ०९
उत्तिष्ठन्न् ओजसा सह पीत्वी शिप्रे अवेपयः ।
सोमम् इन्द्र चमू सुतम् ॥ ८ ०७६ १०
अनु त्वा रोदसी उभे क्रक्षमाणम् अकृपेताम् ।
इन्द्र यद् दस्युहाभवः ॥ ८ ०७६ ११
वाचम् अष्टापदीम् अहं नवस्रक्तिम् ऋतस्पृशम् ।
इन्द्रात् परि तन्वम् ममे ॥ ८ ०७६ १२

(६८६)
जज्ञानो नु शतक्रतुर् वि पृच्छद् इति मातरम् ।
क उग्राः के ह शृण्विरे ॥ ८ ०७७ ०१
आद् ईं शवस्य् अब्रवीद् और्णवाभम् अहीशुवम् ।

ते पुत्र सन्तु निष्टुरः ॥ ८ ०७७ ०२
सम् इत् तान् वृत्रहाखिदत् खे अराꣳइव खेदया ।
प्रवृद्धो दस्युहाभवत् ॥ ८ ०७७ ०३
एकया प्रतिधापिबत् साकं सरांसि त्रिंशतम् ।
इन्द्रः सोमस्य काणुका ॥ ८ ०७७ ०४
अभि गन्धर्वम् अतृणद् अबुध्नेषु रजस्स्व् आ ।
इन्द्रो ब्रह्मभ्य इद् वृधे ॥ ८ ०७७ ०५
निर् आविध्यद् गिरिभ्य आ धारयत् पक्वम् ओदनम् ।
इन्द्रो बुन्दं स्वाततम् ॥ ८ ०७७ ०६
शतब्रध्न इषुस् तव सहस्रपर्ण एक इत् ।
यम् इन्द्र चकृषे युजम् ॥ ८ ०७७ ०७
तेन स्तोतृभ्य आ भर नृभ्यो नारिभ्यो अत्तवे ।
सद्यो जात ऋभुष्ठिर ॥ ८ ०७७ ०८
एता च्यौत्नानि ते कृता वर्षिष्ठानि परीणसा ।
हृदा वीड्व् अधारयः ॥ ८ ०७७ ०९
विश्वेत् ता विष्णुर् आभरद् उरुक्रमस् त्वेषितः ।
शतम् महिषान् क्षीरपाकम् ओदनं वराहम् इन्द्र एमुषम् ॥ ८ ०७७ १०
तुविक्षं ते सुकृतं सूमयं धनुः साधुर् बुन्दो हिरण्ययः ।
उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिद् ऋदूवृधा ॥ ८ ०७७ ११

(६८७)
पुरोळाशं नो अन्धस इन्द्र सहस्रम् आ भर ।
शता च शूर गोनाम् ॥ ८ ०७८ ०१
आ नो भर व्यञ्जनं गाम् अश्वम् अभ्यञ्जनम् ।
सचा मना हिरण्यया ॥ ८ ०७८ ०२
उत नः कर्णशोभना पुरूणि धृष्णव् आ भर ।
त्वं हि शृण्विषे वसो ॥ ८ ०७८ ०३

नकीं वृधीक इन्द्र ते न सुषा न सुदा उत ।
नान्यस् त्वच् छूर वाघतः ॥ ८ ०७८ ०४
नकीम् इन्द्रो निकर्तवे न शक्रः परिशक्तवे ।
विश्वं शृणोति पश्यति ॥ ८ ०७८ ०५
स मन्युम् मर्त्यानाम् अदब्धो नि चिकीषते ।
पुरा निदश् चिकीषते ॥ ८ ०७८ ०६
क्रत्व इत् पूर्णम् उदरं तुरस्यास्ति विधतः ।
वृत्रघ्नः सोमपाव्नः ॥ ८ ०७८ ०७
त्वे वसूनि संगता विश्वा च सोम सौभगा ।
सुदात्व् अपरिह्वृता ॥ ८ ०७८ ०८
त्वाम् इद् यवयुर् मम कामो गव्युर् हिरण्ययुः ।
त्वाम् अश्वयुर् एषते ॥ ८ ०७८ ०९
तवेद् इन्द्राहम् आशसा हस्ते दात्रं चना ददे ।
दिनस्य वा मघवन् सम्भृतस्य वा पूर्धि यवस्य काशिना ॥ ८ ०७८ १०

(६८८)
अयं कृत्नुर् अगृभीतो विश्वजिद् उद्भिद् इत् सोमः ।
ऋषिर् विप्रः काव्येन ॥ ८ ०७९ ०१
अभ्य् ऊर्णोति यन् नग्नम् भिषक्ति विश्वं यत् तुरम् ।
प्रेम् अन्धः ख्यन् निः श्रोणो भूत् ॥ ८ ०७९ ०२
त्वं सोम तनूकृद्भ्यो द्वेषोभ्यो ऽन्यकृतेभ्यः ।
उरु यन्तासि वरूथम् ॥ ८ ०७९ ०३
त्वं चित्ती तव दक्षैर् दिव आ पृथिव्या ऋजीषिन् ।
यावीर् अघस्य चिद् द्वेषः ॥ ८ ०७९ ०४
अर्थिनो यन्ति चेद् अर्थं गच्छान् इद् ददुषो रातिम् ।
ववृज्युस् तृष्यतः कामम् ॥ ८ ०७९ ०५
विदद् यत् पूर्व्यं नष्टम् उद् ईम् ऋतायुम् ईरयत् ।

प्रेम् आयुस् तारीद् अतीर्णम् ॥ ८ ०७९ ०६
सुशेवो नो मृळयाकुर् अदृप्तक्रतुर् अवातः ।
भवा नः सोम शं हृदे ॥ ८ ०७९ ०७
मा नः सोम सं वीविजो मा वि बीभिषथा राजन् ।
मा नो हार्दि त्विषा वधीः ॥ ८ ०७९ ०८
अव यत् स्वे सधस्थे देवानां दुर्मतीर् ईक्षे ।
राजन्न् अप द्विषः सेध मीढ्वो अप स्रिधः सेध ॥ ८ ०७९ ०९

(६८९)
नह्य अ न्यम् बळाकरम् मर्डितारं शतक्रतो ।
त्वं न इन्द्र मृळय ॥ ८ ०८० ०१
यो नः शश्वत् पुराविथामृध्रो वाजसातये ।
स त्वं न इन्द्र मृळय ॥ ८ ०८० ०२
किम् अङ्ग रध्रचोदनः सुन्वानस्यावितेद् असि ।
कुवित् स्व् ऐन्द्र णः शकः ॥ ८ ०८० ०३
इन्द्र प्र णो रथम् अव पश्चाच् चित् सन्तम् अद्रिवः ।
पुरस्ताद् एनम् मे कृधि ॥ ८ ०८० ०४
हन्तो नु किम् आससे प्रथमं नो रथं कृधि ।
उपमं वाजयु श्रवः ॥ ८ ०८० ०५
अवा नो वाजयुं रथं सुकरं ते किम् इत् परि ।
अस्मान् सु जिग्युषस् कृधि ॥ ८ ०८० ०६
इन्द्र दृह्यस्व पूर् असि भद्रा त एति निष्कृतम् ।
इयं धीर् ऋत्वियावती ॥ ८ ०८० ०७
मा सीम् अवद्य आ भाग् उर्वी काष्ठा हितं धनम् ।
अपावृक्ता अरत्नयः ॥ ८ ०८० ०८
तुरीयं नाम यज्ञियं यदा करस् तद् उश्मसि ।
आद् इत् पतिर् न ओहसे ॥ ८ ०८० ०९

अवीवृधद् वो अमृता अमन्दीद् एकद्यूर् देवा उत याश् च देवीः ।
तस्मा उ राधः कृणुत प्रशस्तम् प्रातर् मक्षू धियावसुर् जगम्यात् ॥ ८ ०८० १०

(६९०)
आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय ।
महाहस्ती दक्षिणेन ॥ ८ ०८१ ०१
विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् ।
तुविमात्रम् अवोभिः ॥ ८ ०८१ ०२
नहि त्वा शूर देवा न मर्तासो दित्सन्तम् ।
भीमं न गां वारयन्ते ॥ ८ ०८१ ०३
एतो न्व् इन्द्रं स्तवामेशानं वस्वः स्वराजम् ।
न राधसा मर्धिषन् नः ॥ ८ ०८१ ०४
प्र स्तोषद् उप गासिषच् छ्रवत् साम गीयमानम् ।
अभि राधसा जुगुरत् ॥ ८ ०८१ ०५
आ नो भर दक्षिणेनाभि सव्येन प्र मृश ।
इन्द्र मा नो वसोर् निर् भाक् ॥ ८ ०८१ ०६
उप क्रमस्वा भर धृषता धृष्णो जनानाम् ।
अदाशूष्टरस्य वेदः ॥ ८ ०८१ ०७
इन्द्र य उ नु ते अस्ति वाजो विप्रेभिः सनित्वः ।
अस्माभिः सु तं सनुहि ॥ ८ ०८१ ०८
सद्योजुवस् ते वाजा अस्मभ्यं विश्वश्चन्द्राः ।
वशैश् च मक्षू जरन्ते ॥ ८ ०८१ ०९

(६९१)
आ प्र द्रव परावतो ऽर्वावतश् च वृत्रहन् ।
मध्वः प्रति प्रभर्मणि ॥ ८ ०८२ ०१

तीव्राः सोमास आ गहि सुतासो मादयिष्णवः ।
पिबा दधृग् यथोचिषे ॥ ८ ०८२ ०२
इषा मन्दस्वाद् उ ते ऽरं वराय मन्यवे ।
भुवत् त इन्द्र शं हृदे ॥ ८ ०८२ ०३
आ त्व् अशत्रव् आ गहि न्य् उ क्थानि च हूयसे ।
उपमे रोचने दिवः ॥ ८ ०८२ ०४
तुभ्यायम् अद्रिभिः सुतो गोभिः श्रीतो मदाय कम् ।
प्र सोम इन्द्र हूयते ॥ ८ ०८२ ०५
इन्द्र श्रुधि सु मे हवम् अस्मे सुतस्य गोमतः ।
वि पीतिं तृप्तिम् अश्नुहि ॥ ८ ०८२ ०६
य इन्द्र चमसेष्व् आ सोमश् चमूषु ते सुतः ।
पिबेद् अस्य त्वम् ईशिषे ॥ ८ ०८२ ०७
यो अप्सु चन्द्रमा इव सोमश् चमूषु ददृशे ।
पिबेद् अस्य त्वम् ईशिषे ॥ ८ ०८२ ०८
यं ते श्येनः पदाभरत् तिरो रजांस्य् अस्पृतम् ।
पिबेद् अस्य त्वम् ईशिषे ॥ ८ ०८२ ०९

(६९२)
देवानाम् इद् अवो महत् तद् आ वृणीमहे वयम् ।
वृष्णाम् अस्मभ्यम् ऊतये ॥ ८ ०८३ ०१
ते नः सन्तु युजः सदा वरुणो मित्रो अर्यमा ।
वृधासश् च प्रचेतसः ॥ ८ ०८३ ०२
अति नो विष्पिता पुरु नौभिर् अपो न पर्षथ ।
यूयम् ऋतस्य रथ्यः ॥ ८ ०८३ ०३
वामं नो अस्त्व् अर्यमन् वामं वरुण शंस्यम् ।
वामं ह्य् आवृणीमहे ॥ ८ ०८३ ०४
वामस्य हि प्रचेतस ईशानाशो रिशादसः ।

नेम् आदित्या अघस्य यत् ॥ ८ ०८३ ०५
वयम् इद् वः सुदानवः क्षियन्तो यान्तो अध्वन्न् आ ।
देवा वृधाय हूमहे ॥ ८ ०८३ ०६
अधि न इन्द्रैषां विष्णो सजात्यानाम् ।
इता मरुतो अश्विना ॥ ८ ०८३ ०७
प्र भ्रातृत्वं सुदानवो ऽध द्विता समान्या ।
मातुर् गर्भे भरामहे ॥ ८ ०८३ ०८
यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः ।
अधा चिद् व उत ब्रुवे ॥ ८ ०८३ ०९

(६९३)
प्रेष्ठं वो अतिथिं स्तुषे मित्रम् इव प्रियम् ।
अग्निं रथं न वेद्यम् ॥ ८ ०८४ ०१
कविम् इव प्रचेतसं यं देवासो अध द्विता ।
नि मर्त्येष्व् आदधुः ॥ ८ ०८४ ०२
त्वं यविष्ठ दाशुषो नॄः पाहि शृणुधी गिरः ।
रक्षा तोकम् उत त्मना ॥ ८ ०८४ ०३
कया ते अग्ने अङ्गिर ऊर्जो नपाद् उपस्तुतिम् ।
वराय देव मन्यवे ॥ ८ ०८४ ०४
दाशेम कस्य मनसा यज्ञस्य सहसो यहो ।
कद् उ वोच इदं नमः ॥ ८ ०८४ ०५
अधा त्वं हि नस् करो विश्वा अस्मभ्यं सुक्षितीः ।
वाजद्रविणसो गिरः ॥ ८ ०८४ ०६
कस्य नूनम् परीणसो धियो जिन्वसि दम्पते ।
गोषाता यस्य ते गिरः ॥ ८ ०८४ ०७
तम् मर्जयन्त सुक्रतुम् पुरोयावानम् आजिषु ।
स्वेषु क्षयेषु वाजिनम् ॥ ८ ०८४ ०८

क्षेति क्षेमेभिः साधुभिर् नकिर् यं घ्नन्ति हन्ति यः ।
अग्ने सुवीर एधते ॥ ८ ०८४ ०९

(६९४)
आ मे हवं नासत्याश्विना गच्छतं युवम् ।
मध्वः सोमस्य पीतये ॥ ८ ०८५ ०१
इमम् मे स्तोमम् अश्विनेमम् मे शृणुतं हवम् ।
मध्वः सोमस्य पीतये ॥ ८ ०८५ ०२
अयं वां कृष्णो अश्विना हवते वाजिनीवसू ।
मध्वः सोमस्य पीतये ॥ ८ ०८५ ०३
शृणुतं जरितुर् हवं कृष्णस्य स्तुवतो नरा ।
मध्वः सोमस्य पीतये ॥ ८ ०८५ ०४
छर्दिर् यन्तम् अदाभ्यं विप्राय स्तुवते नरा ।
मध्वः सोमस्य पीतये ॥ ८ ०८५ ०५
गच्छतं दाशुषो गृहम् इत्था स्तुवतो अश्विना ।
मध्वः सोमस्य पीतये ॥ ८ ०८५ ०६
युञ्जाथां रासभं रथे वीड्वङ्गे वृषण्वसू ।
मध्वः सोमस्य पीतये ॥ ८ ०८५ ०७
त्रिवन्धुरेण त्रिवृता रथेना यातम् अश्विना ।
मध्वः सोमस्य पीतये ॥ ८ ०८५ ०८
नू मे गिरो नासत्याश्विना प्रावतं युवम् ।
मध्वः सोमस्य पीतये ॥ ८ ०८५ ०९

(६९५)
उभा हि दस्रा भिषजा मयोभुवोभा दक्षस्य वचसो बभूवथुः ।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥ ८ ०८६ ०१

कथा नूनं वां विमना उप स्तवद् युवं धियं ददथुर् वस्यऽइष्टये ।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥ ८ ०८६ ०२
युवं हि ष्मा पुरुभुजेमम् एधतुं विष्णाप्वे ददथुर् वस्यऽइष्टये ।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥ ८ ०८६ ०३
उत त्यं वीरं धनसाम् ऋजीषिणं दूरे चित् सन्तम् अवसे हवामहे ।
यस्य स्वादिष्ठा सुमतिः पितुर् यथा मा नो वि यौष्टं सख्या मुमोचतम् ॥ ८ ०८६ ०४
ऋतेन देवः सविता शमायत ऋतस्य शृङ्गम् उर्विया वि पप्रथे ।
ऋतं सासाह महि चित् पृतन्यतो मा नो वि यौष्टं सख्या मुमोचतम् ॥ ८ ०८६ ०५

(६९६)
द्युम्नी वां स्तोमो अश्विना क्रिविर् न सेक आ गतम् ।
मध्वः सुतस्य स दिवि प्रियो नरा पातं गौराव् इवेरिणे ॥ ८ ०८७ ०१
पिबतं घर्मम् मधुमन्तम् अश्विना बर्हिः सीदतं नरा ।
ता मन्दसाना मनुषो दुरोण आ नि पातं वेदसा वयः ॥ ८ ०८७ ०२
आ वां विश्वाभिर् ऊतिभिः प्रियमेधा अहूषत ।
ता वर्तिर् यातम् उप वृक्तबर्हिषो जुष्टं यज्ञं दिविष्टिषु ॥ ८ ०८७ ०३
पिबतं सोमम् मधुमन्तम् अश्विना बर्हिः सीदतं सुमत् ।
ता वावृधाना उप सुष्टुतिं दिवो गन्तं गौराव् इवेरिणम् ॥ ८ ०८७ ०४
आ नूनं यातम् अश्विनाश्वेभिः प्रुषितप्सुभिः ।
दस्रा हिरण्यवर्तनी शुभस् पती पातं सोमम् ऋतावृधा ॥ ८ ०८७ ०५
वयं हि वां हवामहे विपन्यवो विप्रासो वाजसातये ।
ता वल्गू दस्रा पुरुदंससा धियाश्विना श्रुष्ट्य् आ गतम् ॥ ८ ०८७ ०६

(६९७)
तं वो दस्मम् ऋतीषहं वसोर् मन्दानम् अन्धसः ।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर् नवामहे ॥ ८ ०८८ ०१

द्युक्षं सुदानुं तविषीभिर् आवृतं गिरिं न पुरुभोजसम् ।
क्षुमन्तं वाजं शतिनं सहस्रिणम् मक्षू गोमन्तम् ईमहे ॥ ८ ०८८ ०२
न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीळवः ।
यद् दित्ससि स्तुवते मावते वसु नकिष् टद् आ मिनाति ते ॥ ८ ०८८ ०३
योद्धासि क्रत्वा शवसोत दंसना विश्वा जाताभि मज्मना ।
आ त्वायम् अर्क ऊतये ववर्तति यं गोतमा अजीजनन् ॥ ८ ०८८ ०४
प्र हि रिरिक्ष ओजसा दिवो अन्तेभ्यस् परि ।
न त्वा विव्याच रज इन्द्र पार्थिवम् अनु स्वधां ववक्षिथ ॥ ८ ०८८ ०५
नकिः परिष्टिर् मघवन् मघस्य ते यद् दाशुषे दशस्यसि ।
अस्माकम् बोध्य् उचथस्य चोदिता मंहिष्ठो वाजसातये ॥ ८ ०८८ ०६

(६९८)
बृहद् इन्द्राय गायत मरुतो वृत्रहन्तमम् ।
येन ज्योतिर् अजनयन्न् ऋतावृधो देवं देवाय जागृवि ॥ ८ ०८९ ०१
अपाधमद् अभिशस्तीर् अशस्तिहाथेन्द्रो द्युम्न्य् आभवत् ।
देवास् त इन्द्र सख्याय येमिरे बृहद्भानो मरुद्गण ॥ ८ ०८९ ०२
प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत ।
वृत्रं हनति वृत्रहा शतक्रतुर् वज्रेण शतपर्वणा ॥ ८ ०८९ ०३
अभि प्र भर धृषता धृषन्मनः श्रवश् चित् ते असद् बृहत् ।
अर्षन्त्व् आपो जवसा वि मातरो हनो वृत्रं जया स्वः ॥ ८ ०८९ ०४
यज् जायथा अपूर्व्य मघवन् वृत्रहत्याय ।
तत् पृथिवीम् अप्रथयस् तद् अस्तभ्ना उत द्याम् ॥ ८ ०८९ ०५
तत् ते यज्ञो अजायत तद् अर्क उत हस्कृतिः ।
तद् विश्वम् अभिभूर् असि यज् जातं यच् च जन्त्वम् ॥ ८ ०८९ ०६
आमासु पक्वम् ऐरय आ सूर्यं रोहयो दिवि ।
घर्मं न सामन् तपता सुवृक्तिभिर् जुष्टं गिर्वणसे बृहत् ॥ ८ ०८९ ०७

(६९९)
आ नो॒ विश्वा॑सु ह॒व्य इन्द्र॑ः स॒मत्सु॑ भूषतु ।
उप॒ ब्रह्मा॑णि॒ सव॑नानि वृत्र॒हा प॑रम॒ज्या ऋची॑षमः ॥ ८ ०९० ०१
त्वं दा॒ता प्र॑थ॒मो राध॑साम् अ॒स्य् असि॑ स॒त्य ई॑शान॒कृत् ।
तु॒वि॒द्यु॒म्नस्य॒ युज्या वृ॑णीमहे पु॒त्रस्य॒ शव॑सो म॒हः ॥ ८ ०९० ०२
ब्रह्मा॑ त इन्द्र गिर्वणः क्रि॒यन्ते॒ अन॑तिद्भुता ।
इ॒मा जु॑षस्व हर्यश्व॒ योज॒नेन्द्र॒ या ते॒ अम॑न्महि ॥ ८ ०९० ०३
त्वं हि स॒त्यो म॑घव॒न्न् अना॑नतो वृ॒त्रा भूरि॑ न्यृ॒ञ्जसे॑ ।
स त्वं श॑विष्ठ वज्रहस्त दा॒शुषे॑ ऽर्वा॒ञ्चं॑ र॒यिम् आ कृ॑धि ॥ ८ ०९० ०४
त्वम् इ॑न्द्र य॒शा अ॑स्य् ऋजी॒षी शव॑सस् पते ।
त्वं वृ॒त्राणि॑ हंस्य् अप्र॒तीन्य् एक॒ इद् अनु॑त्ता चर्षणी॒धृता॑ ॥ ८ ०९० ०५
तम् उ॑ त्वा नू॒नम् अ॑सु॒र प्रचे॑तसं॒ राधो॑ भा॒गम् इ॑वेमहे ।
म॒ही॒व कृत्ति॑ः श॒रणा॑ त इन्द्र॒ प्र ते॑ सु॒म्ना नो॑ अश्नवन् ॥ ८ ०९० ०६

(७००)
क॒न्या॒ ३ वार् अ॑वाय॒ती सोम॒म् अपि॑ स्रु॒ताऽवि॑दत् ।
अस्त॒म् भर॑न्त्य् अब्रवी॒द् इन्द्रा॑य सुनवै त्वा श॒क्राय॑ सुनवै त्वा ॥ ८ ०९१ ०१
अ॒सौ य एषि॑ वीर॒को गृ॒हं-गृ॑हं वि॒चाक॑शद् ।
इ॒मं जम्भ॑सुतम् पिब धा॒नाव॑न्तं क॒रम्भिण॑म् अपू॒पव॑न्तम् उ॒क्थिन॑म् ॥ ८ ०९१ ०२
आ च॒न त्वा॑ चिकित्सा॒मो ऽधि॑ च॒न त्वा॒ नेम॑सि ।
शनै॑र् इव श॒नकै॑र् इ॒वेन्द्रा॑येन्दो॒ परि॑ स्रव ॥ ८ ०९१ ०३
कु॒विच् छक॑त् कु॒वित् कर॑त् कु॒विन् नो॒ वस्य॑स॒स् कर॑त् ।
कु॒वित् प॑ति॒द्विषो॑ य॒तीर् इन्द्रे॑ण सं॒गमा॑महै ॥ ८ ०९१ ०४
इ॒मानि॒ त्रीणि॑ वि॒ष्टपा॒ तानी॑न्द्र॒ वि रो॑हय ।
शिर॑स् त॒तस्यो॒र्वरा॒म् आद् इ॒दम् म॒ उपो॒दरे॑ ॥ ८ ०९१ ०५
अ॒सौ च॒ या न॑ उ॒र्वराद् इ॒मां त॒न्व१॒म् मम॑ ।

अथो ततस्य यच् छिरः सर्वा ता रोमशा कृधि ॥ ८ ०९१ ०६
खे रथस्य खे ऽनसः खे युगस्य शतक्रतो ।
अपालाम् इन्द्र त्रिष् पूत्व्य् अकृणोः सूर्यत्वचम् ॥ ८ ०९१ ०७

(७०१)
पान्तम् आ वो अन्धस इन्द्रम् अभि प्र गायत ।
विश्वासाहं शतक्रतुम् मंहिष्ठं चर्षणीनाम् ॥ ८ ०९२ ०१
पुरुहूतम् पुरुष्टुतं गाथान्य꣡ꣳ सनश्रुतम् ।
इन्द्र इति ब्रवीतन ॥ ८ ०९२ ०२
इन्द्र इन् नो महानां दाता वाजानां नृतुः ।
महाꣳ अभिज्ञ्व् आ यमत् ॥ ८ ०९२ ०३
अपाद् उ शिप्र्य् अन्धसः सुदक्षस्य प्रहोषिणः ।
इन्दोर् इन्द्रो यवाशिरः ॥ ८ ०९२ ०४
तम् व् अभि प्रार्चतेन्द्रं सोमस्य पीतये ।
तद् इद् ध्य् अस्य वर्धनम् ॥ ८ ०९२ ०५
अस्य पीत्वा मदानां देवो देवस्यौजसा ।
विश्वाभि भुवना भुवत् ॥ ८ ०९२ ०६
त्यम् उ वः सत्रासाहं विश्वासु गीर्ष्व् आयतम् ।
आ च्यावयस्य् ऊतये ॥ ८ ०९२ ०७
युध्मं सन्तम् अनर्वाणं सोमपाम् अनपच्युतम् ।
नरम् अवार्यक्रतुम् ॥ ८ ०९२ ०८
शिक्षा ण इन्द्र राय आ पुरु विद्वाꣳ ऋचीषम ।
अवा नः पार्ये धने ॥ ८ ०९२ ०९
अतश् चिद् इन्द्र ण उपा याहि शतवाजया ।
इषा सहस्रवाजया ॥ ८ ०९२ १०
अयाम धीवतो धियो ऽर्वद्भिः शक्र गोदरे ।
जयेम पृत्सु वज्रिवः ॥ ८ ०९२ ११

वयम् उ त्वा शतक्रतो गावो न यवसेष्व् आ ।
उक्थेषु रणयामसि ॥ ८ ०९२ १२
विश्वा हि मर्त्यत्वनानुकामा शतक्रतो ।
अगन्म वज्रिन्न् आशसः ॥ ८ ०९२ १३
त्वे सु पुत्र शवसो ऽवृत्रन् कामकातयः ।
न त्वाम् इन्द्राति रिच्यते ॥ ८ ०९२ १४
स नो वृषन् सनिष्ठया सं घोरया द्रवित्न्वा ।
धियाविड्ढि पुरंध्या ॥ ८ ०९२ १५
यस् ते नूनं शतक्रतव् इन्द्र द्युम्नितमो मदः ।
तेन नूनम् मदे मदेः ॥ ८ ०९२ १६
यस् ते चित्रश्रवस्तमो य इन्द्र वृत्रहन्तमः ।
य ओजोदातमो मदः ॥ ८ ०९२ १७
विद्मा हि यस् ते अद्रिवस् त्वादत्तः सत्य सोमपाः ।
विश्वासु दस्म कृष्टिषु ॥ ८ ०९२ १८
इन्द्राय मद्वने सुतम् परि ष्टोभन्तु नो गिरः ।
अर्कम् अर्चन्तु कारवः ॥ ८ ०९२ १९
यस्मिन् विश्वा अधि श्रियो रणन्ति सप्त संसदः ।
इन्द्रं सुते हवामहे ॥ ८ ०९२ २०
त्रिकद्रुकेषु चेतनं देवासो यज्ञम् अत्नत ।
तम् इद् वर्धन्तु नो गिरः ॥ ८ ०९२ २१
आ त्वा विशन्त्व् इन्दवः समुद्रम् इव सिन्धवः ।
न त्वाम् इन्द्राति रिच्यते ॥ ८ ०९२ २२
विव्यक्थ महिना वृषन् भक्षं सोमस्य जागृवे ।
य इन्द्र जठरेषु ते ॥ ८ ०९२ २३
अरं त इन्द्र कुक्षये सोमो भवतु वृत्रहन् ।
अरं धामभ्य इन्दवः ॥ ८ ०९२ २४
अरम् अश्वाय गायति श्रुतकक्षो अरं गवे ।
अरम् इन्द्रस्य धाम्ने ॥ ८ ०९२ २५

अ॒रं हि ष्म॑ सु॒तेषु॑ ण॒ः सोमे॑ष्व् इन्द्र॒ भूष॑सि ।
अरं॑ ते शक्र दा॒वने॑ ॥ ८ ०९२ २६
प॒रा॒कात्ता॑च् चिद् अद्रि॒वस् त्वां न॑क्षन्त नो॒ गिरः॑ ।
अरं॑ गमाम ते व॒यम् ॥ ८ ०९२ २७
ए॒वा ह्य् असि॑ वीर॒युर् ए॒वा शूर॑ उ॒त स्थि॒रः ।
ए॒वा ते॒ राध्य॒म् मनः॑ ॥ ८ ०९२ २८
ए॒वा रा॒तिस् तु॑वीमघ॒ विश्वे॑भिर् धायि धा॒तृभिः॑ ।
अधा॑ चिद् इन्द्र मे॒ सचा॑ ॥ ८ ०९२ २९
मो षु ब्र॒ह्मेव॑ तन्द्र॒युर् भुवो॑ वाजानाम् पते ।
मत्स्वा॑ सु॒तस्य॒ गोम॑तः ॥ ८ ०९२ ३०
मा न॑ इन्द्रा॒भ्य् आ ३॒॑ दिशः॒ सूरो॑ अ॒क्तुष्व् आ य॑मन् ।
त्वा यु॒जा व॑नेम॒ तत् ॥ ८ ०९२ ३१
त्वयेद् इ॑न्द्र यु॒जा व॒यम् प्रति॑ ब्रुवीमहि॒ स्पृधः॑ ।
त्वम् अ॒स्माकं॒ तव॑ स्मसि ॥ ८ ०९२ ३२
त्वाम् इद् धि त्वा॒यवो॑ ऽनु॒नोनु॑वत॒श् चरा॑न् ।
सखा॑य इन्द्र का॒रवः॑ ॥ ८ ०९२ ३३

(७०२)
उद् घेद् अ॒भि श्रु॒ताम॑घं वृष॒भं नर्या॑पसम् ।
अस्ता॑रम् एषि सूर्य ॥ ८ ०९३ ०१
न॒व यो न॑व॒तिम् पुरो॑ बि॒भेद॑ बा॒ह्वोजसा ।
अहिं॑ च वृत्र॒हाव॑धीत् ॥ ८ ०९३ ०२
स न॒ इन्द्रः॑ शि॒वः सखाश्वा॑व॒द् गोम॒द् यव॑मत् ।
उ॒रुधा॑रेव दोहते ॥ ८ ०९३ ०३
यद् अ॒द्य कच् च॑ वृत्रहन्न् उ॒दगा॑ अ॒भि सू॑र्य ।
सर्वं॒ तद् इ॑न्द्र ते॒ वशे॑ ॥ ८ ०९३ ०४
यद् वा॑ प्रवृद्ध सत्पते॒ न म॑रा॒ इति॒ मन्य॑से ।

उतो तत् सत्यम् इत् तव ॥ ८ ०९३ ०५
ये सोमासः परावति ये अर्वावति सुन्विरे ।
सर्वांस् ताꣳइन्द्र गच्छसि ॥ ८ ०९३ ०६
तम् इन्द्रं वाजयामसि महे वृत्राय हन्तवे ।
स वृषा वृषभो भुवत् ॥ ८ ०९३ ०७
इन्द्रः स दामने कृत ओजिष्ठः स मदे हितः ।
द्युम्नी श्लोकी स सोम्यः ॥ ८ ०९३ ०८
गिरा वज्रो न सम्भृतः सबलो अनपच्युतः ।
ववक्ष ऋष्वो अस्तृतः ॥ ८ ०९३ ०९
दुर्गे चिन् नः सुगं कृधि गृणान इन्द्र गिर्वणः ।
त्वं च मघवन् वशः ॥ ८ ०९३ १०
यस्य ते नू चिद् आदिशं न मिनन्ति स्वराज्यम् ।
न देवो नाध्रिगुर् जनः ॥ ८ ०९३ ११
अधा ते अप्रतिष्कुतं देवी शुष्मं सपर्यतः ।
उभे सुशिप्र रोदसी ॥ ८ ०९३ १२
त्वम् एतद् अधारयः कृष्णासु रोहिणीषु च ।
परुष्णीषु रुशत् पयः ॥ ८ ०९३ १३
वि यद् अहेर् अध त्विषो विश्वे देवासो अक्रमुः ।
विदन् मृगस्य ताꣳअमः ॥ ८ ०९३ १४
आद् उ मे निवरो भुवद् वृत्रहादिष्ट पौंस्यम् ।
अजातशत्रुर् अस्तृतः ॥ ८ ०९३ १५
श्रुतं वो वृत्रहन्तमम् प्र शर्धं चर्षणीनाम् ।
आ शुषे राधसे महे ॥ ८ ०९३ १६
अया धिया च गव्यया पुरुणामन् पुरुष्टुत ।
यत् सोमे-सोम आभवः ॥ ८ ०९३ १७
बोधिन्मना इद् अस्तु नो वृत्रहा भूर्यासुतिः ।
शृणोतु शक्र आशिषम् ॥ ८ ०९३ १८
कया त्वं न ऊत्याभि प्र मन्दसे वृषन् ।

कया स्तोतृभ्य आ भर ॥ ८ ०९३ १९
कस्य वृषा सुते सचा नियुत्वान् वृषभो रणत् ।
वृत्रहा सोमपीतये ॥ ८ ०९३ २०
अभी षु णस् त्वं रयिम् मन्दसानः सहस्रिणम् ।
प्रयन्ता बोधि दाशुषे ॥ ८ ०९३ २१
पत्नीवन्तः सुता इम उशन्तो यन्ति वीतये ।
अपां जग्मिर् निचुम्पुणः ॥ ८ ०९३ २२
इष्टा होत्रा असृक्षतेन्द्रं वृधासो अध्वरे ।
अच्छावभृथम् ओजसा ॥ ८ ०९३ २३
इह त्या सधमाद्या हरी हिरण्यकेश्या ।
वोळ्हाम् अभि प्रयो हितम् ॥ ८ ०९३ २४
तुभ्यं सोमाः सुता इमे स्तीर्णम् बर्हिर् विभावसो ।
स्तोतृभ्य इन्द्रम् आ वह ॥ ८ ०९३ २५
आ ते दक्षं वि रोचना दधद् रत्ना वि दाशुषे ।
स्तोतृभ्य इन्द्रम् अर्चत ॥ ८ ०९३ २६
आ ते दधामीन्द्रियम् उक्था विश्वा शतक्रतो ।
स्तोतृभ्य इन्द्र मृळय ॥ ८ ०९३ २७
भद्रम्-भद्रं न आ भरेषम् ऊर्जं शतक्रतो ।
यद् इन्द्र मृळयासि नः ॥ ८ ०९३ २८
स नो विश्वान्य् आ भर सुवितानि शतक्रतो ।
यद् इन्द्र मृळयासि नः ॥ ८ ०९३ २९
त्वाम् इद् वृत्रहन्तम सुतावन्तो हवामहे ।
यद् इन्द्र मृळयासि नः ॥ ८ ०९३ ३०
उप नो हरिभिः सुतं याहि मदानाम् पते ।
उप नो हरिभिः सुतम् ॥ ८ ०९३ ३१
द्विता यो वृत्रहन्तमो विद इन्द्रः शतक्रतुः ।
उप नो हरिभिः सुतम् ॥ ८ ०९३ ३२
त्वं हि वृत्रहन्न् एषाम् पाता सोमानाम् असि ।

उप॑ नो॒ हरि॑भिः सु॒तम् ॥ ८ ०९३ ३३
इन्द्र॑ इ॒षे द॑दातु न ऋभु॒क्षण॑म् ऋ॒भुं र॒यिम् ।
वा॒जी द॑दातु वा॒जिन॑म् ॥ ८ ०९३ ३४

(७०३)
गौर् ध॑यति म॒रुतां॑ श्रव॒स्युर् मा॒ता म॒घोना॑म् ।
यु॒क्ता व॒ह्नी रथा॑नाम् ॥ ८ ०९४ ०१
यस्या॑ दे॒वा उ॒पस्थे॑ व्र॒ता विश्वे॑ धा॒रय॑न्ते ।
सूर्या॒मासा॑ दृ॒शे कम् ॥ ८ ०९४ ०२
तत् सु नो॒ विश्वे॑ अ॒र्य आ सदा॑ गृणन्ति का॒रवः॑ ।
म॒रुतः॒ सोम॑पीतये ॥ ८ ०९४ ०३
अस्ति॒ सोमो॑ अ॒यं सु॒तः पिब॑न्त्य् अस्य म॒रुतः॑ ।
उ॒त स्व॒राजो॑ अ॒श्विना॑ ॥ ८ ०९४ ०४
पिब॑न्ति मि॒त्रो अ॑र्य॒मा तना॑ पू॒तस्य॒ वरु॑णः ।
त्रि॒ष॒ध॒स्थस्य॒ जाव॑तः ॥ ८ ०९४ ०५
उ॒तो न्व् अ॒स्य जोष॒म् आँ इन्द्रः॑ सु॒तस्य॒ गोम॑तः ।
प्रा॒तर् होते॑व मत्सति ॥ ८ ०९४ ०६
कद् अ॑त्विषन्त सू॒रय॑स् ति॒र आप॑ इव॒ स्रिधः॑ ।
अर्ष॑न्ति पू॒तद॑क्षसः ॥ ८ ०९४ ०७
कद् वो॑ अ॒द्य म॒हानां॑ दे॒वाना॒म् अवो॑ वृणे ।
त्मना॑ च द॒स्मव॑र्चसाम् ॥ ८ ०९४ ०८
आ ये विश्वा॒ पार्थि॑वानि प॒प्रथ॑न् रोच॒ना दि॒वः ।
म॒रुतः॒ सोम॑पीतये ॥ ८ ०९४ ०९
त्यान् नु पू॒तद॑क्षसो दि॒वो वो॑ मरुतो हुवे ।
अ॒स्य सोम॑स्य पी॒तये॑ ॥ ८ ०९४ १०
त्यान् नु ये वि रोद॑सी तस्त॒भुर् म॒रुतो॑ हुवे ।
अ॒स्य सोम॑स्य पी॒तये॑ ॥ ८ ०९४ ११

त्यं नु मारुतं गणं गिरिष्ठां वृषणं हुवे ।
अस्य सोमस्य पीतये ॥ ८ ०९४ १२

(७०४)
आ त्वा गिरो रथीर् इवास्थुः सुतेषु गिर्वणः ।
अभि त्वा सम् अनूषतेन्द्र वत्सं न मातरः ॥ ८ ०९५ ०१
आ त्वा शुक्रा अचुच्यवुः सुतास इन्द्र गिर्वणः ।
पिबा त्व् अ१स्यान्धस इन्द्र विश्वासु ते हितम् ॥ ८ ०९५ ०२
पिबा सोमम् मदाय कम् इन्द्र श्येनाभृतं सुतम् ।
त्वं हि शश्वतीनाम् पती राजा विशाम् असि ॥ ८ ०९५ ०३
श्रुधी हवं तिरश्च्या इन्द्र यस् त्वा सपर्यति ।
सुवीर्यस्य गोमतो रायस् पूर्धि महाँ असि ॥ ८ ०९५ ०४
इन्द्र यस् ते नवीयसीं गिरम् मन्द्राम् अजीजनत् ।
चिकित्विन्मनसं धियम् प्रत्नाम् ऋतस्य पिप्युषीम् ॥ ८ ०९५ ०५
तम् उ ष्टवाम यं गिर इन्द्रम् उक्थानि वावृधुः ।
पुरूण्य् अस्य पौंस्या सिषासन्तो वनामहे ॥ ८ ०९५ ०६
एतो न्व् इन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना ।
शुद्धैर् उक्थैर् वावृध्वांसं शुद्ध आशीर्वान् ममत्तु ॥ ८ ०९५ ०७
इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिर् ऊतिभिः ।
शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्यः ॥ ८ ०९५ ०८
इन्द्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे ।
शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि ॥ ८ ०९५ ०९

(७०५)
अस्मा उषास आतिरन्त यामम् इन्द्राय नक्तम् ऊर्म्याः सुवाचः ।
अस्मा आपो मातरः सप्त तस्थुर् नृभ्यस् तराय सिन्धवः सुपाराः ॥ ८ ०९६ ०१

अतिविद्धा विथुरेणा चिद् अस्त्रा त्रिः सप्त सानु संहिता गिरीणाम् ।
न तद् देवो न मर्त्यस् तुतुर्याद् यानि प्रवृद्धो वृषभश् चकार ॥ ८ ०९६ ०२
इन्द्रस्य वज्र आयसो निमिश्ल इन्द्रस्य बाह्वोर् भूयिष्ठम् ओजः ।
शीर्षन्न् इन्द्रस्य क्रतवो निरेक आसन्न् एषन्त श्रुत्या उपाके ॥ ८ ०९६ ०३
मन्ये त्वा यज्ञियं यज्ञियानाम् मन्ये त्वा च्यवनम् अच्युतानाम् ।
मन्ये त्वा सत्वनाम् इन्द्र केतुम् मन्ये त्वा वृषभं चर्षणीनाम् ॥ ८ ०९६ ०४
आ यद् वज्रम् बाह्वोर् इन्द्र धत्से मदच्युतम् अहये हन्तवा उ ।
प्र पर्वता अनवन्त प्र गावः प्र ब्रह्माणो अभिनक्षन्त इन्द्रम् ॥ ८ ०९६ ०५
तम् उ ष्टवाम य इमा जजान विश्वा जातान्य् अवराण्य् अस्मात् ।
इन्द्रेण मित्रं दिधिषेम गीर्भिर् उपो नमोभिर् वृषभं विशेम ॥ ८ ०९६ ०६
वृत्रस्य त्वा श्वसथाद् ईषमाणा विश्वे देवा अजहुर् ये सखायः ।
मरुद्भिर् इन्द्र सख्यं ते अस्त्व् अथेमा विश्वाः पृतना जयासि ॥ ८ ०९६ ०७
त्रिः षष्टिस् त्वा मरुतो वावृधाना उस्रा इव राशयो यज्ञियासः ।
उप त्वेमः कृधि नो भागधेयं शुष्मं त एना हविषा विधेम ॥ ८ ०९६ ०८
तिग्मम् आयुधम् मरुताम् अनीकं कस् त इन्द्र प्रति वज्रं दधर्ष ।
अनायुधासो असुरा अदेवाश् चक्रेण ताँ अप वप ऋजीषिन् ॥ ८ ०९६ ०९
मह उग्राय तवसे सुवृक्तिम् प्रेरय शिवतमाय पश्वः ।
गिर्वाहसे गिर इन्द्राय पूर्वीर् धेहि तन्वे कुविद् अङ्ग वेदत् ॥ ८ ०९६ १०
उक्थवाहसे विभ्वे मनीषां द्रुणा न पारम् ईरया नदीनाम् ।
नि स्पृश धिया तन्वै श्रुतस्य जुष्टतरस्य कुविद् अङ्ग वेदत् ॥ ८ ०९६ ११
तद् विविड्ढि यत् त इन्द्रो जुजोषत् स्तुहि सुष्टुतिं नमसा विवास ।
उप भूष जरितर् मा रुवण्यः श्रावया वाचं कुविद् अङ्ग वेदत् ॥ ८ ०९६ १२
अव द्रप्सो अंशुमतीम् अतिष्ठद् इयानः कृष्णो दशभिः सहस्रैः ।
आवत् तम् इन्द्रः शच्या धमन्तम् अप स्नेहितीर् नृमणा अधत्त ॥ ८ ०९६ १३
द्रप्सम् अपश्यं विषुणे चरन्तम् उपह्वरे नद्यो अंशुमत्याः ।
नभो न कृष्णम् अवतस्थिवांसम् इष्यामि वो वृषणो युध्यताजौ ॥ ८ ०९६ १४
अध द्रप्सो अंशुमत्या उपस्थे ऽधारयत् तन्वं तित्विषाणः ।
विशो अदेवीर् अभ्य् आ३ चरन्तीर् बृहस्पतिना युजेन्द्रः ससाहे ॥ ८ ०९६ १५

त्वं ह त्यत् सप्तभ्यो जायमानो ऽशत्रुभ्यो अभवः शत्रुर् इन्द्र ।
गूळ्हे द्यावापृथिवी अन्व् अविन्दो विभुमद्भ्यो भुवनेभ्यो रणं धाः ॥ ८ ०९६ १६
त्वं ह त्यद् अप्रतिमानम् ओजो वज्रेण वज्रिन् धृषितो जघन्थ ।
त्वं शुष्णस्यावातिरो वधत्रैस् त्वं गा इन्द्र शच्येद् अविन्दः ॥ ८ ०९६ १७
त्वं ह त्यद् वृषभ चर्षणीनां घनो वृत्राणां तविषो बभूथ ।
त्वं सिन्धूंर् असृजस् तस्तभानान् त्वम् अपो अजयो दासपत्नीः ॥ ८ ०९६ १८
स सुक्रतू रणिता यः सुतेष्व् अनुत्तमन्युर् यो अहेव रेवान् ।
य एक इन् नर्य् अपांसि कर्ता स वृत्रहा प्रतीद् अन्यम् आहुः ॥ ८ ०९६ १९
स वृत्रहेन्द्रश् चर्षणीधृत् तं सुष्टुत्या हव्यं हुवेम ।
स प्राविता मघवा नो ऽधिवक्ता स वाजस्य श्रवस्यस्य दाता ॥ ८ ०९६ २०
स वृत्रहेन्द्र ऋभुक्षाः सद्यो जज्ञानो हव्यो बभूव ।
कृण्वन्न् अपांसि नर्या पुरूणि सोमो न पीतो हव्यः सखिभ्यः ॥ ८ ०९६ २१

(७०६)
या इन्द्र भुज आभरः स्वर्वाँ असुरेभ्यः ।
स्तोतारम् इन् मघवन्न् अस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥ ८ ०९७ ०१
यम् इन्द्र दधिषे त्वम् अश्वं गाम् भागम् अव्ययम् ।
यजमाने सुन्वति दक्षिणावति तस्मिन् तं धेहि मा पणौ ॥ ८ ०९७ ०२
य इन्द्र सस्त्य् अव्रतो ऽनुष्वापम् अदेवयुः ।
स्वैः ष एवैर् मुमुरत् पोष्यं रयिं सनुतर् धेहि तं ततः ॥ ८ ०९७ ०३
यच् छक्रासि परावति यद् अर्वावति वृत्रहन् ।
अतस् त्वा गीर्भिर् द्युगद् इन्द्र केशिभिः सुतावाँ आ विवासति ॥ ८ ०९७ ०४
यद् वासि रोचने दिवः समुद्रस्याधि विष्टपि ।
यत् पार्थिवे सदने वृत्रहन्तम यद् अन्तरिक्ष आ गहि ॥ ८ ०९७ ०५
स नः सोमेषु सोमपाः सुतेषु शवसस् पते ।
मादयस्व राधसा सूनृतावतेन्द्र राया परीणसा ॥ ८ ०९७ ०६
मा न इन्द्र परा वृणग् भवा नः सधमाद्यः ।

त्वं न ऊती त्वम् इन् न आप्यम् मा न इन्द्र परा वृणक् ॥ ८ ०९७ ०७
अस्मे इन्द्र सचा सुते नि षदा पीतये मधु ।
कृधी जरित्रे मघवन्न् अवो महद् अस्मे इन्द्र सचा सुते ॥ ८ ०९७ ०८
न त्वा देवास आशत न मर्त्यासो अद्रिवः ।
विश्वा जातानि शवसाभिभूर् असि न त्वा देवास आशत ॥ ८ ०९७ ०९
विश्वाः पृतना अभिभूतरं नरं ।
सजूस् ततक्षुर् इन्द्रं जजनुश् च राजसे ।
क्रत्वा वरिष्ठं वर आमुरिम् उतोग्रम् ओजिष्ठं तवसं तरस्विनम् ॥ ८ ०९७ १०
सम् ईं रेभासो अस्वरन्न् इन्द्रं सोमस्य पीतये ।
स्वर्पतिं यद् ईं वृधे धृतव्रतो ह्य् ओजसा सम् ऊतिभिः ॥ ८ ०९७ ११
नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा ।
सुदीतयो वो अद्रुहो ऽपि कर्णे तरस्विनः सम् ऋक्वभिः ॥ ८ ०९७ १२
तम् इन्द्रं जोहवीमि मघवानम् उग्रं ।
सत्रा दधानम् अप्रतिष्कुतं शवांसि ।
मंहिष्ठो गीर्भिर् आ च यज्ञियो ववर्तद् ।
राये नो विश्वा सुपथा कृणोतु वज्री ॥ ८ ०९७ १३
त्वम् पुर इन्द्र चिकिद् एना व्य् ओजसा शविष्ठ शक्र नाशयध्यै ।
त्वद् विश्वानि भुवनानि वज्रिन् द्यावा रेजेते पृथिवी च भीषा ॥ ८ ०९७ १४
तन् म ऋतम् इन्द्र शूर चित्र पात्व् अपो न वज्रिन् दुरिताति पर्षि भूरि ।
कदा न इन्द्र राय आ दशस्येर् विश्वप्स्न्यस्य स्पृहयाय्यस्य राजन् ॥ ८ ०९७ १५

(७०७)
इन्द्राय साम गायत विप्राय बृहते बृहत् ।
धर्मकृते विपश्चिते पनस्यवे ॥ ८ ०९८ ०१
त्वम् इन्द्राभिभूर् असि त्वं सूर्यम् अरोचयः ।
विश्वकर्मा विश्वदेवो महाँ असि ॥ ८ ०९८ ०२
विभ्राजञ् ज्योतिषा स्व१र् अगच्छो रोचनं दिवः ।

देवास् त इन्द्र सख्याय येमिरे ॥ ८ ०९८ ०३
एन्द्र नो गधि प्रियः सत्राजिद् अगोह्यः ।
गिरिर् न विश्वतस् पृथुः पतिर् दिवः ॥ ८ ०९८ ०४
अभि हि सत्य सोमपा उभे बभूथ रोदसी ।
इन्द्रासि सुन्वतो वृधः पतिर् दिवः ॥ ८ ०९८ ०५
त्वं हि शश्वतीनाम् इन्द्र दर्ता पुराम् असि ।
हन्ता दस्योर् मनोर् वृधः पतिर् दिवः ॥ ८ ०९८ ०६
अधा हीन्द्र गिर्वण उप त्वा कामान् महः ससृज्महे ।
उदेव यन्त उदभिः ॥ ८ ०९८ ०७
वार् ण त्वा यव्याभिर् वर्धन्ति शूर ब्रह्माणि ।
वावृध्वांसं चिद् अद्रिवो दिवे-दिवे ॥ ८ ०९८ ०८
युञ्जन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे ।
इन्द्रवाहा वचोयुजा ॥ ८ ०९८ ०९
त्वं न इन्द्रा भरꣳ ओजो नृम्णं शतक्रतो विचर्षणे ।
आ वीरम् पृतनाषहम् ॥ ८ ०९८ १०
त्वं हि नः पिता वसो त्वम् माता शतक्रतो बभूविथ ।
अधा ते सुम्नम् ईमहे ॥ ८ ०९८ ११
त्वां शुष्मिन् पुरुहूत वाजयन्तम् उप ब्रुवे शतक्रतो ।
स नो रास्व सुवीर्यम् ॥ ८ ०९८ १२

(७०८)
त्वाम् इदा ह्यो नरो ऽपीप्यन् वज्रिन् भूर्णयः ।
स इन्द्र स्तोमवाहसाम् इह श्रुध्य् उप स्वसरम् आ गहि ॥ ८ ०९९ ०१
मत्स्वा सुशिप्र हरिवस् तद् ईमहे त्वे आ भूषन्ति वेधसः ।
तव श्रवांस्य् उपमान्य् उक्थ्या सुतेष्व् इन्द्र गिर्वणः ॥ ८ ०९९ ०२
श्रायन्त इव सूर्यं विश्वेद् इन्द्रस्य भक्षत ।
वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम ॥ ८ ०९९ ०३

अनर्शरातिं वसुदाम् उप स्तुहि भद्रा इन्द्रस्य रातयः ।
सो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् ॥ ८ ०९९ ०४
त्वम् इन्द्र प्रतूर्तिष्व् अभि विश्वा असि स्पृधः ।
अशस्तिहा जनिता विश्वतूर् असि त्वं तूर्य तरुष्यतः ॥ ८ ०९९ ०५
अनु ते शुष्मं तुरयन्तम् ईयतुः क्षोणी शिशुं न मातरा ।
विश्वास् ते स्पृधः श्नथयन्त मन्यवे वृत्रं यद् इन्द्र तूर्वसि ॥ ८ ०९९ ०६
इत ऊती वो अजरम् प्रहेतारम् अप्रहितम् ।
आशुं जेतारं हेतारं रथीतमम् अतूर्तं तुग्र्यावृधम् ॥ ८ ०९९ ०७
इष्कर्तारम् अनिष्कृतं सहस्कृतं शतमूतिं शतक्रतुम् ।
समानम् इन्द्रम् अवसे हवामहे वसवानं वसूजुवम् ॥ ८ ०९९ ०८

(७०९)

अयं त एमि तन्वा पुरस्ताद् विश्वे देवा अभि मा यन्ति पश्चात् ।
यदा मह्यं दीधरो भागम् इन्द्राद् इन् मया कृणवो वीर्याणि ॥ ८ १०० ०१
दधामि ते मधुनो भक्षम् अग्रे हितस् ते भागः सुतो अस्तु सोमः ।
असश् च त्वं दक्षिणतः सखा मे ऽधा वृत्राणि जङ्घनाव भूरि ॥ ८ १०० ०२
प्र सु स्तोमम् भरत वाजयन्त इन्द्राय सत्यं यदि सत्यम् अस्ति ।
नेन्द्रो अस्तीति नेम उ त्व आह क ईं ददर्श कम् अभि ष्टवाम ॥ ८ १०० ०३
अयम् अस्मि जरितः पश्य मेह विश्वा जातान्य् अभ्य् अस्मि मह्ना ।
ऋतस्य मा प्रदिशो वर्धयन्त्य् आदर्दिरो भुवना दर्दरीमि ॥ ८ १०० ०४
आ यन् मा वेना अरुहन्न् ऋतस्यँ एकम् आसीनं हर्यतस्य पृष्ठे ।
मनश् चिन् मे हृद आ प्रत्य् अवोचद् अचिक्रदञ् छिशुमन्तः सखायः ॥ ८ १०० ०५
विश्वेत् ता ते सवनेषु प्रवाच्या या चकर्थ मघवन्न् इन्द्र सुन्वते ।
पारावतं यत् पुरुसम्भृतं वस्व् अपावृणोः शरभाय ऋषिबन्धवे ॥ ८ १०० ०६
प्र नूनं धावता पृथङ् नेह यो वो अवावरीत् ।
नि षीं वृत्रस्य मर्मणि वज्रम् इन्द्रो अपीपतत् ॥ ८ १०० ०७
मनोजवा अयमान आयसीम् अतरत् पुरम् ।

दिवं सुपर्णो गत्वाय सोमं वज्रिण आभरत् ॥ ८ १०० ०८
समुद्रे अन्तः शयत उद्ना वज्रो अभीवृतः ।
भरन्त्य् अस्मै संयतः पुरःप्रस्रवणा बलिम् ॥ ८ १०० ०९
यद् वाग् वदन्त्य् अविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा ।
चतस्र ऊर्जं दुदुहे पयांसि क्व स्विद् अस्याः परमं जगाम ॥ ८ १०० १०
देवीं वाचम् अजनयन्त देवास् तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेषम् ऊर्जं दुहाना धेनुर् वाग् अस्मान् उप सुष्टुतैतु ॥ ८ १०० ११
सखे विष्णो वितरं वि क्रमस्व द्यौर् देहि लोकं वज्राय विष्कभे ।
हनाव वृत्रं रिणचाव सिन्धून् इन्द्रस्य यन्तु प्रसवे विसृष्टाः ॥ ८ १०० १२

(७१०)
ऋधग् इत्था स मर्त्यः शशमे देवतातये ।
यो नूनम् मित्रावरुणाव् अभिष्टय आचक्रे हव्यदातये ॥ ८ १०१ ०१
वर्षिष्ठक्षत्रा उरुचक्षसा नरा राजाना दीर्घश्रुत्तमा ।
ता बाहुता न दंसना रथर्यतः साकं सूर्यस्य रश्मिभिः ॥ ८ १०१ ०२
प्र यो वाम् मित्रावरुणाजिरो दूतो अद्रवत् ।
अयःशीर्षा मदेरघुः ॥ ८ १०१ ०३
न यः सम्पृच्छे न पुनर् हवीतवे न संवादाय रमते ।
तस्मान् नो अद्य समृतेर् उरुष्यतम् बाहुभ्यां न उरुष्यतम् ॥ ८ १०१ ०४
प्र मित्राय प्रार्यम्णे सचथ्यम् ऋतावसो ।
वरूथ्य१ं वरुणे छन्द्यं वचः स्तोत्रं राजसु गायत ॥ ८ १०१ ०५
ते हिन्विरे अरुणं जेन्यं वस्व् एकम् पुत्रं तिसृणाम् ।
ते धामान्य् अमृता मर्त्यानाम् अदब्धा अभि चक्षते ॥ ८ १०१ ०६
आ मे वचांस्य् उद्यता द्युमत्तमानि कर्त्वा ।
उभा यातं नासत्या सजोषसा प्रति हव्यानि वीतये ॥ ८ १०१ ०७
रातिं यद् वाम् अरक्षसं हवामहे युवाभ्यां वाजिनीवसू ।
प्राचीं होत्राम् प्रतिरन्ताव् इतं नरा गृणाना जमदग्निना ॥ ८ १०१ ०८

आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः ।
अन्तः पवित्र उपरि श्रीणानो ऽयं शुक्रो अयामि ते ॥ ८ १०१ ०९
वेत्य् अध्वर्युः पथिभी रजिष्ठैः प्रति हव्यानि वीतये ।
अधा नियुत्व उभयस्य नः पिब शुचिं सोमं गवाशिरम् ॥ ८ १०१ १०
बण् महाँ असि सूर्य बळ् आदित्य महाँ असि ।
महस् ते सतो महिमा पनस्यते ऽद्धा देव महाँ असि ॥ ८ १०१ ११
बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि ।
मह्ना देवानाम् असुर्यः पुरोहितो विभु ज्योतिर् अदाभ्यम् ॥ ८ १०१ १२
इयं या नीच्य् अर्किणी रूपा रोहिण्या कृता ।
चित्रेव प्रत्य् अदर्श्य् आयत्य् अ १ न्तर् दशसु बाहुषु ॥ ८ १०१ १३
प्रजा ह तिस्रो अत्यायम् ईयुर् न्य् अ १ न्या अर्कम् अभितो विविश्रे ।
बृहद् ध तस्थौ भुवनेष्व् अन्तः पवमानो हरित आ विवेश ॥ ८ १०१ १४
माता रुद्राणां दुहिता वसूनां स्वसादित्यानाम् अमृतस्य नाभिः ।
प्र नु वोचं चिकितुषे जनाय मा गाम् अनागाम् अदितिं वधिष्ट ॥ ८ १०१ १५
वचोविदं वाचम् उदीरयन्तीं विश्वाभिर् धीभिर् उपतिष्ठमानाम् ।
देवीं देवेभ्यः पर्य् एयुषीं गाम् आ मावृक्त मर्त्यो दभ्रचेताः ॥ ८ १०१ १६

(७११)
त्वम् अग्ने बृहद् वयो दधासि देव दाशुषे ।
कविर् गृहपतिर् युवा ॥ ८ १०२ ०१
स न ईळानया सह देवाँ अग्ने दुवस्युवा ।
चिकिद् विभानव् आ वह ॥ ८ १०२ ०२
त्वया ह स्विद् युजा वयं चोदिष्ठेन यविष्ठ्य ।
अभि ष्मो वाजसातये ॥ ८ १०२ ०३
और्वभृगुवच् छुचिम् अप्नवानवद् आ हुवे ।
अग्निं समुद्रवाससम् ॥ ८ १०२ ०४
हुवे वातस्वनं कविम् पर्जन्यक्रन्द्यं सहः ।

अ॒ग्निं स॑मु॒द्रवा॑ससम् ॥ ८ १०२ ०५
आ स॒वं स॑वि॒तुर् य॑था॒ भग॑स्येव भु॒जिं हु॑वे ।
अ॒ग्निं स॑मु॒द्रवा॑ससम् ॥ ८ १०२ ०६
अ॒ग्निं वो॑ वृ॒धन्त॑म् अध्व॒राणा॑म् पु॒रू॒तम॑म् ।
अच्छा॒ नप्त्रे॒ सह॑स्वते ॥ ८ १०२ ०७
अ॒यं यथा॑ न आ॒भुव॒त् त्वष्टा॑ रू॒पेव॒ तक्ष्या॑ ।
अ॒स्य क्रत्वा॒ यश॑स्वतः ॥ ८ १०२ ०८
अ॒यं विश्वा॑ अ॒भि श्रियो॑ ऽग्निर् दे॒वेषु॑ पत्यते ।
आ वाजै॒र् उप॑ नो गमत् ॥ ८ १०२ ०९
विश्वे॑षाम् इ॒ह स्तु॑हि॒ होतॄ॑णां य॒शस्त॑मम् ।
अ॒ग्निं य॒ज्ञेषु॑ पू॒र्व्यम् ॥ ८ १०२ १०
शी॒रम् पा॑व॒कशो॑चि॒षं ज्येष्ठो॒ यो द॒मे॒ष्व् आ ।
दी॒दाय॑ दी॒र्घश्रु॑त्तमः ॥ ८ १०२ ११
तम् अर्व॑न्तं॒ न सा॑न॒सिं गृ॑णी॒हि वि॑प्र शु॒ष्मिण॑म् ।
मि॒त्रं न या॑त॒यज्ज॑नम् ॥ ८ १०२ १२
उप॑ त्वा जा॒मयो॒ गिरो॒ देदि॑शतीर् हवि॒ष्कृतः॑ ।
वा॒योर् अनी॑के अस्थिरन् ॥ ८ १०२ १३
यस्य॑ त्रि॒धात्व् अवृ॑तम् ब॒र्हिस् त॒स्थाव् असं॑दिनम् ।
आप॑श् चि॒न् नि द॑धा प॒दम् ॥ ८ १०२ १४
प॒दं दे॒वस्य॑ मी॒ळ्हुषो ऽना॑धृष्टाभिर् ऊ॒तिभिः॑ ।
भ॒द्रा सूर्य॑ इवोप॒दृक् ॥ ८ १०२ १५
अग्ने॑ घृ॒तस्य॑ धी॒तिभि॑स् तेपा॒नो दे॑व शो॒चिषा॑ ।
आ दे॒वान् व॑क्षि॒ यक्षि॑ च ॥ ८ १०२ १६
तं त्वा॑जनन्त मा॒तरः॑ क॒विं दे॒वासो॑ अङ्गिरः ।
ह॒व्यवा॒हम् अम॑र्त्यम् ॥ ८ १०२ १७
प्रचे॑तसं त्वा क॒वे ऽग्ने॑ दू॒तं वरे॑ण्यम् ।
ह॒व्यवा॒हं नि षे॑दिरे ॥ ८ १०२ १८
न॒हि मे॒ अस्त्य् अघ्न्या॒ न स्वधि॑ति॒र् वन॑न्वति ।

अथै॑ता॒दृग् भ॑रामि ते ॥ ८ १०२ १९
यद् अ॑ग्ने॒ कानि॒ कानि॑ चि॒द् आ ते॒ दारू॑णि द॒ध्मसि॑ ।
ता जु॑षस्व यविष्ठ्य ॥ ८ १०२ २०
यद् अत्त्य् उ॑प॒जिह्वि॑का॒ यद् व॒म्रो अ॑ति॒सर्प॑ति ।
सर्वं॒ तद् अ॑स्तु ते घृ॒तम् ॥ ८ १०२ २१
अ॒ग्निम् इन्धा॑नो॒ मन॑सा॒ धियं॑ सचेत॒ मर्त्यः॑ ।
अ॒ग्निम् ई॑धे वि॒वस्व॑भिः ॥ ८ १०२ २२

(७१२)
अद॑र्शि गातु॒वित्त॑मो॒ यस्मि॑न् व्र॒तान्य् आ॑द॒धुः ।
उपो॒ षु जा॒तम् आर्य॑स्य॒ वर्ध॑नम् अ॒ग्निं नक्ष॑न्त नो॒ गिरः॑ ॥ ८ १०३ ०१
प्र दैवो॑दासो अ॒ग्निर् दे॒वाँ अच्छा॒ न म॒ज्मना॑ ।
अनु॑ मा॒तर॑म् पृथि॒वीं वि वा॑वृते त॒स्थौ नाक॑स्य॒ सान॑वि ॥ ८ १०३ ०२
यस्मा॒द् रेज॑न्त कृ॒ष्टय॑श् च॒र्कृत्या॑नि कृण्व॒तः ।
स॒ह॒स्र॒साम् मे॒धसा॑ताव् इव॒ त्मना॒ग्निं धी॒भिः स॑पर्यत ॥ ८ १०३ ०३
प्र यं रा॒ये निनी॑षसि॒ मर्तो॒ यस् ते॑ वसो॒ दाश॑त् ।
स वी॒रं ध॑त्ते अग्न उक्थशं॒सिनं॒ त्मना॑ सहस्रपो॒षिण॑म् ॥ ८ १०३ ०४
स दृ॒ळ्हे चि॑द् अ॒भि तृ॑णत्ति॒ वाज॒म् अर्व॑ता॒ स ध॑त्ते॒ अक्षि॑ति॒ श्रवः॑ ।
त्वे दे॑व॒त्रा सदा॑ पुरूवसो॒ विश्वा॑ वा॒मानि॑ धीमहि ॥ ८ १०३ ०५
यो विश्वा॒ दय॑ते॒ वसु॒ होता॑ म॒न्द्रो जना॑नाम् ।
मधो॒र् न पात्रा॑ प्रथ॒मान्य् अ॑स्मै॒ प्र स्तोमा॑ यन्त्य् अ॒ग्नये॑ ॥ ८ १०३ ०६
अश्वं॒ न गी॒र्भी र॒थ्यं॑ सु॒दान॑वो मर्मृ॒ज्यन्ते॑ देव॒यवः॑ ।
उ॒भे तो॒के तन॑ये दस्म विश्पते॒ पर्षि॒ राधो॑ म॒घोना॑म् ॥ ८ १०३ ०७
प्र मंहि॑ष्ठाय गायत ऋ॒ताव्ने॑ बृह॒ते शु॒क्रशो॑चिषे ।
उप॑स्तुतासो अ॒ग्नये॑ ॥ ८ १०३ ०८
आ वं॑सते म॒घवा॑ वी॒रव॒द् यशः॒ समि॑द्धो द्यु॒म्न्य् आहु॑तः ।
कु॒विन् नो॑ अस्य सु॒मति॒र् नवी॑य॒स्य् अच्छा॒ वाजे॑भिर् आ॒गम॑त् ॥ ८ १०३ ०९

प्रेष्ठम् उ प्रियाणां स्तुह्य आसावातिथिम् ।
अग्निं रथानां यमम् ॥ ८ १०३ १०
उदिता यो निदिता वेदिता वस्व् आ यज्ञियो ववर्तति ।
दुष्टरा यस्य प्रवणे नोर्मयो धिया वाजं सिषासतः ॥ ८ १०३ ११
मा नो हृणीताम् अतिथिर् वसुर् अग्निः पुरुप्रशस्त एषः ।
यः सुहोता स्वध्वरः ॥ ८ १०३ १२
मो ते रिषन् ये अच्छोक्तिभिर् वसो ऽग्ने केभिश् चिद् एवैः ।
कीरिश् चिद् धि त्वाम् ईट्टे दूत्याय रातहव्यः स्वध्वरः ॥ ८ १०३ १३
आग्ने याहि मरुत्सखा रुद्रेभिः सोमपीतये ।
सोभर्या उप सुष्टुतिम् मादयस्व स्वर्णरे ॥ ८ १०३ १४